**SAHITYA**
**1st ELECTIVE**

**SASTRI IIIrd YEAR**
**Part - II - Paper - V**

# KUVALAYANANDA


**Directorate of Distance Education**

Rashtriya Sanskrit Vidyapeetha

Accredited at 'A' level by NAAC

Tirupati - 517 064 (A.P.)

# कुवलयानन्दः

## *उपोद्घातः*

यथा अस्मिन् भूतले मानवैः शरीरसौन्दर्यवर्धनाय सुवर्णालङ्काराः परिधार्यन्ते तथैव काव्यशोभां संवर्धयितुं काव्यतत्त्वेषु अन्तर्भूतमेकं तत्त्वं नाम अलङ्कारः । तस्मादेव **‘सौन्दर्यमलङ्कारः’** वा **‘अलङ्कृतिरलङ्कारः**’ वेति वामनाचार्येण उपनिबद्धम् । **‘काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते’** इति दण्डिना स्वग्रन्थे प्रतिपादितम् । मम्मटोऽपि ‘**काव्यप्रकाशः’** इत्यस्मिन् ग्रन्थे उल्लिखति यत् **‘हारादिवदलङ्काराः’** इति। इत्थं ‘**काव्यशोभावर्धकं तत्त्वमलङ्काराः**’ इत्यस्माभिः अवगम्यते ।

कोऽयमलङ्कारः? कथञ्चास्य शब्दस्य व्युत्पत्तिः? इति प्रश्नः भवतां मनस्सु उद्भवति खलु ।

प्रश्नस्यास्य उत्तरं परिशीलिते सति अवगम्यते यत् ‘अलम्’ इति उपसर्गपूर्वकं ‘कृ’ इत्यनेन धातुना सह क्तिन् वा घञ् वा प्रत्ययं योजयित्वा‘अलङ्कारः’ इति पदस्य निर्मितिः इति । शब्दोऽयं भावार्थे करणार्थे वेति अर्थद्वये प्रयुज्यते । शोभायाः वा सुन्दरतायाः भावः सौन्दर्यमिति भावार्थे शब्दस्यास्य प्रयोगः । तथैव अलङ्क्रियतेऽनेन इति करणार्थे ‘अलङ्कारः’ इति शब्दस्य विनियोगः । काव्यशास्त्रेऽस्मिन् प्रायः अयं करणार्थ एव अत्यधिकः प्रचलितः ।

एवं साहित्यशास्त्रे काव्यशास्त्रे वा काव्यशोभावृद्धिं विधातुम् अलङ्कारप्रयोजनम् । किन्तु काव्यालङ्काराः कुत्र योजनीयाः? इति पृष्टे सति काव्यशरीरे इत्युत्तरं सम्प्राप्यते ।

यथा मानवशरीरं रक्त-मांस-अस्थिपञ्जरैः विनिर्मितं भवति तथैव काव्यशरीरमपि शब्दार्थैः सुसम्पन्नं विद्यते । अत्र हि शब्दः तथा च अर्थः मूलतः पृथक् काव्यतत्त्वम् । परन्तु शब्दैः विना अर्थस्य अस्तित्वं नास्ति । अपि च अर्थात् ऋते न शब्दस्य माहात्म्यम् । एवमन्योन्यसम्बन्धः शब्दार्थयोः। तस्मादेव शब्दार्थशरीरम् आश्रित्य तिष्ठन्ति अलङ्काराः ।

इमे चालङ्काराः त्रिविधाः -

अलङ्कारः

शब्दालङ्कारः | अर्थालङ्कारः | उभयालङ्कारः (मिश्रालङ्कारः)

१. **शब्दालङ्कारः** – विशेषशब्दप्रयोगेण यत्र चमत्कृतिः उत्पद्यते तत्र शब्दालङ्कारः । शब्दपरिवर्तनं वा पर्यायवाचकशब्दयोजना तत्र अलङ्कारत्वं नाशयति । तस्मादेव **शब्दपरिवृत्ति – असहत्वं शब्दालङ्कारत्वम्** इति तस्य सामान्यलक्षणम् ।

**२. अर्थालङ्कारः** – यत्र विशेषार्थः चमत्कारहेतुः भवति तत्र अर्थालङ्कारः । अस्यार्थः विशेषार्थमाध्यमेन तस्मिन् काव्ये शोभा वृद्धिङ्गता वर्तते । पदपरिवर्तनेन न काऽपि सौन्दर्यहानिः सम्भवति तत्र । अतः **शब्दपरिवृत्तिसहत्वम् अर्थालङ्कारत्वम्** इति।

**३. उभयालङ्कारः** - अलङ्कारेऽस्मिन् शब्दालङ्कारार्थालङ्कारयोः समावेशः ।

एषां काव्यालङ्काराणां महत्त्वं प्राचीनकालादेव विलोक्यते अस्माभिः । तस्मादेव तेषां विवेचनमपि बहुषु काव्यशास्त्रग्रन्थेषु समुपलभ्यते । तेष्वेव एकतमः ग्रन्थः **कुवलयानन्दः** इति । साहित्यशास्त्राध्येतृभिः काव्यालङ्काराणां ज्ञानमवश्यम् अधिगन्तव्यमिति धिया ग्रन्थोऽयं पाठ्यक्रमे विनियोजितः ।

**ग्रन्थकर्तृपरिचयः**

**अमुं कुवलयानन्दमकरोदप्पदीक्षितः ।**
**नियोगाद्वेङ्कटपतेर्निरुपाधिकृपानिधेः ॥**

प्रस्तुतश्लोकः **कुवलयानन्दः** इत्यस्य ग्रन्थस्य उपसंहारे समुल्लिखितः । अनेन ज्ञायते यत् कुवलयानन्दस्य प्रणेता अप्पदीक्षित इति । अपि च तस्य आश्रयदाता दक्षिणभारतस्य महाराजः वेङ्कटपतिरासीत् । भारद्वाजवंशे प्राप्तजन्मा अप्पदीक्षितः निरुपमप्रतिभासम्पन्नस्सन् नैकान् ग्रन्थान् व्यरचयत् । संस्कृतजगति अस्योल्लेखः त्रिविधप्रकारैः समुपलभ्यते । अप्पयदीक्षितः, अप्पदीक्षितः अप्पय्यदीक्षितश्चेति ।

**"इति श्रीमदद्वैतविद्याचार्य - श्रीमद्भरद्वाजकुलजलाधिकौस्तुभ - श्रीरङ्गराजाध्वरीन्द्र - वरसूनोः श्रीमदप्पय्यदीक्षितस्य कृतिः कुवलयानन्दः समाप्तः।"**

ग्रन्थस्य समाप्तौ प्रस्तुतवाक्यस्योल्लेखः अस्मान् ज्ञापयति यत् अप्पय्यदीक्षितस्य जनकः रङ्गराजाध्वरीन्द्रः अद्वैतविद्यापण्डितः आसीदिति ।

**अप्पदीक्षितस्य कालानर्णयः -**

अस्य कालनिर्णयविषये मतभेदाः दृश्यन्ते । यतो हि दक्षिणभारते '**वेङ्कट**' इति नाम्ना राजाद्वयमभवत्। आफ्रेक्टः तथा च एगेलिङ्गः इत्यनयोः अभिप्रायानुसारं विजयनगरस्य वेङ्कटपतिः अप्पदीक्षितस्य आश्रयदाता आसीत् । अस्य कालखण्डः ख्रिस्ताब्दस्य १५३५ संवत्सरमिति । किन्तु हुल्शः इत्यस्य मतानुसारं '**पेन्नकोण्डाः**' इत्यस्य अधिपतिः '**वेङ्कटः**' अस्य आश्रयदाता इति । अस्य कालखण्डः ख्रिस्ताब्दस्य १५८६ तः १६१३ संवत्सरमिति। तेन हि अप्पदीक्षितस्य कालः ख्रिस्ताब्दस्य षोडशशतकस्य अन्तिमचरणमिति ऊह्यते ।

**ग्रन्थकर्तुः अप्पयदीक्षितस्य कृतयः -**

कुवलयानन्दस्य कर्ता अप्पयदीक्षितः विविधशास्त्रनिष्णात आसीत् । तेन १०४ परिमिताः ग्रन्थाः विरचितास्सान्ति ।

तेषां विवेचनं यथा -

१. अद्वैतवेदान्तविषयकग्रन्थाः -

श्रीपरिमलः, सिद्धान्तलेशसङ्ग्रहः, वेदान्तनक्षत्रवादावली, न्यायरक्षामणिः, मध्वतन्त्रमुखमर्दनम्, मध्वमतविध्वंसनम् ।

२. रामानुजमतविषयकग्रन्थाः -

नखमयूखमालिका, नखमयूखमालिकाव्याख्या, वरदराजस्तवः वेदान्तदेशिकविरचितस्य **यादवाभ्युदयः** इत्यस्य व्याख्या, वेदान्तदेशिकविरचितस्य **पादुकारहस्य** इत्यस्य व्याख्या ।

३.पूर्वमीमांसा शास्त्रग्रन्थाः-

१) नक्षत्रवादावली   २) विधिरसायनम्

४. व्याकरणग्रन्थः – नक्षत्रवादावली

५. माध्वसिद्धान्तमनुसृत्य ग्रन्थरचना – 1. न्यायरत्नमाला   2. न्यायरत्नमालाव्याख्या

६. स्तोत्रवाङ्मयम् – २६ ग्रन्थाः ।

७.अलङ्कारशास्त्रग्रन्थाः – १. वृत्तिवार्तिकम्   २. चित्रमीमांसा ३. कुवलयानन्दः

**ग्रन्थपरिचयः – कुवलयानन्दः**

अप्पयदीक्षितप्रणीतः **कुवलयानन्दः** इत्ययं ग्रन्थः अलङ्कारशास्त्रविषयकः । श्रीजयदेवविरचितं चन्द्रालोकमेव मूलतया परिगृह्य उपमादिहेत्वालङ्कारान्ताः १३३ अर्थालङ्काराः निरूपितास्सन्ति इत्यत्र प्रमाणं नाम प्रत्यक्षग्रन्थकारेण एव ग्रन्थेऽस्मिन् उद्धृतमस्ति। तद्यथा –

**येषां चन्द्रालोके दृश्यन्ते लक्ष्यलक्षणश्लोकाः ।**
**प्रायस्त एव तेषामितरेषां त्वभिनवा विरच्यन्ते ।। इति**

न केवलं चन्द्रालोककारेण जयदेवेन निर्दिष्टाः अर्थालङ्कारा अपि तु ततोऽपि अधिका अत्र सन्दृश्यन्ते । परन्तु शब्दालङ्काराणां विवरणमत्र नैव कृतमस्ति ।

जयदेवस्य प्रतिपादनशैली अपि यथावत् अप्पदीक्षितेन अनुसृता । चन्द्रालोकः इत्यत्र कारिकाः अनुष्टुप्छन्दसि वर्तन्ते। यत्र हि पूर्वार्धे अलङ्कारलक्षणम् उत्तरार्धे च लक्ष्यं दृश्यते । अयमेव क्रमः कुवलयानन्दकारेण अनुसृतः । परन्तु तेन सहैव कारिकाणां तात्पर्यज्ञानाय तत्र वृत्तिरपि संयोजितेति विशेषः ।

**ग्रन्थप्रयोजनम् –**

चन्द्रालोकस्य उपस्थितौ कुवलयानन्दस्य किं वा प्रयोजनमित्यस्य उत्तरं ग्रन्थारम्भे एव कर्त्रा उद्घोषितमस्ति।

तद्यथा -

**अलङ्कारेषु बालानामवगाहनसिद्धये।**
**ललितः क्रियते तेषां लक्ष्यलक्षणसङ्ग्रहः ।। इति ।।**

बालानां इत्युक्ते अलङ्कारस्वरूपजिज्ञासूनां सुखावबोधाय ग्रन्थस्यास्य प्रयोजनमिति।

**स्वावलोकनप्रश्नाः**

1. अलङ्काराः कतिविधा ?
2. 'शब्दपरिवृत्तिसहत्वम्' इति कस्य सामान्यलक्षणम् ?
3. उभयालङ्कारे कयोः द्वयोः समावेशः ?
4. कुवलयानन्दस्य प्रणेता कः ?
5. अप्पय्यदीक्षितस्य कालः कः ?
6. अप्पय्यदीक्षितस्य पितुः नाम किम्?
7. 'चित्रमीमांसा' इत्यस्य कर्ता कः ?

**कुवलयानन्दस्य वैशिष्ट्यम्**

साहित्यशास्त्रे ग्रन्थोऽयमतीव महत्त्वपूर्णं स्थानं भजते । यतो ह्यत्र प्रायः सर्वैः आलङ्कारिकैः उद्भाविदालङ्काराणां विवेचनं परिलक्ष्यते । तथैव पदे पदे रसगङ्गाधर; अलङ्कारकौस्तुभः तथा च उद्योतः इत्येषाम् उल्लेखोऽपि दरीदृश्यते । तस्मादेव एतेषां सर्वेषां ग्रन्थानाम् अध्येतॄणां कृते दीक्षितवर्यस्य विचाराणां ज्ञानमत्यावश्यकमेव। तथैव सङ्ग्रहस्वरूपात्मकेऽस्मिन् ग्रन्थे चन्द्रालोकतः अधिकाः अलङ्काराः उपन्यस्ता इत्यपि अस्य वैशिष्ट्यम् ।ग्रन्थारम्भे ग्रन्थकारः विघ्ननिवारणाय मङ्गलश्लोकत्रयं विरचय्य इष्टदेवतां स्तौति । अपि च अर्थालङ्कारयोजनया काव्यशोभावर्धनं प्रतिपादयति।

**अमरीकबरीभारभ्रमरीमुखरीकृतम्।**
**दूरीकरोतु दुरितं गौरीचरणपङ्कजम्।।१ ।।**

**अन्वयः -** अमरी – कबरीभार – भ्रमरीमुखरीकृतम् , गौरीचरणपङ्कजम्, दुरितं दूरीकरोतु ।

**अर्थः -** नमस्कर्तुम् अवनतानाम् अमरीणां (देवाङ्गनानाम्) कबरीभारस्य (केशपाशस्य) सम्बन्धिनी या भ्रामरी तया गुञ्जायितं देव्याः गौर्याः चरणकमलम् अस्माकं पापनिवारणं करोतु।

श्लोकेऽस्मिन् 'चरणमेव पङ्कजम्' इत्यवगन्तव्यम्। यतो हि पापप्रक्षालनसामर्थ्यं चरणे न तु पङ्कजे। तस्मात् परिणामालङ्कारः अत्र। तथैव केशपाशे 'भ्रमरी' इत्यस्याः आरोपणमपि कमलसुगन्धसम्बद्धम्। यतः कमलसुगन्धेन आकृष्टा भ्रमरी चरणं मुखरीकरोति। अत्र हि गौरीविषयिकी सुराङ्गनागता कविगता च रतिः परिपुष्टा भवति।

**परस्परतपःसम्पत्फलायितपरस्परौ।**
**प्रपञ्चमातापितरौ प्राञ्चौ जायापती स्तुमः ॥ २ ॥**

**अन्वयः -** परस्पर – तपःसम्पत्फलयित – परस्परौ, प्रपञ्च – मातापितरौ, प्राञ्चौ, जायापती, स्तुमः।

**अर्थः** – प्राञ्चौ (पुरातनौ) जायापती अर्थादुमामहेश्वरौ स्तुमः। यौ प्रपञ्चस्य जीववर्गस्य मातृपितृरूपौ। तथा च परस्परतपःसम्पत्फलयितौ स्तः।

शिवपार्वत्योः दाम्पत्यसम्बन्धः पुरातनः। तथैव परस्परतपःसम्पत्फलायितपरस्परौ इत्युक्ते पार्वत्याः तपःसम्पत्तेः फलरूपेण शिवप्राप्तिः, अपि च शिवस्य तपःसम्पत्तेः फलरूपेण पार्वतीलाभः इति परस्परसापेक्षता। प्रपञ्चस्य मातापितरावित्यनेन सकलप्रपञ्चस्य मूलकारणम् इति रूपकम्। तपःसम्पत्तेश्च फलमस्ति निरतिशयानन्दः इति तदुपमया परस्परं परमप्रेमास्पदत्वं लक्षयति। रूपकोपमयोः संसृष्टिरिति। एवं ग्रन्थकारस्य शिवभक्तिः अत्र निवेद्यते।

**उद्घाटय योगकलया हृदयाब्जकोशं**
**धन्यैश्चिरादपि यथारूचि गृह्यमाणाः।**
**यः प्रस्फुरत्यविरतं परिपूर्णरूपः**
**श्रेयः स मे दिशतु शाश्वतिकं मुकुन्दः ॥ ३॥**

**अन्वयः -** हृदयाब्जकोशम्, योगकलया, उद्घाटय, चिरात्, धन्यैः, यथारुचि, गृह्यमाणः, अपि, यः अविरतम्, परिपूर्णरूपः, प्रस्फुरति, सः मुकुन्दः, मे, शाश्वतिकम्, श्रेयः दिशतु।

**अर्थः -** योगाभ्यासपाटवेन हृदयकमलकलिकां विकासं प्रापय्य चिरकालात् यैः धन्यैः तपोबलसुकृतेन यथारुचि साक्षात्क्रियमाणोऽपि यः सन्ततं परिपूर्णः तिष्ठति सः मुकुन्दः मह्यं नित्यं मोक्षप्रदानं वा परमानन्ददानं वा कुर्यात्।

श्लोकेऽस्मिन् 'मुकुन्दः' इति शब्दः ब्रह्मस्वरूपनिर्वाचकः। अत्र हि ग्रन्थकारेण श्लिष्टतया प्रदर्शितः सः। यत् ब्रह्मतत्त्वं केचन रामकृष्णादिमूर्तिविशेषेण साक्षात्कृतवन्तः तदेव तत्त्वं कतिचन योगिनः स्वयोगसामर्थ्येन स्वकीये हृदयाब्जे परिस्फुरितवन्तः। अर्थात् प्रकाशरूपेण निराकारत्वमनुभूतवन्तः ते। अस्यार्थः ब्रह्मणः साकारत्वं रामकृष्णमूर्तिरूपेण निराकारत्वं च प्रकाशरूपेण ग्रन्थकारः सूचयत्यत्र। तथैव चिरकालात् यस्य दर्शनं क्रियमाणमस्ति सः सर्वदा

परिपूर्ण एव तिष्ठतीति विशेषः। अत्र विरोधाभासालङ्कारः निर्दिष्टः । भगवद्भक्तिभावः श्लोकेऽस्मिन् ज्ञायते।

इत्थं मङ्गलकारकश्लोकत्रयं ग्रन्थकारस्य न केवलम् अर्थालङ्काररुचिं प्रकटीकरोति अपि तु काव्यसरसत्वं ग्रन्थसरसत्वञ्च विज्ञापयति। आदौ गौरीस्तुतिः, ततः शिवपार्वतीस्तवनं तदनन्तरं च ब्रह्मस्वरूपविवेचनमिति अस्य मङ्गलवैशिष्ट्यम् । अलङ्कारशास्त्रे इदृग्विवरणम् इतरग्रन्थेभ्यः अस्य पृथक्त्वं व्यञ्जयति।

**स्वावलोकनप्रश्नाः**

1. गौरीचरणपङ्कजं किं दूरीकरोति ?
2. कौ प्रपञ्चमातापितरौ ?
3. कः शाश्वतिकं श्रेयः दिशतु ?
4. ग्रन्थकारः कति मङ्गलश्लोकान् रचितवान्?
5. योगाभ्यासेन योगिनः कं साक्षात्कृतवन्तः ?

**उपसंहारः**

**'कुवलयानन्दः'** इत्यस्य विशेषग्रन्थस्य परिचयः भवत्विति धिया तत्रत्याः कतिचन अलङ्काराः पाठ्यांशे समावेशिताः। तेन हि अप्पदीक्षितस्य न केवलं प्रतिपादनशैली अवगम्यते अपि तु अलङ्कारज्ञानमपि लीलया सञ्जायते । अध्येतॄणां ज्ञानसौकर्याय अलङ्कारस्वरूपम् अवगत्य तेषां विभाजनम् सप्तखण्डेषु विहितम् । तत्र तत्र अवधेयांशाः स्फुटीकृतास्सन्तीति वैशिष्ट्यम्।इतःपरं पाठ्यक्रमे समाविष्टानाम् अलङ्काराणां विवरणं क्रियते।

---

# कुवलयानन्दः

## प्रथमखण्डः

**<u>संरचना</u>**

१.०. प्रस्तावना
१.१. लक्षिताधिगमविशेषाः
१.२. सादृश्यमूलकालङ्कारः
१.३. सादृश्यमूलकालङ्कारस्य प्रथमभेदः – भेदाभेदप्रधानः
१.३.१. अ) उपमा आ) लुप्तोपमा
१.३.२. अनन्वयः
१.३.३. उपमेयोपमा
१.४ उपसंहारः

### १.०. प्रस्तावना

काव्यानि अध्येतुं काव्यरसपानञ्च विधातुं काव्यालङ्कारणामपि ज्ञानमपेक्ष्यते इति सर्वविदितमेव । न हि काव्यालङ्काराणां सूक्ष्मचिन्तनेन विना काव्यसौन्दर्यानुभूतिः । तस्मादेव **'कुवलयानन्दः'** इति नामके ग्रन्थे अलङ्काराणां लक्षणमुदाहरणञ्च निरूप्य महाविदुषा अप्पय्यदीक्षितेन कश्चित् सरलमार्गः तदर्थं दर्शितः । अयं ग्रन्थोऽतीव लोकप्रियः अलङ्कारविषयकसामान्यज्ञानवर्धकश्च । अतः सम्पूर्णेऽपि भारतदेशे ग्रन्थस्यास्य अध्यनमध्यापनञ्च क्रियते।

**'शब्दचित्रस्य प्रायो निरसत्वात् नात्यन्तं तदाद्रियन्ते कवयः, न वा तत्र विचारणीयमतीव उपलभ्यत इति शब्दचित्रांशम् अपहाय अर्थचित्रमीमांसा प्रसन्नविस्तीर्णा प्रस्तूयते '** इति अप्पय्यदीक्षितस्य अभिप्रायः अस्माभिः **'चित्रमीमांसा'** इत्यास्मिन् ग्रन्थे उपलभ्यते। तथैव **'अर्थालङ्काररहिता विधवेव सरस्वती '** इत्यादिवचनैः अर्थालङ्कारप्राधान्यं व्यक्तं भवति । तेन ह्यत्र अर्थालङ्कारविवेचनमेव 'कुवलयानन्दः' इति ग्रन्थमनुसृत्य विधास्यते।

### १.१. लाक्षिताधिगमविशेषाः

- सादृश्यमूलक – अर्थालङ्काराणां ज्ञानं छात्रः प्राप्नोति।
- के भेदाभेदप्रधानाः अलङ्काराः इत्यवगच्छति।
- छात्रः अप्पय्यदीक्षितस्य प्रतिपादनशैलीमवगन्तुं प्रयतते।
- भेदाभेदप्रधानानाम् अलङ्काराणां लक्षणावबोधः भवति।

- काव्येषु अलङ्कारसमीक्षणं कर्तुं सामर्थ्यमाप्नोति।

**स्वानुशीलनप्रश्नाः**


1. कुवलयानन्दस्य कः आधारग्रन्थः ?
2. केषां सूक्ष्मचिन्तनेन विना काव्यसौन्दर्यानुभूति?
3. ग्रन्थेऽस्मिन् कः विषयः प्रतिपादितः ?
4. अर्थालङ्कारप्राधान्यं केन वाक्येन व्यक्तं भवति?
5. कः ग्रन्थः अतीव लोकप्रियः ?

**१.२. सादृश्यमूलकालङ्कारः**

काव्यशोभासंवर्धकाः अलङ्काराः विषयद्वयमवलब्य सन्तिष्ठन्ते । वर्ण्यविषयः अवर्ण्यविषयश्च । वर्ण्यविषयः (कामिनीमुखादि) 'उपमेयम्' इत्युच्यते । तथैव प्रस्तुतः, प्राकृतः, विषयः, प्राकरणिकः प्रासङ्गिकश्चेत्यादयः अपि पर्यायवाचकशब्दाः उपमेयस्य कृते उपयुज्यन्ते। अवर्ण्यविषयः (चन्द्रादि) 'उपमानम्' इति सम्बोध्यते। उपमानस्य कृते अपि अप्रस्तुतः, अप्रकृतः, विषयी, अप्राकरणिकः तथा च अप्रासङ्गिकः इत्यपि प्रयोगः।

एवमत्र उपमानोपमेययोः सम्बन्धमधिकृत्य विभिन्नाः अलङ्काराः सञ्जायन्ते । तदनुसारमेव अत्रापि अलङ्कारविभाजनं प्रदर्श्य तेषां ज्ञानाय सुकरमार्गः अवलम्बितः।

यत्र हि द्वयोः (उपमानोपमेययोः) सादृश्यं प्रधानत्वेन वर्तते तत्र सादृश्यमूलकालङ्कारः । सहृदयहृदये चमत्कारजनकत्वं अस्मात् सादृश्यादेव उत्पद्यते । इयं सादृश्यप्रतीतिः कीदृशी ? तदनुसृत्य सादृश्यगर्भालङ्काराः विभक्ताः। तद्यथा–





एतेषां सर्वेषां विवरणमस्माभिः क्रमशः क्रियते । अधुना अस्मिन् खण्डे सादृश्यगर्भालङ्कारस्य 'भेदाभेदप्रधानः' इति प्रकारः विविच्यते।

**१.३. सादृश्यमूलकालङ्कारस्य प्रभेदः - भेदाभेदप्रधानः**

सादृश्यगर्भालङ्कारस्य प्रथमभेदः 'भेदाभेदप्रधानः' इति । यत्र उपमानोपमेययोः मूलतः भेदः भूत्वा अपि समानधर्मं पुरस्कृत्य सादृश्यप्रदर्शनं क्रियते तत्र भेदाभेदप्रधानः

सादृश्यमूलकालङ्कारः । अर्थात् उपमानं तथा च उपमेयम् इत्यनयोः भेदं प्रदर्श्य साधर्म्येण द्वयोः ऐक्यनिर्वहणं वा सादृश्यनिर्वाहः तत्र भवति । भेदः अभेदश्च समानतया तत्र सन्दृश्यते । अस्यार्थः यत्किमपि तत्र सादृश्यं तद् भेदघटितमेव । तेन हि भेदाभेदप्रधानत्वमस्य वैशिष्ट्यम् । अत्र हि त्रयोऽलङ्काराः समाविष्टाः । ते यथा – उपमा, अनन्वयः, उपमेयोपमा चेति ।




अधुना एकैकस्य विवरणमत्र प्रदीयते ।

**इदमत्रावधेयम्**

उपमीयतेऽनेन इति उपमानम् । उपमातुं योग्यम् उपमेयम् । समानधर्मः सधर्मः, तस्य भावः साधर्म्यम् ।

**स्वावलोकनप्रश्नाः**

1. अभेदप्रधानालङ्कारस्य प्रकारद्वयं लिखत ?
2. सादृश्यमूलकालङ्काराः कतिविधाः ?
3. सादृश्यगर्भालङ्कारे केषां साम्यं वर्तते ?
4. भेदाभेदप्रधाने कति अलङ्काराः समाविष्टाः ?

### १.३.१. अ) उपमालङ्कारः

**उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः ।**
**हंसीव कृष्णा ! ते कीर्तिः स्वर्गङ्गामवगाहते ।।**

प्रस्तुतकारिकायाम् उपमालङ्कारस्य लक्षणमुदाहरणञ्च समुपवर्णितम् । यत्र द्वयोः (उपमानोपमेययोः) सादृश्यलक्ष्मीः (सादृश्यस्य शोभा) अथवा सादृश्येन चमत्कृतिजनकता स्पष्टतया प्रतीयते तत्र उपमालङ्कारः ।

यथा – हे कृष्ण! हंसी इव तव कीर्तिः स्वर्गङ्गावगाहनं करोति । अर्थात् , हंसी इव तव धवलकीर्तिः स्वर्गङ्गायां (आकाशगङ्गायाम्) स्नानं करोति ।

अस्मिन्नोदाहरणे उपमालङ्कारलक्षणसमन्वयः । अत्र कृष्णस्य कीर्तिः उपमेयम् । हंसी उपमानम् । इव इति सादृश्यवाचकशब्दः तथा च स्वर्गङ्गावगाहनमिति समानधर्मः वर्तते । अयं सादृश्यधर्मः सहृदयस्य हृदये चारुत्वमुत्पादयति । अतः एव अप्पय्यदीक्षितः उल्लिखति यत्

यत्रोपमानोपमेययोः सहृदयहृदयाह्लादतया चारुसादृश्यमुद्भूततया उल्लसति अर्थात् व्यङ्ग्यमर्यादां विना स्पष्टं प्रकाशते तत्रोपमालङ्कारः इति। अर्थात् व्यञ्जनावृत्तिं विना यत्र (काव्यात्मके वाक्ये) द्वयोः सादृश्यं वर्ण्यते तत्र उपमालङ्कारः। इयं सादृश्यप्रतीतिः सहृदयहृदयाह्लादप्रदायिनी भवेत्।

उपमालङ्कारस्य कृते उपमेयम्, उपमानं, साधारणधर्मः तथा च उपमावाचकशब्दः इत्येतानि चत्वारि तत्त्वानि आवश्यकानि यत्र इमानि चत्वारि अपि तत्त्वानि उपस्थितानि भवन्ति तत्र पूर्णोपमा अलङ्कारः । उपर्युक्ते उदाहरणे हंसी (उपमानम्), कीर्तिः (उपमेयम्), स्वर्गङ्गावगाहनम् (साधारणधर्मः) तथा च इव (उपमावाचकशब्दः) इत्येषां चतुर्णामप्युपादानात् पूर्णोपमा अलङ्कारः। यतो हि सादृश्यमेव उपमायाः लक्षणम्।

प्रायस्तु उपमानोपमेययोः साधारणधर्मः एकः भवति । परन्तु कदाचित् बिम्बप्रतिबिम्बभावकृतसाधारणधर्मनिर्देशस्थलेऽपि अलङ्कारोऽयं सञ्जायते। यथा वा –

गुणदोषौ बुधो गृह्णन्निन्दुक्ष्वेलाविवेश्वरः।
शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छति॥

**अन्वयः** – (परस्य) गुणदोषौ, गृह्णन् , बुधः, इन्दुक्ष्वेलौ, (गृह्णन्) ईश्वरः इव, पूर्वम्, शिरसा, श्लाघते, परम्, कण्ठे, नियच्छति।

यथा परमेश्वरः शिवः चन्द्रविषयोः ग्रहणं कृत्वा आद्यं शिरसि अपरञ्च कण्ठे स्थापयति तद्वत् बुधजनः (विद्वान् ) गुणदोषम्।

अर्थात् परमेश्वरः सकलजगदाह्लादात् इन्दुं मस्तके दधानः निखिलजगदुद्वेगाय प्रवृत्तस्य गरलस्य (विषस्य) कण्ठे स्थापनेन जगत् परिपालयति। तद्वत् बुधजनोऽपि परस्य गुणदोषं जानन् गुणान् प्रशंसति दोषञ्च नैव प्रकाशयति।

अत्र हि ईश्वरः उपमानं, विद्वान् उपमेयं वर्तते। परन्तु द्वयोः नैकस्साधारणधर्मः। यतो हि उपमाने ईश्वरे चन्द्रगरलयोः ग्रहणम् इत्युक्ते धारणम्। अपि च तयोर्मध्ये चन्द्रस्य शिरसा श्लाघनं नाम वहनम्, उत्तरस्य च गरलस्य कण्ठे नियमनम् इत्युक्ते संस्थापनमस्ति। अपरत्र उपमेये बुधजने गुणदोषयोर्ग्रहणं इत्युक्ते ज्ञानम्। तयोर्मध्ये पूर्वस्य गुणस्य शिरसा श्लाघनं नाम शिरःकम्पेन अभिनन्दनम्। उत्तरस्य दोषस्य च मुखात् अप्रकाशनमिति। तथापि चन्द्रगरलयोर्गुणदोषयोश्च बिम्बप्रतिबिम्बभावेन अभेदं प्रदर्शयितुम् उपादानज्ञानादीनाम् ऐक्यसम्पादनाय 'गृह्णन्' इत्येकः शब्दः प्रयुक्तः। तेन हि साधारणधर्मसादृश्यम् उद्भूतम्। यद्यपि उपमानोपमेययोः साधारणधर्मः पूर्णतः भिन्नः तथापि अर्थसादृश्यबलात् अभेदचिन्तनेन उपमा अलङ्कारः । अतः एव अप्पय्यदीक्षितेन समुपवर्णितं यत् वस्तुतः भिन्नयोः अपि उपमानोपमेयधर्मयोः परस्परसादृश्यात्

अभिन्नयोः पृथगुपादानं बिम्बप्रतिबिम्बभाव इत्यालङ्कारिकसमयः इति । परन्तु यत्र साधारणधर्मलोपः तत्र नैव उपमा।

**अवधेयांशः**

1. उपमा अलङ्कारस्य चत्वारि तत्त्वानि →
   - उपमेयम्
   - उपमानम्
   - साधारणधर्मः
   - उपमावाचकशब्दः

2. बिम्बप्रतिबिम्बभावः - यत्र एकस्य प्रतिबिम्बमन्यस्मिन् दृश्यते तत्र बिम्बप्रतिबिम्बभावः । यथा उपर्युक्ते उदाहरणे शिवस्य प्रतिबिम्बं बुधे सन्दृश्यते । तस्मादेव चन्द्रगुणयोः विषदोषयोश्च बिम्बप्रतिबिम्बभावेन अभेदचिन्तनम् ।

3. उपमालङ्कारः
   - पूर्णोपमा
   - लुप्तोपमा

**स्वावलोकनप्रश्नाः**

1. उपमायाः किं लक्षणम् ?
2. उपमालङ्कारस्य कानि चत्वारि तत्त्वानि ?
3. परमेश्वरःमस्तके किं दधाति ?
4. कस्य कीर्तिः स्वर्गङ्गामवगाहते ?
5. उपमानोपमेययोः भिन्नसाधारणधर्मे कस्मात् उपमाग्रहणं क्रियते ?

### १.३.१. ब) लुप्तोपमालङ्कारः

उपमालङ्कारस्य पूर्णोपमा लुप्तोपमा चेति प्रकारद्वयम् । तत्र हि पूर्णोपमायाः विवरणमस्माभिः पूर्वमेव अवगतम्। अधुना लुप्तोपमायाः विवेचनं क्रियते।

**वर्ण्योपमानधर्माणामुपमावाचकस्य च ।**
**एक – द्वि – त्र्यनुपादानाद्भिन्ना लुप्तोपमाष्टधा ।।**

उपमेयादीनां चतुर्णां मध्ये एकस्य द्वयोस्त्र्याणां वा अनुपादानात् (प्रतिपादकशब्दाभावे) लुप्तोपमेत्युच्यते । अत्र उपमेयादीनाम् इत्यनेन उपमानसाधारणधर्मोपमावाचकाः ग्राह्याः । एतेषु एकस्य द्वयोस्त्रयाणां वा प्रयोगाभावे लुप्तोपमा स्वीक्रियते।

सा चाष्टधा –

लुप्तोपमा →

1. वाचकलुप्ता
2. धर्मलुप्ता
3. धर्मवाचकलुप्ता
4. वाचकोपमेयलुप्ता

} उपमानलोपरहिताः चत्वारः भेदाः

5. उपमानलुप्ता
6. वाचकोपमानलुप्ता
7. धर्मोपमानलुप्ता
8. धर्मोपमानवाचकलुप्ता

} उपमानलोपसहिताः चत्वारः भेदाः

अत्र उपमानलोपरहिताः आद्याः चत्वारो भेदाः । तेषामन्येषाञ्च इमानि उदाहरणानि इत्थम् -

**तडिद्गौरीन्दुतुल्यास्या कर्पूरन्ती दृशोर्मम ।**
**कान्त्या स्मरवधूयन्ती दृष्टा तन्वी रहो मया ॥**

**यत्तया मेलनन्तत्र लाभो मे यश्च तद्रतेः ।**
**तदेतत्काकतालीयमवितर्कितसम्भवम् ॥**

श्लोकेऽस्मिन् - 1. तडिद्गौरी 2. इन्दुतुल्यास्या 3. कर्पूरन्ती दृशोर्मम 4. कान्त्या स्मरवधूयन्ती इत्यत्र क्रमशः वाचकशब्दलुप्ता, साधारणधर्मलुप्ता, धर्मवाचकोभयलुप्ता तथा च वाचक – उपमेय – उभयलुप्ता इत्येते चत्वारः लुप्तोपमालङ्कारस्य भेदाः निर्दिष्टाः । तथैव 'तदेतत्काकतालीयमवितर्कितसम्भवम्' इत्यत्र उपमानलुप्ता, वाचक – उपमान – उभयलुप्ता, धर्मोपमान – उभयलुप्ता धर्मोपमान – वाचक – त्रितयलुप्ता चेत्येते भेदाः प्रदर्शिताः । सम्प्रति एकैकस्य वर्णनं क्रियते । उपर्युक्तोदाहरणमपि स्पष्टीक्रियते ।

**१. वाचकलुप्ता –**

यत्र उपमावाचकशब्दस्य लोपः दृश्यते तत्र 'वाचकलुप्ता' सम्भवति । अर्थात् उपमालङ्कारस्य त्रीणि तत्त्वानि उपस्थितानि भवन्ति तत्र । 'तडिद्गौरी' इत्यत्र 'तडिद् इव गौरी' इत्यर्थः । 'उपमानानि सामान्यवचनैः' इति समासविधायकसूत्रेण उपमानवाचकसुबन्तस्य तडित्+सु इत्यस्य गौरी+सु इति साधारणधर्मवाचकसुबन्तेन सह समासः इत्यतः सादृश्यार्थप्रतीतिः। तेन हि 'इव' इति उपमाप्रतिपादकशब्दस्य अप्रयोगात् लोपः । अत्र हि 'तडित्' उपमानं, गौरीत्वेति सामान्यधर्मः तथा च 'तन्वी' उपमेयमस्ति । किन्तु उपमावाचकस्य (इव) लोप इत्यस्मात् 'वाचकलुप्ता' । 'तडिदिव गौरवर्णीया नायिका' इत्यर्थः ।

**२. धर्मलुप्ता –**

यत्र साधारणधर्मं विहाय अन्यानि त्रीणि तत्त्वानि उपलभ्यन्ते तत्र 'धर्मलुप्ता' उपमा मन्तव्या। यथा 'इन्दुतुल्यास्या' इत्यत्र इन्दोः उपमानस्य, आस्यरूपस्य उपमेयस्य, तुल्यात्मकस्य सादृश्यविशिष्टबोधकस्य च उपस्थितिः । किन्तु 'सुन्दरत्वम्' इति साधारणधर्मस्य लोपः इत्यस्मात् धर्मलुप्ता उपमा । अयं लोपस्तु ऐच्छिकः न शास्त्रकृतः इत्यवगन्तव्यम् । ' चन्द्रसदृशं नायिकायाः मुखम् ' इत्यर्थः ।

**३. धर्मवाचकलुप्ता –**

यत्र साधारणधर्मः तथा च उपमाप्रतिपादकशब्दः इत्यनयोः अदर्शनं तत्र धर्मवाचकलुप्ता उपमेति ज्ञातव्यम् । 'कर्पूरन्ती दृशोर्मम' (कर्पूरमिव मम नेत्रयोः कृते शीतलताप्रदायिनी) इत्यस्मिन् उदाहरणे 'कर्पूरम्' उपमानं तथा च 'नायिका' उपमेयमिति तत्त्वद्वयमेव । आनन्दजनकत्वादिसाधारणधर्मः इवादि – उपमावाचकशब्दश्च नैव दृश्यते अत्र कर्पूरमिव आचरन्तीत्यर्थे विहितं कर्पूरवत् आनन्दनात्मकाचारार्थं द्योतयितुं 'क्विप्' प्रत्यययोजनेन 'इव' शब्दलोपोऽपि सञ्जातः । ततः 'धर्मवाचकलुप्ता' इति उपमालङ्कारः अभवत् । नयनयोः आनन्दकरतया कर्पूरन्तीति प्रयोगोऽपि सम्भवति। परन्तु कविना तथा नैव कृतम्।

**४. वाचकोपमेयलुप्ता –**

यत्र उपमासूचकशब्दः तथा च उपमेयमित्यनयोः लोपः तत्र वाचकोपमेयलुप्ता उपमेति बोधः प्राप्तव्यः । यथा - 'कान्त्या स्मरवधूयन्ती' इत्यत्र वाचकोपमेयलोपः । अत्र कान्त्येति विशेषणसामर्थ्यात् (साधारणधर्मात्) स्वात्मानं कामवधूमिवाचरन्तीति अर्थं प्रकटीकर्तुम् आत्मारूप – उपमेयस्य तथा च उपमादर्शकशब्दस्य अप्रयोगः वर्तते । वस्तुतः कविः 'स्वात्मानं स्मरवधूयन्ती' इति प्रयोगं कर्तुं शक्नोति स्म ।किन्तु कवेः इच्छा तत्र । तेन ह्यत्र वाचकोपमेयलुप्ता उपमा ।

**स्वावलोकनप्रश्नाः**

1. लुप्तोपमा कतिविधा ?
2. उपमानलोपरहित – लुप्तोपमायाः नामानि लिखत ?
3. 'तडिद्गौरी' इत्यत्र का उपमा ?
4. साधारणधर्मं विहाय उपमायाः त्रीणि तत्त्वानि कुत्र उपलभ्यन्ते ?
5. 'कान्त्या स्मरवधूयन्ती ' इत्यत्र कोऽर्थः ?

इतःपूर्वमस्माभिः उपमानलोपरहिताः लुप्तोपमायाः चत्वारः भेदाः अवगताः । इदानीन्तु उपमानलोपसहिताः भेदाः सविस्तरं स्पष्टीक्रियन्ते।

**१. उपमानलुप्ता –**

उपमानेन विना अन्यानि त्रीणि उपमालङ्कारस्य तत्त्वानि यत्रोपलभ्यन्ते तत्र उपमानलुप्ता सम्भवति । यथा –'तदेत्काकतालीयमवितर्कितसम्भवम्' इत्यत्र 'काकतालीयम्' इत्यस्मिन् समासेन 'काकतालम् इव काकतालीयम्' इत्यर्थः। अत्र 'समासाच्च तद्विषयात्' इति सूत्रेण 'इवे प्रतिकृतौ' इत्यनेन अधिकारसूत्रेण छप्रत्ययः सञ्जायते । तथा च 'काकताल+छ' इत्यतः 'काकतालीयम्' पदस्यार्थः 'पतनदलितं तालफलं यथा काकेन उपभुक्तं (खादितम् ) तथा रहसि स्थिता क्षुभितहृदया तन्वी स्वेन उपभुक्ता इति । अत्र काकागमन – तालपतनसमागमरूपस्य काककृततालफलोपभोगरूपस्य च उपमानस्य प्रयोगः नास्ति। यतो हि 'छ'प्रत्ययार्थोपमायाम् उपमानलोपः । ततः उपमानलुप्ता लुप्तोपमा अभवत् ।

**२. वाचकोपमानलुप्ता –**

वाचकशब्दः तथा च उपमानम् इत्यनयोः द्वयोः अदर्शनं यत्र भवति तत्र वाचकोपमानलुप्ता इति अधिगन्तव्यम् । उपर्युक्तमेव उदाहरणमत्रापि स्वीक्रियते ।'काकतालियम्' इत्यत्र 'काकतालः' इति शब्दद्वयं समासवृत्तिविषयेण समवेतक्रियावर्ती । अर्थात् काकतालशब्दौ समवायक्रियाबोधकौ तेन हि 'काकागमनमिव तालपतनमिव' काकतालमितीवार्थे 'समासाच्च तद्विषयात्' इत्यनेन सूत्रेण ज्ञापकबलात् समासः । उभयत्रापि उपमेयं विद्यते स्वस्य क्वचिद् गमनं तत्रैव रहसि तन्व्या अवस्थानं (उपस्थितिः) च । तेन स्वस्य तस्याश्च समागमः काकतालसमागमसदृश इति फलति। अतः समासार्थोपमायां वाचकोपमानलोपः भवति ।

**३. धर्मोपमानलुप्ता –**

सादृश्यधर्मः तथा च उपमानमित्यनयोः लोपदर्शनं धर्मोपमानलुप्ता इति । अस्यापि उदाहरणं 'तदेतत्काकतालीयम्' इत्येव । यतो हि अत्र 'अवितर्कितसम्भवम्' इति साधारणधर्मलोपः । ततः 'छ' प्रत्ययार्थोपमायां धर्मोपमानलोपः ।

**४. धर्मोपमानवाचकलुप्ता –**

पूर्वोक्ता समासार्थोपमा विचिन्त्य 'तदेतत्काकतालीयम्' इत्यत्र वाचकोपमानयोः लोपस्तु अस्त्येव । पुनश्च 'अवितर्कितसम्भवम्' इत्यस्य अप्रयोगेण साधारणधर्मलोपोऽपि जायते । एवमत्र धर्मोपमानवाचकलुप्ता दर्शयितुं शक्या ।

इत्थं लुप्तोपमालङ्कारस्य उदाहरणरूपेण प्रतिपादितेऽस्मिन् श्लोके सर्वभेदानाम् अन्तर्भावं प्रदर्श्य अप्पय्यदीक्षितेन स्वकीयः शैलीविशेषः अस्मत्पुरतः उपस्थापितः । उपर्युक्तश्लोकस्य सरलार्थः एवमस्ति –

तडिदिव गौरवर्णीया, चन्द्रसदृशी आह्लाददायकमुखयुक्ता, मम नयनयोः कृते कर्पूरमिव शीतलताप्रदायिनी च सुन्दरी मया रहसि अवलोकिता । या स्वकान्त्या कामदेवस्य पत्नीव आचरन्ती आसीत् । तस्मिन् निर्जनस्थाने तया सह मेलनं तस्याश्च रतिदानप्राप्तिः मत्कृते काकतालीयमिव आसीत् ।

अर्थात् यथा काकः कस्मिंञ्चित् तालफले उपविशति तदैव अकस्मात् तत्फलं भूमौ पतति। काकश्च तस्य उपभोगं करोति । अत्र काकस्य आगमनं तालफलस्य च पतनम् अकस्मात् सञ्जातम् । तद्वत् रहसि सुन्दर्याः अवलोकनं तस्याः समागमः च अकस्मात् अभवत् ।अत्र नायक – नायिकासमागमरूपोपमेयस्य उपमानमस्ति काकतालफलम् । काकेन पतितफलस्य उपभोगकरणं नायिकोपभोगरूपोपमेयस्य उपमानं भवति ।

**इदमत्रावधेयम्**

लुप्तोपमायाः उदाहरणस्य 'तदेतत्काकतालीयम्' इत्यस्मिन्नैव वाक्ये उपमानलोपसहितान् चतुरोऽपि भेदान् न्यरूपयत अप्पय्यदीक्षितः । 'काकतालीयम्' इत्ययं सामासिकशब्दः । व्याकरणकारेण पाणिनिना 'इवे प्रतिकृतौ' इति अधिकारसूत्रे एव 'समासाच्च तद्विषयात्' इति सूत्रं विनिर्मितम् । सूत्रस्यास्य अर्थः यत् इवार्थविषयकसमासात् 'छ'प्रत्ययः स्यादिति। 'छ' प्रत्ययोऽयम् इवार्थे एव तस्मात् तत्र सादृश्यद्वयं प्रतीयते । प्रथमं सादृश्यं समासेन द्वितीयञ्च 'छ' प्रत्ययेन ।

'काकतालम्' इत्यस्मिन् समासे 'काकः तथा तालः' न केवलं स्वार्थं प्रतिपादयति अपि तु स्वसमवेतक्रियामपि सम्पादयति । यतो हि इवार्थविषयकसामासिकपदेनैव सादृश्यवाचकं 'छ' प्रत्ययविधानं सूच्यते । तेन हि 'काकागमनमिव तालपतनमिव' इति बोधः । उपमानद्वयमित्यतः उपमेयद्वयमेव । प्रथमं नायकस्य क्वचिद् गमनं द्वितीयञ्च रहसि तन्व्याः मेलमिति । यथा काकागमनं तालफलपतनञ्च तथा नायकस्य गमनं नायिकायाः समागमश्च । ततः काकतालसमागमसदृशः स्वस्य तस्याश्च समागमः इत्यर्थः 'काकतालम्' इत्यस्मात् समासात् प्रकटीभवति । द्वितीयं सादृश्यं नाम यथा काकेन तालफलोपभोगः कृतः तथा नायकेन नायिकायाः उपभोगः स्वीकृतः इति प्रतिपादयितुं 'छ' प्रत्ययः । तेन हि 'छ' प्रत्ययात् उपमेयशब्दस्य प्रतीतिः।

**स्वावलोकनप्रश्नाः**

1. उपमानलुप्तायां कानि त्रीणि तत्त्वानि उपलभ्यन्ते ?
2. उपमानलोपसहिताः कति भेदा ?
3. 'छ' प्रत्ययः कस्मिन् पदे अवलोक्यते ?
4. धर्मोपमानवाचकलुप्तायाः किम् उदाहरणम् ?
5. सादृश्यधर्मः तथा च उपमानम् इत्यनयोः लोपः कुत्र दृश्यते ?

### १.३.२. अनन्वयालङ्कारः

**उपमानोपमेयत्वं यदेकस्यैव वस्तुनः ।**
**इन्दुरिन्दुरिव श्रीमानित्यादौ तदनन्वयः ॥**

प्रस्तुतश्लोकेऽनन्वयालङ्कारस्य लक्षणमुदाहरणञ्च उपनिबद्धमस्ति । एकस्यैव वस्तुनः उपमानोपमेयत्ववर्णनम् 'अनन्वयः' इति । वर्ण्यमानमपि स्वस्य स्वेन साधर्म्यं नान्वेतीति व्युत्पत्तिः। अतः एव 'न अन्वेति इति अनन्वयः' । अपि च अनन्वितसादृश्यम् अनन्वयालङ्कारः । सामान्यतः सादृश्यं भेदनियन्त्रितं भवति । यतो हि 'तद्भिन्नत्वे सति तद्गतभूयो धर्मवत्त्वं सादृश्यम्' । तेन हि वस्तुनोः भेदः सादृश्यप्रयोजकः । किन्तु एकस्मिन्नैव वस्तूनि सादृश्यम् अनन्वितम् असम्बद्धं वा भवतीति अनन्वयालङ्कारः । किमेवं वर्ण्यमानस्य अनन्वितसादृश्यस्य फलम् ? इत्युक्ते द्वितीयसदृशवस्तुव्यवच्छेद एव इति ।

यद्यपि किमपि वर्ण्यमानं वस्तु स्वस्य उपमानं भवितुं नैव अर्हति तथापि कविः तस्य वस्तुनः अनुपमेयत्वं द्योतयितुं तादृशं वर्णनं करोति । 'इन्दुरिन्दुरिव श्रीमान् ' इत्यत्र अयमेव भावः । चन्द्रः चन्द्रः इव शोभासम्पन्नोऽस्ति इत्यत्र चन्द्रसदृशः नान्योऽस्ति इति आशयः । ततः यदुपमानं तदेव उपमेयमिति वैशिष्ट्यमत्र ।

**गगनं गगनाकारं सागरस्सागरोपमः ।**
**रामरावणयोर्युद्धं रामरावणयोरिव ॥**

अस्मिन्नपि उदाहरणे गगनस्य वैपुल्यं, सागरस्य गाम्भीर्यं तथा च रामरावणयोः युद्धस्य भयङ्करत्वम् अनुपमेयमिति संसूच्यते ।

अत्र अवधेयं यत् पूर्वोदाहरणे श्रीमत्त्वस्य साधारणधर्मस्य स्पष्टतया ग्रहणं दृश्यते । परन्तु अपरेऽस्मिन् उदाहरणे गगनादिषु वैपुल्यादेः साधारणधर्मस्य उपादानं नास्ति तथापि अनन्वयः एव ।

**स्वावलोकनप्रश्नाः**

1. अनन्वयालङ्कारस्य लक्षणं लिखत।
2. 'इन्दुरिन्दुरिव श्रीमान्' इत्यत्र कोऽलङ्कारः ?
3. अनन्वितसादृश्यस्य किं फलम् ?

### १.३.३. उपमेयोपमा

**पर्यायेण द्वयोस्तच्चेदुपमेयोपमा मता।**
**धर्मोऽर्थ इव पूर्णश्रीरर्थो धर्म इव त्वयि ॥**

उपमेयोपमालक्षणप्रतिपादकोऽयं श्लोकः। यत्र द्वयोः पर्यायेण (प्रकारान्तरेण) वाक्यभेदेन वा उपमानोपमेयत्वं वर्ण्यते तत्र उपमेयोपमा अलङ्कारः बोध्यः।

अत्र हि तृतीयसदृशव्यवच्छेदार्थं द्वयोः वस्तुनोः उपमानोपमेयत्वकल्पनं वाक्यभेदेन विवक्ष्यते। यथा – ( हे राजन् !) त्वयि धर्मः, अर्थः इव पूर्णसमृद्धः तथा च अर्थः, धर्म इव पूर्णसमृद्धः विद्यते।

प्रस्तुते उदाहरणे प्रथमांशे धर्मः उपमेयः अर्थश्च उपमानोऽस्ति। 'इव' उपमाप्रतिपादकशब्दः तथा च 'पूर्णश्रीः' साधारणधर्मः। द्वितीयांशे अर्थः उपमेयत्वेन धर्मश्च उपमानत्वेन परिलक्ष्यते। एवं धर्मार्थयोः द्वयोः वाक्यभेदेन उपमानत्वमुपमेयत्वं च वर्णितमित्यतः लक्षणसमन्वयेन उपमेयोपमा अलङ्कारः।

वस्तुतस्तु कस्यचित् केनचित् सादृश्ये वर्णिते तस्यापि अन्येन सादृश्यं स्वयमेव अर्थसिद्धम्। किञ्च साक्षात् कथनेन तृतीयसदृशवस्तुनः व्यवच्छेदकं (निवारणम्) फलति। यथा वा –

**खमिव जलं जलमिव खं हंसश्चन्द्र इव हंस इव चन्द्रः।**
**कुमुदाकारास्ताराः ताराकाराणि कुमुदानि ॥**

(शरदृतौ) आकाश इव जलं, जलमिव आकाशः (निर्मलः), हंसः चन्द्र इव (धवलः) चन्द्रः हंसः इव, कुमुदानि तारकाः इव, तथा च तारकाराणि कुमुदानि इव सौन्दर्यपूर्णानि सन्ति।

अत्र हि जल-आकाशः, जन्द्र-हंसः, तारकागण-कुमुदानि इत्येतेषु विपर्यासेन उपमानोपमेयत्वं प्रदर्शितम्।

पूर्वतन्नोदाहरणे 'पूर्णश्रीः' इति साधारणधर्मस्य उपादानं (ग्रहणम्) दृश्यते। किन्तु द्वितीये निर्मलत्वं, धवलत्वं, मनोहारित्वं च इत्येषां सदृशधर्माणां उपादानत्वं नास्ति। उदाहरणद्वयेऽपि

प्रकृतयोरेव उपमानोपमेयत्वकल्पनमस्ति । प्रथमे राज्ञि धर्मार्थसमृद्धेः द्वितीये च शरदि गगनसलिलादिनैर्मल्यस्य च वर्णनम् । किन्तु प्रकृताप्रकृतयोरपि एषः अलङ्कारः सम्भवतीति ज्ञापयितुं उदाहणमिदं प्रस्तूयते ।

**गिरिरिव गजराजोऽयं गजराज इवोच्चकैर्विभाति गिरिः ।**
**निर्झर इव मदधारा मदधारेवास्य निर्झरः स्रवति ॥**

अयं गजराजः पर्वत इव शोभते । अपि च पर्वतः गजराजः इव उन्नतः विभाति। अस्य गजस्य मदधाराः निर्झर इव स्रवन्ति। तथा च निर्झराः मदधाराः इव प्रवहन्ति ।

अत्र गजः 'अयम्' इति सर्वनाम्ना निर्दिष्टः तस्मात् प्रकृतः (वर्णनीयः) । तथैव गिरिः अप्रकृतः (उपमानम्) इति प्रथमांशे। द्वितीयांशे तु निर्झरः अप्रकृतः मदधाराश्च प्रकृतः इति समुपवर्ण्य प्रकृताप्रकृतयोः साम्यं कथितम् । पूर्वार्धे उच्चकैस्त्वं तिष्ठति समानधर्मः । उत्तरार्धे तु स्रवतीति साधारणधर्मत्वं प्राप्नोति ।

**इदमवधेयम्** –

उपमेयोपमा द्वैविध्यं प्राप्नोति ।

उपमेयोपमा –
- केवलं प्रकृतयोरेव उपमानोपमेयकल्पनम्।
- प्रकृताप्रकृतयोः उपमानोपमेयकल्पनम्।

**स्वावलोकनप्रश्नाः**

1. उपमेयोपमालङ्कारः कुत्र भवति ?
2. सादृश्यं स्वयमेव कदा सिध्यति?
3. 'खमिव जलं जलमिव खम्' इति उदाहरणं कस्य अलङ्कारस्य?

**१.२. उपसंहारः**

खण्डेऽस्मिन् अस्माभिः सादृश्यमूलकालङ्कारस्य 'भेदाभेदप्रधानः' इति प्रथमभेदविषये सविस्तरं ज्ञातम्। तस्मिन् अन्तर्भूताः त्रयः अलङ्काराः तेषां लक्षणानि च सोदाहरणं विवेचितानि। द्वितीयखण्डे सादृश्यमूलकालङ्कारस्य द्वितीयभेदः उपवर्ण्यते।

------------------------------------

# कुवलयानन्दः

## द्वितीयखण्डः

**संरचना**


२.०. प्रस्तावना

२.१. लक्षिताधिगमविशेषाः

२.२. सादृश्यमूलकालङ्कारस्य द्वितीयभेदः – अभेदप्रधानः

२.३. अभेदप्रधानस्य उपभेदाः

२.३.१. आरोपमूलकः

२.३.१.१. रूपकः

अ) रूपकभेदाः

२.३.१.२. परिणामः

२.३.१.३. स्मृति – भ्रान्ति – ससन्देहः

२.३.१.४. उल्लेखः

२.३.१.५. अपह्नुतिः

अ) अपह्नुत्यलङ्कारस्य भेदाः

२.३.२. अध्यवसायमूलकः

२.३.२.१. उत्प्रेक्षा

अ) उत्प्रेक्षालङ्कारस्य उपभेदाः

२.३.२.२. अतिशयोक्तिः

२.४. उपसंहारः


### २.०. प्रस्तावना

प्रथमे खण्डे अस्माभिः सादृश्यगर्भालङ्कारस्य विषये बोधितम् । तस्य प्रकारत्रयमपि संसूचितं तत्र । तेषु एकतमप्रकारस्य भेदाभेदप्रधानस्य विषये विस्तृतं व्यपदिष्टं च। सम्प्रतिअस्मिन् खण्डे सादृश्यमूलकालङ्कारस्य द्वितीयभेदस्य विषये विवेचनं क्रियते । तथैव तत्र समाविष्टानाम् अलङ्काराणां विषयेऽपि प्रतिपाद्यते ।

### २.१. लक्षिताधिगमविशेषाः

भवान् / भवती अधोनिर्दिष्टान् विषयान् अधिगन्तुं शक्नोति ।

- सादृश्यगर्भालङ्कारस्य द्वितीयभेदः अवगम्यते ।
- द्वितीयभेदस्य उपभेदज्ञानं भवति ।
- उपभेदेषु अन्तर्भूतालङ्काराणां स्वरूपं लक्षणञ्च जानाति ।
- अन्यत्र एतेषामलङ्काराणां लक्षणसमन्वयं कर्तुं प्रभवति ।


- स्वकीयवाक्येषु तेषां प्रयोगं विधातुं प्रयत्नं करोति ।

## २.२. सादृश्यमूलकालङ्कारस्य द्वितीयभेदः – अभेदप्रधानः

'अभेदप्रधानः' इति सादृश्यमूलकालङ्कारस्य द्वितीयभेदोऽस्ति । प्रथमे खण्डे उल्लिखिते भेदाभेदप्रधाने उपमेयं तथा च उपमानम् इत्यनयोः साधारणधर्ममधिकृत्य प्रदर्शिते सादृश्ये भेदः अभेदश्च समकाले एव अवगम्यते स्म। किन्त्वत्र तयोः द्वयोः नाम उपमानोपमेययोः सादृश्ये केवलम् अभेदः एव सन्दृश्यते । अर्थात् विषयस्य (उपमेयस्य) विषयिणः (उपमानस्य ) च सादृश्यं न भिन्नत्वज्ञापकमपि तु अभेदत्वजनकम् । यथा 'पूर्णेन्दुवदनम्' इत्यत्र इन्दुमुखयोः भेदराहित्यं वर्णितम् । इत्थम् अभेदप्रधानत्वमिति अत्र वैशिष्ट्यम् ।

## २.३. अभेदप्रधानस्य उपभेदाः

अभेदप्रधानसादृश्यगर्भालङ्कारस्य उपभेदद्वयं वर्तते । तद्यथा आरोपमूलकः अध्यवसायमूलकश्चेति ।




अभेदप्रधानस्य आरोपमूलके रूपकः , परिणामः, स्मृति – भ्रान्ति – ससन्देहः, उल्लेखः अपह्नुतिश्चेत्यादयः अलङ्काराः वर्तन्ते । तथैव द्वितीये अध्यवसायमूलके उत्प्रेक्षा अतिशयोक्तिश्चेति अलङ्कारद्वयम् अन्तर्भवति । अधुना एकैकस्य उपभेदस्य तथा च उपभेदेषु अन्तर्गतालङ्कारस्य सविस्तरं विवरणं क्रियते ।

### २.३.१. आरोपमूलकः

विषयविषयिणोः आभिहितयोः अभेदप्रतिपत्तिः आरोपः इति । अर्थात् उपमानोपमेययोः स्वस्ववाचकशब्दोपात्तयोः अभेदनिश्चयः 'आरोपः' इति सम्बोध्यते । अभेदप्रधाने सादृश्ये यत्र आरोपः मूलत्वेन विद्यते तत्र 'आरोपमूलकः' अभेदप्रधानः अलङ्कारः । अत्र हि विषयविषयिणोः मध्ये आरोप्यारोपकभावः भवति। यथा पूर्णेन्दुवदनमिति रूपके, इन्दुमवलोक्य तन्वीमुखं स्मरामीति स्मृतिमाने, इन्दुर्मुखं वेति ससन्देहे, इन्दुधिया मुखमनुधावति चकोर इति भ्रान्तिमाने, दृगम्बुजेन वीक्षते इति परिणामे, कमलमिति मधुपैः इन्दुरिति चकोरैः कामिनीवदनमिति कामुकैः गृह्यते इत्युल्लेखे, नेदं मुखं किन्तु कोकनदमित्यपह्नुतौ च समानविभक्त्युद्भासितस्य सुन्दरसाधारणधर्मोल्लासितस्य आहार्यस्य अनाहार्यस्य वा अभेदनिश्चयस्य सद्भावात् तेषाम् अलङ्कारणाम् आरोपमूलकाभेदप्रधानत्वंव्यवस्थितम् । तत्रादौ रूपकं निरूप्यते ।

**स्वावलोकनप्रश्नाः**

1. अभेदप्रधानस्य कति उपभेदाः?
2. आरोपमूलके कति अलङ्काराः अन्तर्भवन्ति? के च ते?
3. 'पूर्णेन्दुवदनम्' इत्यत्र कयोः भेदराहित्यम्?
4. आरोप्यारोपभावः कस्मिन् उपभेदे सम्भवति?

**२.३.१.१. रूपकालङ्कारः**

**विषय्यभेदताद्रूप्यरञ्जनं विषयस्य यत्।**
**रूपकं तत् त्रिधाधिक्यन्यूनत्वानुभयोक्तिभिः ।।**

प्रस्तुतकारिकायां रूपकालङ्कारस्य लक्षणं प्रकाराश्च कथितास्सन्ति ।

यत्र विषयविषयिणोः (उपमानोपमेययोः) अभेदकथनं ताद्रूप्यरञ्जनं (ताद्रूप्यवर्णनम्) वर्तते तत्र रूपकालङ्कारः । विषयिणः रूपेण विषयस्य रञ्जनं रूपकमिति । लक्षणेऽस्मिन् विशेषद्वयम् अस्ति ।

१. उपमेयोपमानयोः अभेदसंस्थापनम्।

२. अभेदसम्बन्धात् उपमानोपमेययोः ताद्रूप्यवर्णनम् इति ।

परमार्थतः उपमेयोपमानयोः भेदे सति अभेददर्शनमित्येव । यथा श्वेतभित्तौ रक्तवर्णलेपनं क्रियते चेत् सा रक्ता प्रतिभाति । तत्र श्वेतरक्तवर्णयोः अभेदः सञ्जायते । तस्मात् वयं रक्तभित्तिः इत्येव व्यपदेशं कुर्मः । तथैव अत्रापि उपमेयम् उपमानमेव कथ्यते ।

रूपकशब्दस्य व्युत्पत्तिम् एवं प्रदर्शयति यत् ' रूप्यते इतरव्यावृत्ततया ज्ञाप्यते धर्मी (विषयः) अनेन इति रूपकम् ' इति । अतः स्वोपरक्तबुद्धिविषयीकरणमिति स्पष्टम् । यत्र न विषयविषयिणोः भेदप्रत्ययः तत्र रूपकसिद्धिः । साधारणधर्मविशिष्टोपमानस्य यत्रारोपः नाम अन्यरूपेण विषयस्य रूपवत्त्वं रूपकालङ्कारे अधिगम्यते । यथा –

१. अयं हि धूर्जटिस्साक्षाद्येन दग्धाः पुरः क्षणात् ।


२.अस्या मुखेन्दुना लब्धे नेत्रानन्दे किमिन्दुना ?

प्रस्तुते प्रथमे वाक्ये राजा = विषयः, धूर्जटिः = विषयी । तयोः 'अयं धूर्जटिः' इति समानाधिकरणशब्दाभ्याम् (समानविभक्त्यन्तशब्दाभ्याम्) अभेदः प्रतिपादितः । वस्तुतः राज्ञः धूर्जटेश्च भेद एवास्ति। किन्तु अभेदात् धूर्जटेः आरोपणं राज्ञि (आरोप्ये) कृतं वर्तते । अपि च 'अयं (राजा) साक्षात् धूर्जटिः (शिवः) येन क्षणात् पुरं (शत्रुपुरं, त्रिपुरम्) दग्धम्' इत्यर्थः ज्ञायते ।

द्वितीये उदाहरणे तु 'अस्या मुखेन्दुना नेत्रानन्दे लब्धे किमिन्दुना' इति उपवर्ण्य मुखेन्दुः प्रसिद्धेन्दुश्च द्वयोर्मध्ये तद्रूपत्वं प्रदर्श्य अभेदत्वं निर्दिष्टमस्ति । अपि च प्रसिद्धेन्दोः अभावेऽपि नेत्रानन्दप्राप्तिः इति साधर्म्यम् उल्लसितम् ।

**२.३.१.१. अ) रूपकभेदाः**

रूपकालङ्कारे कदाचित् अभेदरूपकत्वं क्वचित्तु तद्रूपकत्वंश्लोकेषु उपनिबद्धं भवति। ततश्च रूपकं द्विविधम् – अभेदरूपकं ताद्रूप्यरूपकञ्चेति । उपमानस्य प्रमाणमधिकृत्य अपि भेदाः दृश्यन्ते तत्र । उपमानस्य आधिक्यम्, उपमानस्य न्यूनत्वं तथा च उपमानस्य अनुभयरूपत्वमिति रूपकभेदेषु हेतवः भवन्ति । तेन हि पुनश्च द्विविधमपि प्रत्येकं त्रिविधमिति रूपकं षड्विधम् । एतेषामुल्लेखः लक्षणकारिकायां स्पष्टतया ज्ञायते । एते षड्प्रकाराः अधोनिर्दिश्यन्ते ।




**स्वावलोकनप्रश्नाः**

1. रूपकालङ्कारस्य लक्षणं किम्?
2. रूपकशब्दस्य व्युत्पत्तिं लिखत।
3. रूपकं कतिविधम्?
4. रूपकभेदेषु के हेतवः भवन्ति ?

अधुना एकैकशः उपर्युक्तालङ्काराः सोदाहरणं स्पष्टीक्रियन्ते । अधोनिर्दिष्टेषु श्लोकेषु उपर्युक्तानां रूपकालङ्कारप्रकाराणाम् उदाहरणानि सन्दृश्यन्ते ।

**अयं हि धूर्जटिः साक्षाद्येन दग्धाः पुरः क्षणात्।**
**अयमास्ते विना शम्भुस्तार्तीयीकं विलोचनम्।।**

**शम्भुर्विश्वमवत्यद्य स्वीकृत्य समदृष्टिताम्।**
**अस्याः मुखेन्दुना लब्धे नेत्रानन्दे किमिन्दुना ।।**

**साध्वीयमपरा लक्ष्मीरसुधासागरोदिता ।**
**अयं कलङ्किनश्चन्द्रान्मुखचन्द्रोऽतिरिच्यते ।।**

**अ – १) अभेदरूपकस्य उपभेदाः**

**१. अनुभयाभेदरूपकम्–**

यत्र उपमानोपमेययोः अभेदरूपके न्यूनत्वं वा आधिक्यं नैव प्रतिभाति तत्र अनुभयाभेदरूपकालङ्कारः वरीवर्ति । यथा –'अयं हि धूर्जटिः ------' इत्यत्र कस्यचित् राज्ञः वर्णनं शिवरूपेण उपलभ्यते । अत्र हि 'येन दग्धाः' इत्यनेन विशेषणेन वर्णनीये राज्ञि प्रसिद्धशिवेन सह अभेदानुरञ्जनं (अभेदारोपणम्) संस्थापितम् । तेन हि शिवस्य पूर्वावस्थातः (उपमानावस्थातः) वर्णनीयराजभावावस्थायां न्यूनत्वाधिक्ययोः अवर्णनात् अनुभयाभेदरूपकमस्ति। अत्र हि रिपुपुरदग्धृत्वं द्वयोः (विषयविषयिणोः) समानं वर्तते । तथैव 'साक्षात्' इति शब्दोल्लेखेन अभेदत्वं प्रतिपादितम्। इदमपि एकमुदाहरण्–

**चन्द्रज्योत्स्नाविशदपुलिने सैकतेऽस्मिन् सरय्वाः**
**वादद्यूतं चिरतरमभूत्सिद्धयूनोः कयोश्चित्।**
**एको वक्ति प्रथमनिहतं कैटभं कंसमन्यः**
**स त्वं तत्त्वं कथय भगवन्? को हतस्तत्र पूर्वम्॥**

श्लोकेऽस्मिन् कश्चित् कविः राजानं स्तौति। राजा एव भगवान् विष्णुरिति मन्यते सः ।

सरयूनद्याः तीरे चन्द्रज्योत्स्नायाः धवलविशदवालुकायाम् उपविष्टयोः कयोश्चित् द्वयोः सिद्धयूनोर्मध्ये वादः प्रचलति स्म । एकः कथयति यत् भगवता विष्णुना आदौ 'कैटभः' (कैटभः इति राक्षसः) हतः इति। अपरश्च वदति, न तथा भगवान् विष्णुः प्रप्रथमं कंसं मारितवानिति । हे राजन्! सः त्वमेव तत्त्वं (सत्यम्) बोधय यत् पूर्वं कः हतः? इति ।

अत्र 'स त्वम्' इत्यनेन यः कंसकैटभयोः हन्ता विष्णुः तत्तादात्म्यं वर्णनीयस्य राज्ञः प्रतिपाद्य तं प्रति कंसकैटभवधयोः पौर्वापर्यप्रश्नव्याजेन तत्तादात्म्यं दृढीकृतमस्ति । उपमानरूपः विष्णुः उपमेयरूपः राजा चेत्यनयोः सामर्थ्ये न्यूनाधिक्यं कुत्रापि नैव वर्णितम् । अतः अनुभयाभेदरूपकम् ।

**२. न्यूनाभेदरूपकम्** –

यत्र उपमानोपमेययोः अभेदरूपके न्यूनत्वं प्रतिभाति तत्र न्यूनाभेदरूपकालङ्कारः दृश्यते । 'अयमास्ते विना --------' इत्यस्मिन् वाक्ये 'अयं शम्भुः विना तार्तीयीकं (तृतीयम्) विनालोचनम्' इति प्रोक्तम् । अर्थात् अयं शम्भुरिव राजा तृतीयनेत्ररहितः वर्तते । 'अयं शम्भु' इति वर्णनीये राजनि तृतीयनेत्रस्य न्यूनताप्रदर्शनं पूर्वतनीये वाक्ये वर्णितायाः उपमेयावस्थायाः न्यूनत्वं प्रकटीकरोति। सर्वविदितमेव यत् शिवः 'त्रिलोचनः' इति । परन्तु राजा तु द्विलोचनः इत्यस्मात् उपमानात् उपमेयस्य न्यूनत्वम् । इदं न्यूनत्ववर्णनमपि अभेदस्य दृढतोत्पादकत्वात् चमत्कारत्वं जनयति। अतः न्यूनाभेदरूपकालङ्कारोऽत्र प्रतीयते ।

अपरञ्चेकमुदाहरणमत्र –

**वेधा द्वेधा भ्रमं चक्रे कान्तासु कनकेषु च।**
**तासु तेष्वप्यनासक्तः साक्षाद्भर्गो नराकृतिः ॥**

**श्लोकार्थः**–ब्रह्मदेवेन द्वेधा भ्रमः (मोहः) समुत्पादितः। तद्यथा कान्तासु (स्त्रीषु) कनकेषु (सुवर्णेषु) चेति । परन्तु मनुष्यरूपेण स्थितोऽयं (मुनिः) साक्षात् शिवः तासु ललनासु तथा च सुवर्णेषु अनासक्तः वर्तते।

अस्मिन् श्लोके साक्षादिति विशेषणेन विरक्तस्य मनुष्यस्य प्रसिद्धशिवतादात्म्यमुपदर्श्य 'नराकृतिः' इति पदं योजयित्वा अयं शिवः दिव्यमूर्तिरहितः इत्युक्तम् । एवं दिव्यमूर्तिराहित्यं लक्षयित्वा न्यूनता प्रतिपादिता अतः न्यूनाभेदरूपकालङ्कारोऽत्र।

**३. अधिकाभेदरूपकम्** –

यत्र विषयविषयिणोः अभेदरूपके कविना आधिक्यं प्रदर्श्यते तत्र अधिकाभेदरूपकालङ्कारः भवति । यथा –'शम्भुर्विश्वमवत्यद्य स्वीकृत्य समदृष्टिताम्' इत्यत्र 'विषमदृष्टित्वपरित्यागेन समदृष्टितां च स्वीकृत्य अयं शम्भुः (राजा = उपमेयम्) विश्वरक्षणं करोति' इत्यनेन कथनेन शिवस्य पूर्वावस्थातः (उपमानावस्थातः) वर्णनीयायां राजभावावस्थायाम् उत्कर्षः प्रतीयते इत्यस्मात् अधिकाभेदरूपकम् । अत्र विषयिणः पूर्वावस्थातः आधिक्यं समुपवर्णितम् । तथैव त्रिलोचनस्वीकर्ता शिवः राजभावे द्विलोचनत्वमङ्गीकरोतीति उत्कर्षप्रतीतिः । अपि च तमोगुणस्वामी विश्वनाशकः शिवः राजभावे विश्वसंरक्षकः सञ्जातः इत्यपि उत्कर्षः । अतः उपमानस्य आधिक्यात् अधिकाभेदरूपकालङ्कारः। अस्यैव अन्यदेकमुदाहरणमिदम् –

**त्वय्यागते किमिति वेपत एष सिन्धुः**
**त्वं सेतुमन्थकृदतः किमसौ बिभेति ।**
**द्वीपान्तरेऽपि न हि तेऽस्त्यवशंवदोऽद्य**
**त्वां राजपुङ्गव ! निषेवत एव लक्ष्मीः ॥**

श्लोकेऽस्मिन् कश्चित् कविः राजानं स्तौति । हे राजन् ! त्वयि आगते सति एषः सिन्धुः (सागरः) किमिति वेपते (कम्पते) ? किं त्वं सेतुबन्धनकर्ता (रामः) तथा च समुद्रमन्थनकर्ता (विष्णुः) असि? अतः असौ बिभेति। भवता सेतुबन्धस्य काऽपि आवश्यकता नास्ति। यतो हि अद्य द्वीपान्तरे अपि ते कोऽपि अवशंवदः (अवशीभूतः) नास्ति। तथैव समुद्रमन्थनस्यापि आवश्यकता नास्ति कारणं हे राजपुङ्गव! लक्ष्मीः त्वां निषेवते एव।

अत्र 'त्वं सेतुमन्थकृत्' इति सेतोः मन्थनस्य च पुरुषोत्तमेन सह वर्णनीयस्य (उपमेयस्य) तादात्म्यमुक्त्वा तथापि त्वदागमनं सेतुबन्धाय वा मन्थनाय वेति समुद्रेण न भेतव्यम् ।

द्वीपान्तराणामपि त्वद्वशंवदत्वेन पूर्ववद्द्वीपान्तरे जेतव्याभावात् प्राप्तलक्ष्मीकत्वेन मन्थनप्रसक्त्यभावात् चेति पूर्वावस्थातः उत्कर्षविभावनात् अधिकाभेदरूपकम् ।

श्लोकेऽस्मिन् कवेः अभिप्रायोऽयं यत् पूर्वं रामेण सागरे सेतुबन्धं कृतं तथा च विष्णुना समुद्रमन्थनं विहितमिति संस्मृत्य सागरः बिभेति। राजास्य अवशवर्तित्वं रामं सेतुबन्धनाय बद्धं अकरोत् । तथैव लक्ष्मीप्रात्यर्थं विष्णुना सागरमन्थनं कृतमिति द्वयोः प्रयोजनमासीत् अत्र राज्ञः तादृशं किमपि प्रयोजनं न विद्यते । यतो हि द्विपान्तरराजानोऽपि अस्य वशीभूतास्सन्ति। अपि च लक्ष्मीस्तु सदा अस्य सेवां करोतीति । अतः रामस्य जेतव्याभावः विष्णोश्च लक्ष्म्याः अप्राप्तिः वर्तमाने राज्ञि नैव वर्तते । तस्मात् उपमानापेक्षया उपमेये आधिक्यं प्रदर्शितमस्ति ।

**स्वावलोकनप्रश्नाः**

1. अभेदरूपकस्य कति उपभेदाः ? के च ते ?
2. 'अयं हि धूर्जटिः साक्षात् येन दग्धाः पुरः क्षणात्' इत्यत्र कोऽलङ्कारः ?
3. अधिकाभेदरूपकालङ्कारस्य वैशिष्ट्यं किम् ?
4. न्यूनाभेदरूपकं कुत्र सम्भवति?

**अ-२) ताद्रूप्यरूपकस्य उपभेदाः**

**१. अनुभयताद्रूप्यरूपकम्–**

विषयविषयिणोः ताद्रूप्ये यत्र द्वयोः न्यूनाधिक्यं नैव वर्ण्यते तत्र अनुभयताद्रूप्यरूपकालङ्कारः सम्भवति । यथा 'अस्या मुखेन्दुना लब्धे ---------' इत्यत्र नायिकायाः मुखचन्द्रेण नेत्रानन्दप्राप्तिश्चेत् आकाशस्थितचन्द्रस्य का आवश्यकता ? इत्यर्थः । मुखचन्द्रः एव नैसर्गिकचन्द्रस्य कार्यं विदधाति । वस्तुतः मुखस्य न प्रसिद्धचन्द्राभेदप्रतीतिः सम्भवति । किन्तु इन्दुगतसाधारणधर्मस्य इन्दुत्वस्य मुखे आरोपणात् उपमानभूतचन्द्रः तथा च उपमेयभूतमुखचन्द्रः इत्यनयोः न्यूनाधिक्यं नास्त्येवात्र । अतः अनुभयताद्रूप्यरूपकालङ्कारः उदाहरणेऽस्मिन् अवलोक्यते । इतोऽप्येकम् उदाहरणं प्रदीयते अत्र ।

**किं पद्मस्य रुचिं न हन्ति नयनानन्दं विधत्ते न किं**
**वृद्धिं वा झषकेतनस्य कुरुते नालोकमात्रेण किम् ।**
**वक्त्रेन्दौ तव सत्ययं यदपरः शीतांशुरुज्जृम्भते ।**
**दर्पः स्यादमृतेन चेदिह तदप्यस्त्येव बिम्बाधरे ।।**

**श्लोकार्थः -** तव वक्त्रेन्दौ सति अयम् अपरः शीतांशुः(चन्द्रः) यद् उज्जृम्भते (प्रकाशते) इत्युक्ते (तव वक्त्रेन्दुः) पद्मस्य रुचिं न हन्ति किम्? नयनानन्दं न विधत्ते (प्रददाति) किम् ? आलोकमात्रेण झषकेतनस्य (सागरस्य तथा च मदनस्येति श्लेषः) वृद्धिं न कुरुते किम् ? यदि गगनस्थचन्द्रस्य अमृतेन दर्पः स्यात् तर्हि तदपि (अमृतम्) इह तव बिम्बाधरे अस्ति एव ।

उदाहरणेऽस्मिन् 'अपरः शीतांशुः' इत्यनेन वक्त्रेन्दोः प्रसिद्धचन्द्रात् (आकाशस्थचन्द्रात् ) भेदम् आविष्कृत्य प्रसिद्धचन्द्रस्य कार्यकारित्वमात्रं प्रतिपादितमत्र। यत्कार्यं गगनस्थचन्द्रस्य तदेव मुखचन्द्रस्यपि । एवं गुणवैशिष्ट्ये उपमानोपमेययोः साम्यं प्रकटीकृतम् । यथा चन्द्रोदयेन सूर्यकमलकान्तिः नश्यति तथा मुखचन्द्रेणापि । यथा चन्द्रः नयनानन्दं प्रददाति तथैव मुखचन्द्रोऽपि। चन्द्रः सागरस्य वृद्धिं करोति मुखचन्द्रोऽपि कामदेवस्य वृद्धिं विदधाति। चन्द्रस्य समीपे अमृतं वर्तते तथैव मुखचन्द्रे बिम्बाधरे अस्त्येव । इत्थं मुखचन्द्रस्य चन्द्ररूपवर्णन ताद्रूप्यमस्ति। तेन हि उत्कर्षापकर्षयोः अप्रदर्शनेन अनुभयताद्रूप्यरूपकम्।

इदं ज्ञातव्यं यत् अभेदरूपके उपमानोपमेययोः भेदः न भवति। किन्तु ताद्रूप्यरूपके आदौ भेदं प्रदर्श्य तदनन्तरं ताद्रूप्यारोपणं क्रियते इति।

**२. न्यूनताद्रूप्यरूपकम्–**

यत्र उपमानोपमेययोः ताद्रूप्ये न्यूनत्वं विवक्षितं भवति तत्र न्यूनताद्रूप्यरूपकालङ्कारः उपपद्यते । यथा 'साध्वीयमपरा ---------' इत्यत्र इयं सुन्दरी (नायिका) अपरा लक्ष्मीः, या क्षीरसागरात् नोत्पन्ना इत्यर्थः। लक्ष्मीः क्षीरसागरोत्पन्नेति विख्यातमेव। परन्त्वत्र साध्वी सुन्दरी (उपमेयम्) असुधासागरोत्पन्ना वर्तते । उपमानस्य क्षीरसागरोत्पन्नत्वं वैशिष्ट्यम् उपमेये न्यूनत्वमुपपादयति। तेन हि न्यूनताद्रूप्यरूपकालङ्कारोऽत्रेति सिद्धम्। अपरञ्चोदाहरणम् इत्थम् –

**अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः ।**
**अभाललोचनः शम्भुः भगवान् बादरायणः ॥**

**श्लोकार्थः** – भगवान् बादरायणः अचतुर्वदनः (अपरः) ब्रह्मा, द्विबाहुः अपरः हरिः तथा च अभाललोचनः (अपरः) शम्भुः अस्ति।

अस्मिन् श्लोके 'अपर' इति विशेषणं प्रथमतृतीयपादयोरपि सम्बध्यते इति सर्वत्र ताद्रूप्यविवेक्षणमस्ति । अत्र हि भगवान् बादरायणः (व्यासमुनिः) उपमेयमस्ति । ब्रह्मा, विष्णुः शिवश्च उपमानम्। व्यासमुनौ चतुर्वदनत्वादि–अभावात् न्यूनताद्रूप्यरूपकम्। अत्रापि'अपर' इति शब्देन ब्रह्मा, विष्णुः शिवश्चेतेषां भिन्नत्वं प्रोक्तम् । किन्तु गुणवैशिष्ट्यमधिकृत्य ताद्रूप्यमपि व्यपदिष्टम्।

**३. अधिकताद्रूप्यरूपकम्-**

यत्र विषयविषयिणोः ताद्रूप्ये आधिक्यं भवति तत्र अधिकताद्रूप्यरूपकालङ्कारः बोध्यः। यथा 'अयं कलङ्किनश्चन्द्रा ----------' इत्युदाहरणे मुखचन्द्रः कलङ्किनः चन्द्रात् आधिकशोभासम्पन्नः इति वर्णनम्। अत्र उपमानभूतः वा विषयीभूतः चन्द्रः कलङ्कयुक्तः परञ्च उपमेयभूतः वा विषयभूतः मुखचन्द्रः कलङ्करहितः इत्युक्त्वा उपमानात् उपमेयस्य

शोभासम्पन्नत्वरूपम् आधिक्यं विवेचितम् । तेन ह्यत्र अधिकताद्रूप्यरूपकालङ्कारोऽस्ति । अपरञ्चेदम् उदाहरणं पश्यामः ।

**किमसुभिर्ग्लपितैर्जड ! मन्यसे मयि निमज्जतु भीमसुतामनः ।**
**मम किल श्रुतिमाह तदर्थिकां नलमुखेन्दुपरांविबुधः स्मरः ॥**

**श्लोकार्थः** – हे जड ! (हे मूर्ख, हे जल ! इति अर्थद्वयम्) , चन्द्रगलितैः असुभिः (प्राणत्यागादनन्तरम्) भीमसुतामनः ( दमयन्त्याः मनः) मयि निमज्जतु इति मन्यसे किम् ? किन्तु मम विबुधः (पण्डितः) स्मरः (मदनः) तदर्थिकां श्रुतिं नलमुखेन्दुपराम् आह ।

अत्र दमयन्तीकृतचन्द्रस्य उपालम्भनं वर्तते । प्राणोत्सर्जनात् जीवस्य मनः चन्द्रे लीनं भवतीति श्रुतिः । अयं चन्द्रं वक्ति , 'हे चन्द्र, त्वं मूर्खः । मम प्राणोत्सर्जनात् मम मनः त्वयि विलीनं भवेदिति तव श्रुत्यर्थः अयोग्यः । यतो हि प्रसिद्धपण्डितः मदनः मां प्रोक्तवान् यत् तव मनः नलस्य मुखचन्द्रे विलीनं भवेत् न तु आकाशस्थचन्द्रे' इति। अत्र नलस्य मुखचन्द्रः तथा च गगनस्थचन्द्रः इत्यनयोः ताद्रूप्यं वर्णितम् । अपि च प्रसिद्धचन्द्रस्य अपेक्षया नलमुखचन्द्रस्य वैशिष्ट्यम् आधिक्येन अभिव्यक्तीकृतम् । तस्मात् अधिकताद्रूप्यरूपकालङ्कारः अभवत् । एवमत्र षड्विधरूपकालङ्काराणं व्याख्यानं विहितम् ।

**अवधेयांशाः**

१. रूपकालङ्कारः अभेदप्रधानः साधर्म्यमूलकोऽस्ति । तस्मात् सादृश्यसम्बन्धः तत्र अनिवार्यः। अत्र आरोपविषये (उपमेये) आरोप्यमाणविषयिणः (उपमानस्य) आरोपणं क्रियते । अर्थात् उपमेयस्य उपमाने तल्लीनता दृश्यते । आरोपः सर्वदा चमत्कृतिजनकः भवेत् ।

२. प्रायः रूपके साधारणधर्मस्य प्रयोगः नैव क्रियते । परन्तु तत्र साधारणधर्मः स्पष्टतया दृष्टीपथम् आगच्छेत् ।

३. रूपकस्य सावयवत्वनिरवयवत्वादिभेदाः 'चित्रमीमांसा' इत्यास्मिन् ग्रन्थे उद्धृताः इति अप्पय्यदीक्षितः अत्र संसूचयति ।

**स्वावलोकनप्रश्नाः**

1. ताद्रूप्यरूपकस्य कति उपभेदाः ?
2. अधिकताद्रूप्यरूपकालङ्कारः कुत्रसम्भवति ?
3. अनुभयताद्रूप्यरूपकालङ्कारस्य किं वैशिष्ट्यम्?
4. 'साध्वीयमपरा लक्ष्मीरसुधासागरोदिता' इत्यत्र कोऽलङ्कारः ?
5. ताद्रूप्यरूपकमभेदरूपकयोः को भेदः ?

### २.३.१.२. परिणामालङ्कारः

**परिणामः क्रियार्थश्चेद्विषयी विषयात्मना।**
**प्रसन्नेन दृगब्जेन वीक्षते मदिरेक्षणा ॥**

अस्यां कारिकायां परिणामालङ्कारस्य लक्षणोदाहरणञ्च समुपवर्णितमस्ति।

यत्र आरोप्यमाणः विषयी (उपमानम्) किञ्चित्कार्योपयोगित्वेन निबध्यमानः स्वतः तस्य तदुपयोगित्वासम्भवात् प्रकृतात्मना परिणतिम् अपेक्षते तत्र परिणामालङ्कारः। अर्थात् उपमानं स्वयं क्रियासिद्धिं विधातुं विषयस्य उपमेयस्य वा रूपे आत्मानं विलीनीकरोति। यतो हि स्वतन्त्रतया विषयी कार्यं कर्तुं नैव प्रभवति यावत् विषयस्वरूपग्रहणं तेन न क्रियते।

इदमवगन्तव्यं यत् रूपकालङ्करे उपमेयम् उपमानरूपं प्राप्नोति। किन्त्वत्र प्रायः कार्योपयोगित्वेन उपमानम् उपमेयरूपम् आप्नोति इति।

यथा मदिरेक्षणा (मादकलोचना नायिका) प्रसन्नेन नेत्रकमलेन पश्यति।

अत्र हि अब्जस्य (कमलस्य) वीक्षणोपयोगित्वं निबध्यते न तु दृशः। यतः नेत्रे कमलस्य आरोपणं कमलस्य वीक्षणशक्तिम् अपेक्षते न हि नेत्रस्य। परन्तु कमले दृक्शक्तिः अनुपादिता। इत्यस्मात् दर्शनकार्ये असामर्थ्यं दृश्यते। अतः उपमानभूतं कमलं दर्शनकार्यसिद्ध्यर्थम् आत्मानम् उपमेयभूते नेत्रे परिणमति। तेन हि परिणामलङ्कारः जायते।

उदाहरणेऽस्मिन् 'दृगब्जम्' इत्यत्र मयूरव्यंसकादिसमासेन उत्तरपदार्थप्राधान्यात् अब्जस्य वीक्षणक्रियया सह सम्बन्धयोजना न तु दृशा। अत्र प्रसन्नेति सामान्यधर्मप्रयोगः।

अपरञ्चेकम् उदाहरणम्–

**तीर्त्वा भूतेशमौलिस्रममरधुनीमात्मनासौ तृतीयः**
**तस्मै सौमित्रिमैत्रीमयमुपकृतवानातरं नाविकाय।**
**व्यामग्राह्यस्तनीभिः शबरयुवतीभिः कौतुकोदञ्चदक्षं**
**कृच्छ्रादन्वीयमानः क्षणमचलमथो चित्रकूटं प्रतस्थे॥**

प्रस्तुतश्लोकः अनर्घराघवनाटके उद्धृतोऽस्ति।

आत्मना तृतीयः असौ (सीतालक्ष्मणाभ्यां साकं रामः) भूतेशमौलिस्रजम् अमरधुनीं (शिवस्य मस्तकमालां देवनदीं गङ्गाम्) तीर्त्वा तस्मै नाविकाय (केवटाय) सौमित्रि – मैत्रीमयम् आतरं (लक्ष्मणमैत्रीस्वरूपं तरणमूल्यम्) प्रदाय उपकृतवान्। तदनन्तरं यासां पुष्टस्तनाः हस्तव्यामे ग्रहितुं शक्याः तादृशशबरयुवतीभिः कुतूहलेन विकसितनेत्राभ्यां अन्वीयमानः सः कष्टेन ततः चित्रकूटपर्वतं प्रति प्रस्थितः।

अत्र 'आतरः' आरोप्यमाणः सौमित्रिमैत्री च आरेपितः। आतरः सौमित्रिमैत्रीरूपे परिणतः भूत्वा नाविकमुपकर्तुं समर्थः; न स्वतः। सः नाविकस्तु रघुनाथप्रसादैकार्थी न तु तरणमूल्यार्थी वा

वेतनार्थी तस्मात् परिणामालङ्कारोऽत्र । अत्र हि आतरेण सौमित्रिमैत्रीमयरूपत्वेन एव गुहोपकारलक्षणकार्योपयोगित्वं साधयितुं शक्यं नान्यथा।

**स्वावलोकनप्रश्नाः**

1. 'वीक्षते मदिरेक्षणा' इत्यत्र कोऽलङ्कारः ?
2. परिणामालङ्कास्य को विशेषः ?
3. क्रियार्थं विषयी किं करोति ?
4. 'दृगब्जम्' इत्यत्र कः समासः ?
5. 'तीर्त्वाभूतेशः -----------' इत्यस्मिन् श्लोके उपमानं किम्?

### २.३.१.३. स्मृति – भ्रान्ति - ससन्देहालङ्कारः

**स्यात् स्मृतिभ्रान्तिसन्देहैस्तदङ्कालङ्कृतित्रयम्।**
**पङ्कजं पश्यतः कान्तामुखं मे गाहते मनः ॥**

**अयं प्रमत्तमधुपस्त्वन्मुखं वेत्ति पङ्कजम्।**
**पङ्कजं वा सुधांशुर्वेत्यस्माकं तु न निर्णयः ॥**

ज्ञानप्राधान्यसाम्यात् स्मृति – भ्रान्ति – ससन्देहाः अत्रैव निरूप्यन्ते। यत्र स्मृतिः, भ्रान्तिः सन्देहश्च वर्तते तत्र तत्तदलङ्कारः । स्मृत्यादिपदाङ्कितम् अलङ्कारत्रयमित्यतः एकदा एव प्रस्तूयते।

**१. स्मृत्यलङ्कारः** – स्मृतित्वमिति अलङ्कारस्यास्य वैशिष्ट्यम् । तत्र स्मृतित्वं नाम तावत्स्मरामि इति अनुभवसाक्षिकः विशेषः । यत्र चमत्कृतसदृशं वस्तु विलोक्य पूर्वपरिचितवस्तुनः स्मरणं भवति तत्र स्मृत्यलङ्कारः । यथा– 'पङ्कजं पश्यतः कान्तामुखं मे गाहते मनः ।' अर्थात् कमलं दृष्ट्वा मम मनः कान्तामुखं स्मरति। सादृश्यहेतुकत्वं स्मृतौ वर्तते इति बोधः। संस्कारजन्यं सादृश्यमूलं ज्ञानं स्मृतिः इति।

**२. भ्रान्त्यलङ्कारः -** भ्रान्तित्वमिति अलङ्कारस्यास्य विशेषः । तत्र भ्रान्तित्वम् इत्युक्ते विशेष्यावृत्तिप्रकारकज्ञानत्वम् । कस्मिन्नपि चमत्कृतजन्ये वस्तुनि अन्यवस्तुनः मिथ्याज्ञानं भ्रान्तिः इति। यथा - 'अयं प्रमत्तमधुपस्त्वन्मुखं वेत्ति पङ्कजम्' इत्यत्र प्रमत्तः मधुकरः तव मुखं पङ्कजमिति चिन्तयति इत्यर्थः । मुखे कमलस्य भ्रमः जायते मधुकरस्य, अतः भ्रान्त्यलङ्कारः । मिथ्याज्ञानेन भ्रान्तिः उद्भवति । अत्रापि भ्रान्तौ सादृश्यहेतुरेव प्रधानः । भ्रान्तिश्च विपर्ययरूपा भवति।

**३. सन्देहालङ्कारः -** सन्देहत्वं तु निश्चयाभिन्नत्वे सति सम्भावनाभिन्नज्ञानत्वं पारिभाषिकम् । सन्देहत्वमिति अस्य अलङ्कारस्य प्रमुखवैशिष्ट्यम् । यत्र वस्तुनः ज्ञानं भूत्वा अपि निश्चिज्ञानं नास्ति तत्र सन्देहः भवति। यत्र ज्ञाने सर्वदा सन्देहः शङ्का वेति उत्पद्यते तत्र सन्देहलङ्कारः। यथा

-'पङ्कजं वा सुधांशुः वा इति अस्माकं तु न निर्णयः' इत्यस्मिन् वाक्ये कान्तामुखमिदं कमलं वा चन्द्रः वेति मम निर्णयः नैव शक्यः इति दोलायमाना चित्तवृत्तिः सन्देहालङ्कारं प्रदर्शयति।

स्मृत्यादयः एते अलङ्काराः स्मृति – भ्रान्ति – सन्देहहेतुभूताः। सर्वेषां श्लोकरूपेण एकैकम् उदाहरणम् अधुना उपस्थाप्यते।

तत्रादौ स्मृतिमदुदाहरणम् –

**दिव्यानामपि कृतविस्मयां पुरस्ताद–**
**म्भस्तः स्फुरदरविन्दचारुहस्ताम्।**
**उद्वीक्ष्य श्रियमिव काञ्चिदुत्तरन्ती–**
**मस्मार्षीज्जलनिधिमन्थनस्य शौरिः ॥**

**श्लोकार्थः** दिव्यानामपि (देवानामपि ) कृतविस्मयां (सौन्दर्यातिशयेन कृताश्चर्याम्) , कमलेन रमणीयः हस्तः यस्याः तथाभूतां पुरस्तात् (अग्रे) अम्भस्तः (जलात्) उत्तरन्तीं (निर्गच्छन्तीम्) काञ्चित् स्त्रियम्) मन्थ्यमानात् समुद्रजलात् निस्सरन्तीं श्रियमिव ( श्रीसदृशीमिव लक्ष्मीः इव वा) उद्वीक्ष्य (दृष्ट्वा) जलनिधिमन्थनस्य (समुद्रमन्थनस्य) स्मरणम् शौरिः अकरोत्।

पूर्वत्र स्मृतिमदुदाहरणे सदृशस्यैव स्मृतिः । अत्र सदृशलक्ष्मीस्मृतिपूर्वकं तत्सम्बन्धिनो जलनिधिमन्थनस्यापि स्मरणमिति भेदोऽस्ति। श्रीकृष्णः जलक्रीडां कुर्वतीं काञ्चित् सुन्दरीम् अवलोक्य लक्ष्मीस्मरणं कृतवान् । तथैव वारंवारं जलात् बहिः आगच्छन्तीं तां वीक्ष्य समुद्रमन्थनस्मृतिः तस्य जागृता। यतो हि सागरमन्थनादेव लक्ष्मीः बहिरागता आसीत्। एवं न केवलं श्रियः स्मरणमपि तु तत्सम्बन्धितं सागरमन्थनमपि स्मृतिपथमागतम् इति स्मृतिमदलङ्कारः। द्वितीयमुदाहरणमिदं भ्रान्त्यलङ्कारस्य –

**पलाशमुकुलभ्रान्त्या शुकतुण्डे पतत्यलिः।**
**सोऽपि जम्बूफलभ्रान्त्या तमलिं धर्तुमिच्छति ॥**

**श्लोकार्थः** – कश्चित् अलिः (भ्रमरः) पलाशमुकुलभ्रान्त्या शुक्तुण्डे पतति । सोऽपि (शुकः) जम्बूफलभ्रान्त्या तम् अलिं ग्रहितुमिच्छति।

अस्मिन् श्लोके अलिशुकयोः परस्परविषयकभ्रान्तिः कविना प्रदर्शिता । तेन हि भ्रान्त्यलङ्कार इति तु स्पष्टमेव।

अयं तृतीयश्लोकः सन्देहरूपेण उदाह्रियते।

**जीवनग्रहणे नम्रा गृहीत्वा पुनरुन्नताः।**
**किं कनिष्ठाः किमु ज्येष्ठाः घटीयन्त्रस्य दुर्जनाः ॥**

**श्लोकार्थः** – दुर्जनाः जीवनग्रहणसमये नम्राः भवन्ति । पुनश्च जीवनग्रहणं कृत्वा उन्नताः (ऊर्ध्वमुखाः) तिष्ठन्ति। अतः एते दुर्जनाः घटीयन्त्रस्य अपेक्षया कनिष्ठाः वा ज्येष्ठाः वा ?

उदाहरणेऽस्मिन् 'जीवनम्' इति पदस्य अर्थद्वयम् । जलं प्राणसंयोगश्चेति । यथा घटीयन्त्रं (कूपात् जलमपहर्तुं रज्जुसम्बद्धपात्रम्) जलं स्वीकर्तुम् अधोमुखं स्थित्वा कूपं प्रविशति । अपि च जलग्रहणाय नतं भवति । किन्तु जलग्रहणादनन्तरम् ऊर्ध्वमुखं विधाय उपरि आगच्छति । तादृशमेव दुर्जनाः प्राणहरणसमये नम्राः तिष्ठन्ति । अपि च प्राणापहरणं कृत्वा उन्नतमुखेन जगति व्यवहरन्ति। किमपि नैव सञ्जातमिव सर्वत्र निर्लज्जतया भ्रमन्ति । अतस्ते घटीयन्त्रात् कनिष्ठाः वा ज्येष्ठाः वेति सन्देहः कवेः मनसि उद्भूतः । तस्मादेव सन्देहालङ्कारोऽस्ति अत्र ।

**स्वावलोकनप्रश्नाः**

1. स्मृत्यलङ्कारः कदा सम्भवति ?
2. 'भ्रान्तित्वम्' इति कस्य वैशिष्ट्यम् ?
3. 'अनिश्चितता' कस्मिन् अलङ्कारे सञ्जायते ?
4. केऽलङ्काराः तत्तत्पदाङ्किताः ?
5. का विपर्ययरूपा वर्तते ?

### २.३.१.४. उल्लेखालङ्कारः

**बहुभिर्बहुधोल्लेखादेकस्योल्लेख इष्यते ।**
**स्त्रीभिः कामोऽर्थिभिः स्वर्द्रुः कालः शत्रुभिरैक्षि सः ।।**

कारिकेयम् उल्लेखालङ्कारलक्षणं लक्षयति । यत्र नानाविधधर्मयोग्यमेकं वस्तु तत्तद्धर्मयोगरूपनिमित्तभेदेन अनेकेन ग्रहीत्रा अनेकधा उल्लिख्यते तत्रोल्लेखः । अर्थात् एकस्य उपमेयस्य नानारूपत्वग्रहणात् बहुभिः तत्तद्रूपग्रहीतृभिः बहुरूपतया तस्योल्लेखः क्रियते । इत्युक्ते नानाविधधर्मशालिनि एकस्मिन् वस्तुनि ग्रहीतॄणां बहूनां बहुरूपतया ग्रहणमुल्लेखः ।

यथा एकः राजा सौन्दर्यवितरणपराक्रमशालीति कृत्वा सौन्दर्यशालितया तदभिलाषिणीभिः स्त्रीभिः कामत्वेन (मदनत्वेन), वितरणशालितया अर्थिभिः स्वर्द्रुमत्वेन (कल्पतरुत्वेन) तथा च पराक्रमशालितया भयशालिभिः शत्रुभिः कालरूपत्वेन (यमदेवत्वेन) तस्य उल्लेखः क्रियते ।

अत्र हि अनेकधोल्लेखने रुचिः, अर्थित्वं तथा च भयमादिकं यथायोग्यं प्रयोजकं भवति। अवगन्तव्यं यत् निमित्तभेदात् एकस्य वस्तुनः अनेकेन कृतमनेकधा उल्लेखनमेव उल्लेखं प्रचक्षते न तु एकेन कृतं नानाविधोल्लेखनम् इति । वैशिष्ट्यं नाम एकस्मिन् वस्तुनि अनेकगुणाः तथाच अनेकैः तस्य एकैकं गुणस्य नानाविधप्रकारैः विहितोल्लेखः एवात्र महत्त्वपूर्णः । यथा वा –

**गजत्रातेति वृद्धाभिः श्रीकान्त इति यौवतैः ।**
**यथास्थितश्च बालाभिर्दृष्टः शौरिः सकौतुकम् ।।**

मथुराप्रवेशं कुर्वन्तं श्रीकृष्णं वृद्धमहिलाः गजत्रातेति युवत्यः श्रीकान्तरूप (विष्णुः) इति तथा च बालाः बालरूपेण सकौतुकं दृष्टवत्यः । अत्र एक एव श्रीकृष्णः अनेकधा अनेकैः उल्लिखितः ।

यः महाग्राहग्रहणेन त्रस्तं गजं रक्षितवान् सोऽयं आदिपुरुषोत्तमः इति संसारात् भयभीतवृद्धाभिः अस्माकं रक्षकः समागतः इति दृशा अवलोकितः श्रीकृष्णः। नित्यं चञ्चलत्वेन प्रसिद्धायाः श्रियोऽपि कामोपचारवैदग्ध्येन यः प्रियोऽस्ति सोऽयं दिव्ययुवेति युवतिसमूहैः सोत्कण्ठैः दृष्टः शौरिः। बालाभिस्तु तद्बाह्यगतरूपवेषालङ्कारदर्शनमात्रलालसाभिः यथास्थितः दृष्टः श्रीकृष्णः। एवं गजत्रातृत्वं, श्रीकान्तत्वं शिशुत्वगुणयुक्तत्वञ्चादयः पृथक्धर्माः श्रीकृष्णे अवलोक्य तत्तद्रुचिसम्पन्नाः तथैव तम् अपश्यन्।

पूर्वोदाहरणे राज्ञि कामत्वाद्यारोपात् रूपकालङ्कारेण युक्तः उल्लेखः संकीर्णोऽसीत्। किन्तु अस्मिन् उदाहरणे आरोपेण विना उल्लेख इत्यस्मात् शुद्धोल्लेखः इति।

**एकेन बहुधोल्लेखेऽप्यसौ विषयभेदतः।**
**गुरुर्वचस्यर्जुनोऽयं कीर्तौ भीष्मः शरासने॥**

ग्रहितृभेदाभावेऽपि विषयभेदात् बहुधोल्लेखेनापि असौ उल्लेखालङ्कारः सम्भवति। अर्थात् कदाचित् एकः एव विषयभेदात् तेषां विषयाणां बहुधा वर्णनं करोति चेदपि उल्लेखः। यथा – अयं राजा वाणीतः गुरुः (बृहस्पतिः), कीर्तिकारणात् अर्जुनः तथा च धनुर्विद्यायां भीष्मोऽस्ति। अत्र हि यद्यपि ग्रहितृभेदाभावः तथापि उपमेयस्य विषयान्तरेण केनचिदेकेन बहुधा तस्योल्लेखः कृतः। उदाहरणमिदं श्लेषसङ्कीर्णं यतो हि 'गुरुर्वचसि' इत्येदं पदं वाक्कुशलः बृहस्पतिश्चेति अर्थद्वयं बोधयति। तथैव 'अर्जुनः' तथा च 'भीष्मः' इति पदद्वयमपि क्रमशः 'धवलः' इत्यर्थेन सह 'कुन्तीपुत्र अर्जुनः' तथा च 'भयङ्करः' इत्यर्थेन सह 'शान्तनुपुत्रः भीष्मः' इत्यर्थं ज्ञापयति। ग्रहितृभेदेनापि शुद्धः सङ्कीर्णश्चेति विधत्ते उल्लेखः।

इत्थम् उल्लेखालङ्कारः द्विधा – सङ्कीर्णः शुद्धश्चेति।

**स्वावलोकनप्रश्नाः**

1. उल्लेखालङ्कारस्य वैशिष्ट्यं प्रतिपादयत।
2. उल्लेखालङ्कारस्य प्रकारद्वयं लिखत।
3. अनेकधोल्लेखने कानि प्रयोजकानि सम्भवन्ति ?
4. 'गजत्रातेति' कस्योल्लेखः ?

### २.३.१.५. अपह्नुत्यलङ्कारः

सादृश्यमूलकालङ्कारस्य अभेदप्रधानेऽन्तर्भूतोऽयम् 'अपह्नुतिः' इति। अधुना तावत् अस्यालङ्कारस्य विषये सविस्तरमुच्यते। अपह्नुतिः नाम गोपनम्। यत्र प्रकृतस्य निषेधं कृत्वा अप्रकृतस्य आरोपणं तत्र अपह्नुतिः। अत्र अप्रकृतस्य (उपमानस्य) आरोपणमपि सादृश्यमूलकमेव। प्रकृतधर्मस्य निषेधः नाम तत्सदृशाप्रकृतवस्तुनः धर्मस्य आरोपणेन

प्रकृतधर्मस्य गोपनं कविकल्पनया क्रियते । अर्थात् वास्तविकतायाः गोपनं विधाय अवास्तविकवस्तुनः संस्थापनम्। अत्र हेतु – पर्यस्त – भ्रान्ति – छेक – कैतवादिवर्णनात् भेदाः दृश्यन्ते। तद्यथा –

अपह्नुत्यालङ्कारस्य भेदाः
1. शुद्धापह्नुतिः
2. हेत्वपह्नुतिः
3. पर्यस्तापह्नुतिः
4. भ्रान्तापह्नुतिः
5. छेकापह्नुतिः
6. कैतवापह्नुतिः

सम्प्रति एतेषां भेदानां सोदाहरणं विवेचनं विधास्यते।

**१. शुद्धापह्नुतिः**

**शुद्धापह्नुतिरन्यस्यारोपार्थो धर्मनिह्नवः ।**

**नायं सुधांशुः किं तर्हि? व्योमङ्गासरोरुहम्॥**

यत्र अन्यस्य (असाधारणधर्मस्य) आरोपार्थं धर्मगोपनं (उपमेयस्य असाधारणधर्मस्य) तत्र शुद्धापह्नुतिः सम्भवति।

वर्णनीये वस्तुनि तत्सदृशधर्मारोपणेन तदीयधर्मनिह्नवः अथवा कविकल्पनया उत्प्रेक्षितधर्मान्तरस्यापि निह्नवः शुद्धापह्नुतिः । अत्र स्पष्टमेव यत् उपमेयस्य प्रसिद्धधर्मस्य निषेधः कविकल्पितविभिन्नधर्माणां निषेधो वा शुद्धापह्नुतिः इति । यथा – 'नायं सुधांशु; किं तर्हि ? व्योमगङ्गासरोरूहम् ' इत्यत्र 'अयं न चन्द्रः, किं तर्हि ? आकाशगङ्गायाः कमलम् इत्यर्थः । आकाशगङ्गायाः पुण्डरीकत्वारोपात् चन्द्रस्य चन्द्रत्वमत्र निषिद्धम्। अतः शुद्धापह्नुत्यलङ्कारः। अपरमपि एकम् उदाहरणमत्र –

अङ्कं केऽपि शशङ्किरे, जलनिधेः पङ्कं परे मेनिरे,
सारङ्गं कतिचिच्च संजगदिरे, भूच्छायमैच्छन् परे।
इन्दौ यद्दलितेन्द्रनीलशकलश्यामं दरीदृश्यते
तत्सान्द्रं निशि पीतमन्धतमसं कुक्षिस्थमाचक्ष्महे॥

श्लोकार्थः – इन्दौ दलितेन्द्रनीलशकलश्यामं (स्फुटितस्य इन्द्रनीलमणेः खण्डः) यत् दरीदृश्यते तत् केऽपि अङ्कम् (कलङ्कम्) इति शङ्कन्ते । परे तु जलनिधेः (सागरस्य) पङ्कमिति मन्यन्ते। कतिचित् च सारङ्गमिति (मृगः) अब्रुवन्। इतरे भूमेच्छाया भूच्छायमिति अकथयन्। वयं तु सान्द्रं (घनं ) निशि (रात्रौ) पीतम् अत एव कुक्षिस्थमन्धतमसं (गाढान्धकारः) आचक्ष्महे (वदामः)।

श्लोकेऽस्मिन् कविप्रतिभाकल्पितस्य विभिन्नधर्माणाम् (अङ्कत्वं, जलनिधिपङ्कत्वं, भूच्छायात्वम्) अपि निषेधः अर्थसिद्धः । यतो हि एकैकशः परपक्षमतं समुपस्थापितम् । बहुभिः उपमानैः वर्णनीयविषयस्य असाधारणधर्मः निषिद्धोऽस्ति अत्र । उपर्युक्ते उदाहरणे शब्दबलात् अस्मिन् उदाहरणे च अर्थबलात् अपह्नुतिः जात इति द्वैविध्यम् ।

**२. हेत्वपह्नुतिः**

**स एव युक्तिपूर्वश्चेदुच्यते हेत्वपह्नुतिः ।**
**नेन्दुस्तीव्रो न निश्यर्कः सिन्धोरौर्वोऽयमुत्थितः ॥**

सः एव शुद्धापह्नुतिः युक्तिपूर्वः हेतुसहितः वा उच्यते चेत् हेत्वपह्नुतिः । यत्र उपमानस्य आरोपणं विधाय उपमेयस्य निषेधः हेतुसहितः व्यज्यते तत्र हेत्वपह्नुत्यलङ्कारः। यथा – अयं तीव्रः तस्मात् न चन्द्रः, रात्रौ विद्यते अतः न सूर्यः । अयं तु सागरात् उत्थितः वडवानलोऽस्ति । अत्र वर्णनीये चन्द्रे वडवानलत्वारोपार्थं तीव्रत्वनैशत्वयुक्तिभ्यां चन्द्रत्वसूर्यत्वनिषेधः प्रतिपादितः । तथैव इदमपि उदाहरणमेकम् –

**मन्थानभूमिधरमूलशिलासहस्र-**
**संघट्टनव्रणकिणः स्फुरतीन्दुमध्ये ।**
**छायामृगः शशक इत्यतिपामरोक्ति-**
**स्तेषां कथञ्चिदपि तत्र हि न प्रसक्तिः ॥**

श्लोकार्थः – मन्थनदण्डरूपपर्वतस्य मन्दरस्य मूले विद्यमानैः शिलासहस्रैः यत् सङ्घट्टं सञ्जातं ततः उत्पन्नोऽयं व्रणः। तस्य चिह्नं (किणः) इन्दुमध्ये स्फुरति । तत् चिह्नं भूमेः छाया, मृगः हरिणः वेति अतिपामराणां वचनानि । यतो हि तेषां छायादीनां तत्रेन्दुमध्ये कथञ्चिदपि केनापि प्रकारेण वा प्रसक्तिः नास्ति ।

अत्र चन्द्रमध्ये मन्थनकालिकमन्दरशिलासंघट्टनैः उत्पन्नव्रणस्यैव चिह्नं वर्तते । छायादीनां तत्र सम्भवो नास्तीति छायात्वादिनिषेधः पामरवचनत्वेन उपन्यासेन आविष्कृतः । अत्र सकारणनिषेधः तथा च विशिष्टवचनपूर्वकनिषेध इति भेदद्वयम् ।

**३. पर्यस्तापह्नुतिः –**

**अन्यत्र तस्यारोपार्थः पर्यस्तापह्नुतिस्तु सः ।**
**नायं सुधांशुः किं तर्हि? सुधांशुःप्रेयसीमुखम् ॥**

यत्र क्वचिद्वस्तुनि तदीयधर्मगोपनं कृत्वा अन्यत्र वर्णनीये वस्तुनि तस्य धर्मस्य आरोपार्थः सः पर्यस्तापह्नुतिः । यथा – नायं सुधांशुः । एवं चेत् कः सुधांशु ? सुधांशुस्तु मम प्रेयसीमुखम् । अत्र चन्द्रे चन्द्रत्वनिषेधं विधाय वर्णनीये मुखे तस्य आरोपणं ख्यापितम् । अर्थात् उपमानभूतचन्द्रस्य तास्मिन् चन्द्रत्वनिषेधं सूचयित्वा उपमेये प्रेयसीमुखे तदीयधर्मस्यैव आरोपणं पर्यस्तापह्नुतिः । पर्यस्ता इत्युक्ते आरोपविपरीता आरोपव्यधिकरणेति । अतः एव आरोपधर्मस्य तद्धर्मत्वं विपरीते उपमेये आरोप्यते उपमानरूपेण ।

यथा वा –

**हालाहलो नैव विषं, विषं रमा, जनाः परं व्यत्ययमत्र मन्वते ।**
**निपीय जागर्ति सुखेन तं शिवः , स्पृशन्निमां मुह्यति निद्रयाहरिः ।।**

**श्लोकार्थः** – हालाहलः विषं नैव भवति किन्तु रमा(लक्ष्मीः) विषमस्ति । परं जनाः आस्मिन्विषये वैपरीत्यं (व्यत्ययम्) मन्वते (चिन्तयन्ति) । यतः शिवः तं हालाहलं निपीय (पीत्वा) सुखेन जागर्ति जीवति वा । किन्तु हरिस्तु इमां रमां स्पृशन्सन् निद्रया मुह्यति इत्युक्ते गाढनिद्रां करोति ।

अत्र हालाहले विषत्वनिषेधं कृत्वा रमायाम् आरोपितः । विषपानेन जनाः मूर्च्छिताः भवन्ति । किन्त्वत्र शिवः विषपानं कृत्वापि जागर्ति इत्यनेन विषत्वापह्नवे जागरसुखप्रयोजकत्वमिति बोध्यम् । विषपानेन विना केवलं लक्ष्मीस्पर्शेन मोहितः इत्यत्र रमायाः विषरूपत्वे मोहजनकत्वं हेतुः प्रदर्शितः। कारिकार्धे हेतुकथनं नास्ति अर्धे तु हतोः उपन्यासः इत्यनेन सहेतुकनिर्हेतुकः इति द्वैविध्यमपि अस्मिन् अलङ्कारे सन्दृश्यते ।

**स्वावलोकनप्रश्नाः**

1. अपह्नुतेः कति प्रकाराः ?
2. ‘अपह्नुति’ इत्यस्य कोऽर्थः ?
3. हेतुसहितः अपह्नुतिः कुत्र भवति ?
4. पर्यस्तापह्नुतेः वैशिष्ट्यं किम् ?

**४. भ्रान्तापह्नुतिः** –

**भ्रान्तापह्नुतिरन्यस्य शङ्कायां भ्रान्तिनिवारणे।**

**तापं करोति सोत्कम्पं ज्वरः किं न सखि स्मरः।।**

अन्यस्य शङ्कायां भ्रान्तिनिवारणे भ्रान्तापह्नुतिः बोध्यः। भ्रान्तं नाम भ्रमः। कस्मिंश्चित् वस्तुनि अन्यस्य भ्रमे जाते तस्य निवारणं नाम भ्रान्तापह्नुतिः। यथा – अयं सोत्कम्पं ज्वरः तापं करोति। किं ज्वरः? न सखि स्मरः ( कामदेवः)। अत्र ‘तापं करोति’ इति कामदेवजनितपीडायाः वर्णनं काचित् विरहिणी सख्याः पुरतः कथयति। तापस्य ज्वरसाधारण्याद् ऋजुबुद्ध्या ( सरलबुद्ध्या) सख्या ‘ज्वरः किमिति’ पृष्टे ‘न सखि! स्मरः’ इति तत्त्वोक्त्या भ्रान्तिनिवारणं कृतम्। भ्रान्तस्य भ्रमस्य अपह्नुतिः (निषेधः) इति अन्वर्थनाम। एवं च तत्त्वकथनहेतुकभ्रान्तिविषयनिषेधः भ्रान्तापह्नुतिः इति लक्षणं बोध्यम्। यथा वा –

**नागरिक? समधिकोन्नतिरिह महिषः कोऽयमुभयतः पुच्छः।**

**न हि नहि, करिकलभोऽसौ शुण्डादण्डोऽयमस्य न तु पुच्छम्।।**

नागरिकं प्रति ग्रामीणस्य प्रश्नोऽत्र। नागरिक! अन्यपशुभ्यः अधिकमौन्नत्यं यस्य, तथा च मुखपृष्ठभागयोः पुच्छं यस्य वर्तते एवंभूतो कोऽयं महिषः? नहि नहि, अयं तु करिशावकः। अयमस्य शुण्डादण्डः न तु पुच्छमिति उत्तरं नागरिकेण प्रदत्तम्।

उदाहरणेऽस्मिन् ग्रामीणस्य सन्देहरूपभ्रमः नागरिकेण निवारितः। भ्रान्तिः न केवलं सन्देहगर्भा अपि तु कविकल्पितापि शक्यते। अतः अधुना कल्पितभ्रान्तिपूर्वायाः उदाहरणं पश्यामः।

**जटा नेयं वेणीकृतकचकलापो न गरलं**

**गले कस्तूरीयं शिरसि शशिरेखा न कुसुमम्।**

**इयं भूतिर्नाङ्गे प्रियविरहजन्मा धवलिमा**

**पुरारातिभ्रान्त्या कुसुमशर! किं मां प्रहरसि ?**

श्लोकार्थः – हे कुसुमशर (कामदेव)! पुरारातिभ्रान्त्या (महादेवभ्रान्त्या) मां किं प्रहरसि? यतः इयं जटा न, अपि तु वेणीकृतकेशकलापोऽस्ति। मम गले न विषमपि तु कस्तूरी विद्यते। शिरसि शशिरेखा ( चन्द्रः) नास्ति अपि तु कुसुममस्ति। तथैव अङ्गे भूतिलेपनं( भस्मलेपनम्) नेदम् अपि तु प्रियविरहेण प्राप्तं धवलत्वम्।

कल्पितभ्रान्तिः इयम्। अत्र कामदेवस्य भ्रान्तिनिवारणं विरहिण्या विहितम्। अतः तस्य भ्रमनिषेधात् भ्रान्तापह्नुत्यलङ्कारः। परन्तु पूर्ववत्प्रश्नाभावोऽत्र। तस्मात् सम्भवत्भ्रान्तिपूर्वकः कल्पितभ्रान्तिपूर्वकश्चेति भेदः।

**५. छेकापह्नुतिः –**

**छेकापह्नुतिरन्यस्य शङ्कातस्तथ्यनिह्नवे ।**
**प्रजल्पन्मत्पदे लग्नः। कान्तः किं? नहि नूपुरः।।**

अन्यस्य शङ्कातः तथ्यगोपनं छेकापह्नुतिः। अर्थात् कस्यचित् कञ्चित् प्रति रहस्योक्तौ अन्येन श्रुतायां स्वोक्तेः तात्पर्यान्तरवर्णनेन तथ्यनिह्नवः छेकापह्नुतिः। अस्यार्थः कस्यचित् अन्यस्य रहस्यविषयशङ्कायां तत्त्वार्थनिषेधः इति। यथा- प्रजल्पन् सः मत्पदे लग्नः। किं पतिः? नहि नूपुरः। अत्र हि नायिकया नर्मसखीं प्रति ‘प्रजल्पन् मत्पदे लग्न’ इति स्वनायकवृत्तान्ते निवेद्यमाने तदाकर्ण्य ‘कान्तः किम्?’ इति शङ्कितवतीमन्यां प्रति ‘नहि, नूपुरः ’ इति तत्त्वार्थनिषेधनेन छेकापह्नुतिः। अत्र इतोऽपि उदाहरणमेकम् –

**सीत्कारं शिक्षयति व्रणयत्यधरं तनोति रोमाञ्चम्।**
**नागरिकः किं मिलितो? नहि नहि, सखि! हैमनः पवनः।।**

श्लोकार्थः – सीत्कारं तदनुकारिमुखध्वनिं शिक्षयति, अधरोष्ठं व्रणयति तथा च रोमाञ्चं विस्तारयति। किं नागरिकः मिलितः? नहि नहि हेमन्तर्तोः पवनः।

अत्र वाक्यत्रयं नागरिकाभिप्रायेण प्रियसखीं प्रति कयापि उक्तं तदाकर्ण्य नागरिकः किं मिलितः? इति शङ्कां पृच्छन्तीमन्यां प्रति तच्छङ्कानिवृत्तये 'नहि नहि' इति हैमन्तिकपवनत्ववर्णनं तत्त्वार्थं निषेधयति। अत्र अर्थयोजनया सत्यार्थगोपनं जातम्। परन्तु शब्दयोजनया तथ्यनिह्नवः शक्यः। यथा हि -

**पद्मे! त्वन्नयने स्मरामि सततं भावो भवत्कुन्तले**

**नीले मुह्यति किं करोति महितैः क्रीतोऽस्मि ते विभ्रमैः।**

**इत्युत्स्वप्नवचो निशम्य सरुषा निर्भर्त्सितो राधया**

**कृष्णस्तत्परमेव तद् व्यपदिशन् क्रीडाविटः पातु वः।।**

कृष्णः स्वप्ने लक्ष्मीं वीक्ष्य उत्स्वप्नायते – हे पद्मे! तव नयने सततं स्मरामि। भवत्याः कुन्तले (केशपाशे) मम भावोऽन्तःकरणं मोहं प्राप्नोति। किं करोमि? तव पूज्यैः विभ्रमैः (विलासैः) क्रीतोऽस्मि। एवं उत्स्वप्नवचः श्रुत्वा राधया रोषेण निर्भर्त्सितः क्रीडाभोक्ता कृष्णः राधापरकानि तानि वाक्यानि प्रयोज्य वास्तविकं गोपयति। सः एव भवतां सर्वेषां रक्षणं करोतु।

श्लोकेऽस्मिन् शब्दश्लेषमात्रेण तत्त्वार्थनिषेधः। 'पद्मे' इति पदेन श्लेषः ज्ञापितः। स च लिङ्-वचन-विभक्तिगतः। लक्ष्मीपक्षे तत्पदं स्त्रिलिङ्गसम्बोधनेकवचनरूपमस्ति। राधापक्षे तु 'नयने' इत्यस्य उपमानं भूत्वा नपुंसकलिङ्गद्वितीयाविभक्तेः द्विवचनरूपमस्ति। एवं स्वोक्तेः राधापरकव्याख्यानं कृत्वा श्रीकृष्णेन तत्त्वार्थः गोपितः। अतः शब्दयोजनया छेकापह्नुतिः।

उपर्युत्तानि त्रीण्यपि उदाहरणानि विषयान्तरयोजनायुक्तानि। कदाचित् विषयैक्ये अपि अवस्थाभेदेन अवस्थागोपनमपि क्रियते। यथा –

**वदन्ती जारवृत्तान्तं पत्यौ धूर्ता सखीधिया।**

**पतिं बुद्ध्वा 'सखि! ततः प्रबुद्धास्मी'त्यपूरयत्।।**

काचित् धूर्तनायिका भ्रान्त्या पतिं सखी इति अवगत्य जारवृत्तान्तं श्रावयति। किन्तु 'अयं पतिः' इति सत्यं ज्ञात्वा 'हे सखि! ततः अहं प्रबुद्धा' इति कथनेन वाक्यं पूर्णमकरोत्। अत्र हि जाग्रतावस्थायाः तत्त्वनिषेधं कृत्वा स्वप्नावस्थायाः उपस्थापनं प्रोक्तम्। एवमत्र अर्थयोजनया, शब्दयोजनया अवस्थाभेदयोजनया च निषेधप्रतिपादनं त्रैविध्यं दर्शयति।

**६. कैतवापह्नुतिः** –

**कैतवापह्नुतिर्व्यक्तौ व्याजाद्यैर्निह्नुतेः पदैः।**

**निर्यान्ति स्मरनाराचाः कान्तादृक्पातकैतवात्।।**

व्याजाद्यैः पदैः निह्नुतेः अभिव्यक्तौ कैतवापह्नुतिः इति व्यवहर्तव्यम्। व्याजाद्यैरित्यनेन कपटच्छलच्छद्मकैतवादयः गृह्यन्ते। यथा कामदेवस्य नाराचाः (बाणाः) कान्तादृक्कटाक्षैः कैतवात् निर्यान्ति ( निर्गच्छन्ति)। अत्र 'कैतक' इति पदप्रयोगः मिथ्यावाचकः। अनेन अवगम्यते यत् एते न

प्रियाकटाक्षाः अपि तु कामदेवस्य बाणाः इति। एवं वास्तविकप्रियाकटाक्षनिषेधः अतः कैतवापह्नुतिः। अन्यदपि उदाहरणमिदम् –

**रिक्तेषु वारिकथया विपिनोदरेषु मध्याह्नजृम्भितमहातपतापतप्ताः।**

**स्कन्धान्तरोत्थितदवाग्निशिखाच्छलेन जिह्वां प्रसार्य तरवो जलमर्थयन्ते।।**

श्लोकेऽस्मिन् ग्रीष्मवर्णनम् उपलभ्यते। जलेन शून्येषु अरण्यस्य उदरेषु (मध्यप्रदेशेषु) मध्याह्ने प्रवृद्धः यः महानातपः तस्य तापेन संतप्ताः वृक्षाः स्कन्धान्तरोत्थितेन (स्वशाखासु उत्थितेन) दवाग्निशिखाच्छलेन (दवाग्नेः ज्वालानां छलेन) जिह्वां प्रसार्य जलं प्रार्थयन्ते। अत्र नेयं दावाग्निशिखा अपि तु जिह्वेति छलपदात् प्रतीयते। अतः कैतवापह्नुतिः भवति।

सर्वत्र निषेधप्रतीतिः इत्यस्मात् अपह्नुतित्वेति साधारणधर्मः अवगन्तव्यः।

**स्वावलोकनप्रश्नाः**

1. 'भ्रान्तिनिवारणम्' कस्मिन् अपह्नुतौ वर्तते?
2. छेकापह्नुतेः लक्षणं किम् ?
3. व्याजादिपदानि कुत्र अपेक्षन्ते?
4. शुद्धापह्नुतेः उदाहरणं लिखत।
5. 'सीत्कारं शिक्षयति ---' इति कस्योदाहरणम्?

**अवधेयांशाः**

अपह्नुत्यलङ्कारस्य षड् प्रकाराः विद्यन्ते। तेषामपि उपप्रकराः अस्माभिः अधिगताः। तेषां सङ्क्षेपावतारः अधोनिर्दिश्यते।

१. शुद्धापह्नुतिः → अ) शब्दबलात् निषेधः
→ ब) अर्थबलात् निषेधः

२. हेत्वह्नुतिः → अ) सकारणनिषेधः
→ ब) विशिष्टवचनपूर्वकनिषेधः

३. पर्यस्तापह्नुतिः → अ) अहैतुकनिषेधः
→ ब) सहैतुकनिषेधः

४. भ्रान्तापह्नुतिः → अ) सम्भवत्भ्रान्तिपूर्वकः
→ ब) कल्पितभ्रान्तिपूर्वकः

५. छेकापह्नुतिः → अ) अर्थयोजनया निषेधः
→ ब) शब्दयोजनया निषेधः
→ क) अवस्थाभेदयोजनया निषेधः

६. कैतवापह्नुतिः इति एकः एव।
इत्थम् अपह्नुतेः एकादशप्रकाराः (११) इति बोध्यम्।

### २.३.२. अध्यवसायमूलकः

अभेदप्रधानसादृश्यगर्भालङ्कारस्य द्वितीयभेदः अध्यवसायमूलकः। अध्यवसायः इत्युक्ते अभेदनिश्चयः।'तत्र विषयनिगरणेन अभेदप्रतिपत्तिः अध्यवसाय' इति लक्षणं सिध्यति। अतः अभेदप्रधाने सादृश्ये यत्र अभेदनिश्चयः तत्र अध्यवसायमूलकः अभेदप्रधानालङ्कारः। अत्र हि विषयविषयिणोः मध्ये अभेदनिश्चय इति सुस्पष्टमेव। यथा कमलमिव मुखमित्युत्प्रेक्षा तथा च कमलमिदमित्यतिशयोक्तिः। अत्र बोध्यं यत् आरोपमूलके आरोपः मूलत्वेन उपन्यस्तोऽस्ति। किन्त्वत्र अभेदस्य निश्चयः मूलत्वेन विराजते इति द्वयोः अलङ्कारयोः समावेशः। तौ स्तः - उत्प्रेक्षा अतिशयोक्तिश्चेति। सम्प्रति उत्प्रेक्षालङ्कारनिरूपणं क्रियते।

### २.३.२.१. उत्प्रेक्षालङ्कारः

यत्र सम्भावना क्रियते तत्र उत्प्रेक्षालङ्कारः सम्भवति। सम्भावना इत्यस्य अर्थः उत्कटकोटिकसंशयः। सः संशयः 'शङ्के, मन्ये, ध्रुवम्, नूनम्, इव, किम्, प्रायः' चेत्यादिशब्दैः प्रतिपाद्यते। विषये विषयिणः तादात्म्यसम्भावना यत्र क्रियते तत्र उत्प्रेक्षालङ्कारः। प्रस्तुतकारिकायाम् उत्प्रेक्षालङ्कारं लक्षयति–

**सम्भावना स्यादुत्प्रेक्षा वस्तुहेतुफलात्मना।**
**उक्तानुक्तास्पदाद्यात्र सिद्धाऽसिद्धास्पदे परे।।**

**धूमस्तोमं तमः शङ्के कोकीविरहशुष्मणाम्।**
**लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः।।**


**रक्तौ तवाङ्घ्री मृदुलौ भुवि विक्षेपणाद् ध्रुवम्।**
**त्वन्मुखाभेच्छया नूनं पद्मैर्वैरायते शशी।।**

**मध्यः किं कुचयोर्धृत्यै बद्धः कनकदामभिः।**
**प्रायोऽब्जं त्वत्पदेनैक्यं प्राप्तुं तोयेतपस्यति।।**

उपर्युक्तायां प्रथमकारिकायाम् उत्प्रेक्षालङ्कारस्य लक्षणेन सह भेदाः अपि द्योतितास्सन्ति। ततः अवशिष्टश्लोकाः तेषां प्रकाराणामुदाहरणरूपेण बोधताः। अन्यधर्मसम्बन्धनिमित्तेन अन्यस्य अन्यतादात्म्यसम्भावनम् उत्प्रेक्षा। अतः सम्भावना उत्प्रेक्षापदवाच्या स्यात्। सा च वस्तुहेतुफलरूपेण त्रिधा इत्यर्थः। वस्तुहेतुफलानां सम्भावनाधर्मत्वं स्वविधेयकत्वसम्बन्धेन वर्तते। तेन वस्तुहेतुफलविधेयकत्वेन इति पर्यवसितार्थः।

प्रकृताप्रकृतयोः वस्तुत्वेन, हेतुत्वेन फलत्वेन च सम्भावना उत्प्रेक्षाभेदं सूचयति। तत्र आद्या वस्तूत्प्रेक्षा उक्तानुक्ताभेदेन द्विधा। किन्तु हेतूत्प्रेक्षा फलोत्प्रेक्षा च सिद्धत्वसाध्यत्वाभ्यां द्वैविध्यं भजते। अतः सिद्धविषया हेतूत्प्रेक्षा, असिद्धविषया हेतूत्प्रेक्षा, सिद्धविषया फलोत्प्रेक्षा, असिद्धविषया फलोत्प्रेक्षा इति चतुर्धा। तथा च उक्तानुक्तभेदेन द्विधेति उत्प्रेक्षा षड्विधेति उपलक्ष्यते।

तद्यथा –




अधुना तेषां षड्प्रकाराणां विवेचनं प्रदीयते अत्र।

**अवधेयांशाः**

उपमानस्य धर्मसम्बन्धात् उपमेयस्य उपमानरूपत्वेन सम्भावना उपतर्कः वा उत्प्रेक्षेति। अत्र उपमेयं गौणं विद्यते। उपमानञ्च सर्वोत्कृष्टम्। किन्तु उपमानस्य वर्णनं प्रायः काल्पनिकं वर्तते। उपमानोपमेययोः सादृश्यभावना तु भवत्येव। सन्देहः तथा च निश्चयः इत्यनयोः मध्यतमास्थितिः सम्भावनेति।

१) **वस्तूत्प्रेक्षा** – यदा कस्यचित् वस्तुनः अन्यवस्तुना सह तादात्म्यं सम्भवति तदा सा वस्तूत्प्रेक्षा। अर्थात् उपमानस्य स्वरूपम् अवगत्य उपमेयेन सह वा अप्रकृतधर्मं वीक्ष्य प्रकृतेन सह वा सम्भावनं लक्षयति अतः स्वरूपोत्प्रेक्षा इत्यपि सम्बोधनम्। इयं वस्तूत्प्रेक्षा उक्तानुक्तविषयेण द्विधा वर्ण्यते।

अ) **उक्तविषया वस्तूत्प्रेक्षाः –**

यदा विषयः स्पष्टरूपेण उक्तः भवति तदा उक्तविषया वस्तूत्प्रेक्षा मन्यते ।यथा–

'धूमस्तोमं तमः शङ्के कोकीविरहशुष्मणाम्' इत्यत्र अयम् अन्धकारः चक्रवाक्याः विरहाग्नितः निर्गतः धूमः इति शङ्के इत्यर्थः । अत्र वर्ण्यविषयः (उपमेयम्) तमः इति । तच्च उपात्तम् अत्र । अस्य वर्ण्यविषयस्य तमसः कोकीविरहाग्नि – जनितधूमस्तोमस्य च तादात्म्यसम्भावनायाः वर्णनात् उत्प्रेक्षा । अपि च विषयः उक्तोऽस्ति इत्यतः उक्तविषया वस्तूत्प्रेक्षा। अस्यैव इदमपि एकमुदाहरणं पश्यत–

**बालेन्दु वक्राण्यविकासभावात् बभुः पलाशान्यतिलोहितानि।**
**सद्यो वसन्तेन समागतानां नखक्षतानीव वनस्थलीनाम्॥**

**श्लोकार्थः -** अविकासभावात् (विकासेन विना) बालेन्दुवक्राणि ( द्वितीयायाः चन्द्रवत् वक्राणि ) अतिलोहितानि (अतिशयेन रक्तानि ) पलाशानि ( पलाशकुसुमानि ) वसन्तेन (नायकेन ) समागमं प्राप्तानां वनस्थलीनाम्( अङ्गनानाम्, वनस्थलीरूपनायिकानाम् ) सद्यः (तत्कालम् ) संभूतानि नखक्षतानीव बभुः ( अशोभत )।

अत्र पलाशमुकुलानां वक्रत्वलोहित्वसम्बन्धेन निमित्तेन सद्यः कृतनखक्षततादात्म्यसम्भावना वरीवर्ति। पलाशमुकुलानाम् अविकासभावः इति उक्तविषयः तेन हि उक्तविषया स्वरूपोत्प्रेक्षा वा वस्तूत्प्रेक्षा वेति ज्ञायते। पूर्वोदाहरणे निमित्तं नैव उक्तमस्ति किन्त्वत्र तु निमित्तभूतधर्मः वक्रत्वलोहितत्वञ्च वाच्यरूपेण उपपादितमिति भेदः।

**आ) अनुक्तविषया वस्तूत्प्रेक्षा–**

यत्र विषयभूतम् उपमेयं स्पष्टं न दृश्यते। इत्युक्ते विषयः अनुक्तः भवति तत्र अनुक्तविषया वस्तूप्रेक्षेति। यथा – 'लिम्पतीव तमोङ्गानि वर्षतीवाञ्जनं नभः।' अस्यार्थ – नभः अञ्जनवर्षां कुर्वान्निव तमः अङ्गानि लिम्पतीव भाति। वाक्येऽस्मिन् उत्प्रेक्षाद्वयं विद्यते। तमोव्यापनमिति उपमेयस्य कुत्रापि नोल्लेखः। तमोव्यापनात् नभः प्रभृति भूपर्यन्तं सकलवस्तूनां सान्द्रतया मलिनीकरणेन निमित्तधर्मेण तमःकर्तृकलेपनतादात्म्यात् उत्प्रेक्षा एका। द्वितीया च नभःकर्तृकात् अञ्जनवर्षणतादात्म्यात् उत्प्रेक्षा।

अथ चास्मिन् उदाहरणे मतभदाः दृश्यन्ते। केचन पूर्वपक्षिणः अत्र उक्तविषया उत्प्रेक्षा इत्येव मन्यन्ते। यतो हि तमसः व्यापनेन निमित्तेन लेपनकर्तृतादात्म्योत्प्रेक्षा, नभसः भूपर्यन्तं गाढनीलिमव्याप्तत्वेन निमित्तेन अञ्जनवर्षणकर्तृतादात्म्योत्प्रेक्षा चेत् उत्प्रेक्षाद्वयमुक्तविषयमेवात्र। अत्र ग्रन्थकारः तस्य उत्तरं वक्ति – लिम्पति – वर्षति इति आख्यातयोः कर्तृवाचकत्वेऽपि 'भावप्रधानमाख्यातम्' इति वचनानुसारं धात्वर्थक्रियायाः एव प्राधान्यम्। अत्र हि कर्ता क्रियायाः उपसर्जनत्वेन ( विशेषणत्वेन ) अन्वितः सम्बान्धितः वा। तस्मात् क्रियायाः अन्यत्र अन्वयः न सम्भवति। तस्मदिव अनुक्तविषया वस्तूत्प्रेक्षा एवात्र।

अनुक्तविषया उत्प्रेक्षा इतोऽपि उदाह्रियते।

**पिनष्टीव तरङ्गाग्रैः समुद्रः फेनचन्दनम्।**
**तदादाय करैरिन्दुर्लिम्पतीव दिगङ्गनाः॥**

**श्लोकार्थः** – समुद्रः तरङ्गाणाम् अग्रभागैः फेनरूपं चन्दनं पिनष्टीव ( पेषनं कुर्वन्निव ) भाति। तथा च चन्द्रः तत्फेनचन्दनम् आदाय (स्वीकृत्य) करैः ( किरणैः) दिग्रूपा अङ्गना लिम्पतीव प्रतीयते।

अत्र तरङ्गाग्रैः फेनचन्दनस्य उत्पादनं पेषणतया उत्प्रेक्ष्यते। उत्कृष्टसम्भावना एषा॥ समुद्रः चन्दनघर्षणस्य कर्ता समुद्रतटः च पेषणशीलेति। तरङ्गाः समुद्रस्य हस्ताः तथा च फेनः चन्दनमस्ति इति वर्णनम्। समुद्रात् उत्थितस्य चन्द्रस्य प्रथमं समुद्रपुरे प्रसरितानां किरणानां दिक्षु व्यापनञ्च समुद्रोपान्तफेनरूपेण चन्दनेन कृतं लेपनत्वेन उत्प्रेक्ष्यते। उभयत्र क्रमेण समुद्रपूरप्रान्तगतफेनचन्दनस्य पुञ्जीभवनं दिशां धवलीकरणं च निमित्तमिति। अपरत्र फेनरूपचन्दनस्य उत्पादनं तथा च किरणानां व्यापनम् इत्यनयोः अनुपादानात् अनुक्तविषया उत्प्रेक्षा अस्ति।

**स्वावलोकनप्रश्नाः**

1. उत्प्रेक्षालङ्कारस्य कति भेदाः ? के च ते ?
2. उत्प्रेक्षालक्षणं किम्?
3. वस्तूत्प्रेक्षा कतिविधा?
4. उत्प्रेक्षा प्रायः कैः शब्दैः प्रतिपाद्यते ?

**२. हेतूत्प्रेक्षा –**

यत्र हेतुत्वरूपसम्भावना तत्र हेतूत्प्रेक्षा। अर्थात् सम्भावनायाः हेतुविषयस्य अभिव्यक्तिः हेतूत्प्रेक्षालङ्कारे महत्त्वपूर्णा। अयमपि हेतुत्प्रेक्षालङ्कारः सिद्धासिद्धविषयभेदेन द्विधा।

अ) सिद्धविषया हेतूत्प्रेक्षा - हेतुविषयस्य स्वतः सिद्धिः सिद्धविषया हेतूत्प्रेक्षा। यथा– ‘रक्तौ तवाङ्घ्री मृदुलौ भुवि विक्षेपणाद् ध्रुवम्’। नायिकायां प्रति नायकोक्तिः अत्र – तव मृदुलौ (सुकुमारौ) अङ्घ्री (चरणौ) भूमौ विक्षेपणात् ध्रुवं (निश्चिततया) रक्तौ जातौ।

अत्र नायिकायाः चरणयोः रक्तत्वं स्वतः सिद्धम्। कविः तस्य हेतुः तस्याः भूतले विचरणमिति सम्भावयति। वस्तुतः भूमौ विचरणमिति रक्तत्वस्य हेतुः न। यतो हि सुन्दर्याः तत्तु सहजमेव। किन्तु अयमेव अहेतुः हेतुत्वेन नायकः सम्भावयति। अपि च विक्षेपणरूपविषयम् उपस्थापयति इत्यस्मात् सिद्धविषया हेतूत्प्रेक्षा अत्र। अपरमपि उदाहरणं पश्यामः।

**रात्रौ रवेर्दिवा चेन्दोरभावादिव स प्रभुः।**
**भूमौ प्रतापयशसी सृष्टवान् सततोदिते॥**

**श्लोकार्थः** – रात्रौ सूर्याभावात् दिने च चन्द्राभावात् स प्रभुः(राजा) भूमौ सततम् उदिते प्रतापयशसी सृष्टवान्।

वस्तुतः रात्रौ सूर्यः न प्रकाशते तथा च दिने चन्द्रः न प्रकाशते इति तु सर्वविदितमेव। परन्तु एतयोः द्वयोः अभावात् राजा प्रतापयशसोः निर्माणं कृतवान्निति कविः वक्ति। राज्ञः प्रतापे यशोवर्धने च सृष्टेः (निसर्गस्य) तथ्यं कारणं नास्ति। राजा सूर्यस्य कार्यं

विधातुं प्रतापं चन्द्रस्य कार्यं कर्तुं च यशः निर्मितवान् । यद्यपि सूर्याभावः चन्द्राभावश्च प्रतापयशसोः सृष्टौ हेतुः न तथापि तयोः अभावत्वं हेतुरूपेण सम्भावितमस्ति । अतः सिद्धविषया हेतूत्प्रेक्षा ।

ब) असिद्धविषया हेतूत्प्रेक्षा – यत्र हेतोः विषयः न स्वतः सिद्धः तत्र असिद्धविषया हेतूत्प्रेक्षा । यथा – 'त्वन्मुखाभेच्छया नूनं पद्मैर्वैरायते शशी' इति । हे सुन्दरि, चन्द्रोऽयं तव मुखस्य कान्तिप्राप्तेः इच्छया कमलैः सह वैरत्वमाचरति ।

अत्र हि स्वाभाविके चन्द्रपद्मविरोधे नायिकावदनकान्तिप्रेप्सा न हेतुः तथापि तस्य हेतुत्वसम्भावना इत्यस्मात् हेतूत्प्रेक्षा । वस्तुतः नायिकावदनकान्तिप्रेप्सा चन्द्रे नास्ति। तस्याः इच्छायाः अभावः अतः असिद्धविषया हेतूत्प्रेक्षा । कमलचन्द्रयोः वैरत्वं नाम चन्द्रोदयसमये विकसितं कमलं पिहितं भवति इति निसर्गसत्यम् । अस्यैव कविना अत्र प्रस्तुतीकरणं विधाय नायिकायाः पद्ममुखमिति सूचितम् । चन्द्रः तस्याः वदनसौन्दर्यं कामयते तथा च कमलमपि तदैव सौन्दर्यं चोरयति । यत् मया काम्यते तदैव कान्तिचौर्यं कमलं किमर्थमपहर्तुमिच्छति इति धिया वैरत्वं साधयति चन्द्रः इति भावः । अतः नायिकावदनकान्तिः वैरत्वहेतुः सञ्जातः। अत्र कान्तिचौर्यहेतुः असिद्धः। अतः असिद्धविषया हेतूत्प्रेक्षा। अपरमपि इदमुदाहरणं दीयते-

**विवस्वताऽनायिषतेव मिश्राः स्वगोसहस्रेण समं जनानाम् ।**
**गावोऽपि नेत्रापरनामधेयास्तेनेदमान्ध्यं खलु नान्धकारैः ॥**

श्लोकार्थः - विवस्वता (सूर्येण) स्वस्य गोसहस्रेण ( किरणसहस्रेण ) सह मिश्रिता जनानां 'नेत्रा' इति परनामधेया गावोऽपि अनायिषता (नीता) इव । तेनैव इदम् आन्ध्यम् (तमः) न तु अन्धकारैः ।

यथा कश्चित् गोपालकः स्वकीयगोभिः सह मिश्रिता परकीयगावोऽपि नयति तथैव अयं सूर्योऽपि किरणेषु मिश्रितां जनानां नेत्ररूपां गां नीतवान् । तस्मात् अन्धकारः इति ।

श्लोकेऽस्मिन् सूर्येण कृतं स्वकिरणैस्सह जनलोचनानां नयनम् अन्धकारस्य हेतुरिति वर्णितम् । वस्तुतः सूर्यः जनलोचनानि नैव नीतवान् । किन्तु एषा नयनक्रिया सम्भाविता अभवत् । अतः अहेतुः हेतुत्वेन उत्प्रेक्ष्यते अतः असिद्धविषया उत्प्रेक्षा सिध्यति ।

**३. फलोत्प्रेक्षा** – यत्र सम्भावना फलत्वेन विवक्षिता तत्र फलोत्प्रेक्षेति । अफलस्य फलत्वेन उत्प्रेक्षणमिति । साऽपि सिद्धासिद्धविषयत्वेन द्विधा ।

**अ. सिद्धविषया फलोत्प्रेक्षा** –

सम्भावनायां फलस्य स्वतः सिद्धता सिद्धविषया फलोत्प्रेक्षेति । यथा – 'मध्यः किं कुचयोर्धृत्यै बद्धः कनकदामभिः ।' 'हे, सुन्दरि, स्तनयोः धारणार्थं तव मध्यभागः

कनकरज्जुभिः बद्धः किम् ? इत्यत्र सिद्धविषया फलोत्प्रेक्षा । वस्तुतः कुचधारणे तस्याः शरीरमेव हेतुः। किन्त्वत्र कनकरज्जुः (उदरे स्थिता लवानाम् आवली या सुवर्णवर्णीया भवति) हेतुरिति उपस्थापितम् । अत्र मध्यभागरूपकर्त्रा कुचधारणफलत्वेन उत्प्रेक्षा अतःफलोत्प्रेक्षा। विषयः पूर्वतः सिद्धोऽपि 'बन्धनम्' इति। अतः सिद्धविषया फलोत्प्रेक्षा । अन्यदपि उदाहरणं प्रदीयतेऽत्र ।

**पूरं विधुर्वर्धयितुं पयोधेः शङ्केऽयमेणाङ्कमणिं कियन्ति ।**
**पयांसि दोग्धि प्रियविप्रयोगे सशोककोकीनयने कियन्ति ॥**

**श्लोकार्थः** – अयं विधुः ( चन्द्रः) पयोधेः ( सागरस्य ) पूरं वर्धयितुम् एणाङ्कमणिं (चन्द्रकान्तमणिम् ) अत्यधिकं द्रावयति । तथा च चक्रवाकी प्रियवियोगात् दुःखेन नेत्राभ्यां कियत् जलं स्रावयति ।

वस्तुतः चन्द्रात् समुद्रस्य उत्तरलं इति स्वतः सिद्धम् । किन्तु इदमेव सिद्धफलं कविः द्वयो कारणयोः सम्भावनया प्रदर्शयति । प्रथमं तु चन्द्रेण कृतं चन्द्रकान्तमणेः द्रावणम् अपरं तु प्रियवियोगात् चक्रवाक्याः अश्रुस्रावणमिति । एतौ द्वौ अपि समुद्रस्य जलं वर्धयितुं कथं प्रयततः ? इति ज्ञापयति कविः । अत्र हि चन्द्रेण कृतं समुद्रस्य जलवर्धनं सत्यमेव परन्तु तदा तेन कृतस्य चन्द्रकान्तद्रावणस्य कोकाङ्गनाबाष्पस्रावणस्य च फलत्वेन उत्प्रेक्षते इति सिद्धविषया फलोत्प्रेक्षा।

**ब) असिद्धविषया फलोत्प्रेक्षा –**

फलस्य असिद्धता असिद्धविषया फलोत्प्रेक्षा । यथा – 'प्रायोब्जं त्वत्पदेनैक्यं प्राप्तुं तोये तपस्यति ।' 'हे सुन्दरि, प्रायः भवत्याः चरणाभ्याम् अद्वैतं प्राप्तुं कमलमिदं जले तपः करोति ।'

कमलस्य जले अवस्थानं स्वाभाविकमेव । किन्त्वत्र कामिन्याः पदसाम्यप्राप्तिं कर्तुं कमलस्य जले तपः सम्भावितम् । अत्र तपसः कर्म कामिनीचरणसायुज्यप्राप्तिः न फलत्वेन सिध्यति । कमलस्य तपस्यारूपफलसिद्धिः नैव शक्या । अतः असिद्धविषया फलोत्प्रेक्षा । अस्य इतोऽपि एकमुदाहरणं प्रदीयते ।

**रथस्थितानां परिवर्तनाय पुरातनानामिव वाहनानाम् ।**
**उत्पत्तिभूमौ तुरगौत्तमानां दिशि प्रतस्थे रविरुत्तरस्याम् ।।**

**श्लोकार्थः** – मन्ये, सूर्यः स्वकीयरथस्थितानां पुरातनानाम् अश्वानां परिवर्तनाय तुरगोत्तमानां उत्पत्तिभूमौ उत्तरस्यां दिशि प्रतस्थे ।

अत्र उत्तरायणस्य कारणम् अश्वपरिवर्तनं नास्ति । अथवा तुरगपरिवर्तनाय उत्तरायणमपि न। किन्तु कविना उत्तरायणस्य अश्वपरिवर्तनम् असदेव फलत्वेन उत्प्रेक्ष्यते इति असिद्धविषया फलोत्प्रेक्षा।

एवमेताः षड्विधाः उत्प्रेक्षाः। उत्प्रेक्षाव्यञ्जकत्वेन परिगणितानां शब्दानां प्रयोगे वाच्योत्प्रेक्षा तथा च तेषामप्रयोगे गम्योत्प्रेक्षेति उपर्युक्तानां उत्प्रेक्षाप्रकाराणां द्वैविध्यमस्ति। उत्प्रेक्षाव्यञ्जकाः के शब्दाः? प्रस्तुतकारिका तेषां शब्दानां सूचिकारूपम्।

**मन्ये-शङ्के-ध्रुवं-प्रायो-नूनमित्येवमादिभिः।**

**उत्प्रेक्षा व्यज्यते शब्दैरिव शब्दोऽपि तादृशः।।**


**स्वावलोकनप्रश्नाः**

1. उत्प्रेक्षाव्यञ्जकाः के शब्दाः?
2. फलोत्प्रेक्षायाः कति भेदाः?
3. हेतूत्प्रेक्षायाः लक्षणं किम्?
4. उत्प्रेक्षाव्यञ्जकशब्दाभावे का उत्प्रेक्षा विधीयते?
5. हेतोः स्वतः सिद्धिः कस्मिन् अलङ्कारे दृश्यते?

### २.३.२.२. अतिशयोक्तिः

अध्यवसायमूलकान्तर्गतालङ्कारेषु एकतरोऽयम् अतिशयोक्तिः अलङ्कारः । अलङ्कारेषु अतीव महत्त्वपूर्णः कविप्रियश्चायम् । भामहाचार्येण तु सर्वालङ्कारणां प्राणतत्त्वोऽयमलङ्कार इति उपनिबद्धम् । तस्मादेव '**यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना**' इति तेन (भामहेन) अस्यालङ्कारस्य माहात्म्यं प्रतिपादितम् । काव्येषु चमत्कृतिजन्या अतिशयेन उक्तिः अतिशयोक्तिरिति।

अस्याः अतिशयोक्तेः प्रकाराः अधोर्निर्दिष्टाः।




अधुना एषां सर्वेषां सोदाहरणं विश्लेषणं समुपस्थाप्यते।

**१. रूपकातिशयोक्तिः** –

**रूपकातिशयोक्तिः स्यान्निगीर्याध्यवसानतः ।**
**पश्य नीलोत्पलद्वन्द्वान्निःसरन्ति शिताः शराः ।।**

यत्र विषयस्य (उपमेयस्य) स्वशब्देन उल्लेखनं विनापि विषयिवाचकेन एव (उपमानवाचकशब्देन एव ) ग्रहणम् उपस्थापनं वा क्रियते । तत्र विषयनिगरणेन विषयस्य विषयिरूपतया अध्यवसानं (अभेदनिश्चयः) रूपकातिशयोक्तिः ।

उपमानेन एव उपमेयस्य बोधोऽत्र । उपमानं विषयस्य निगरणं कृत्वा (विषयम् आत्मनि निलीनं कृत्वा ) विषयिरूपेण एव यत्र अभेदनिश्चयं दर्शयति तत्र रूपकातिशयोक्तिः । 'निगीर्याध्यवसानम्' इत्यनेन विषयिणः कार्यद्वयं सूच्यते । प्रथमं तु विषयनिगरणं द्वितीयञ्च तावत् अध्यवसानम् इति। यथा – 'पश्य नीलोत्पलद्वन्द्वान्निःसरन्ति शिताः शराः।' इत्यस्मिन् उदाहरणे नायिकायाः नेत्रयुगलात् कटाक्षाः निःसरन्ति इति वक्तव्ये तदनुक्त्वा नीलोत्पलद्वन्द्वात् तीक्ष्णाः शरा निस्सरन्ति इति प्रोक्तम् । अत्र नायिकायाः नेत्रयुगलस्य (विषयस्य) नीलोत्पलद्वन्द्वेन (विषयिणा) तथा च कटाक्षाणां (विषयस्य) शीतशरत्वेन (विषयिणा) निगरणं विधाय द्वयोः अध्यवसानात् (अभेदनिश्चयात्) रूपकातिशयोक्त्यलङ्कारः । अपरमपि उदाहरणमत्र –

**वापी कापि स्फुरति गगने तत्परं सूक्ष्मपद्या**
**सोपानालीमधिगतवती काञ्चनीमैन्द्रनीली ।**
**अग्रे शैलौ सुकृतिसुगमौ चन्दनच्छन्नदेशौ**
**तत्रत्यानां सुलभममृतं सन्निधानात्सुधांशोः ॥**

श्लोकेऽस्मिन् कश्चित् कविः नायिकायाः मध्यभागादारभ्य मुखपर्यन्तं सौन्दर्यं वर्णयति ।

गगने कापि वापि स्फुरति (तद्वद्गम्भीरा नाभिः शोभते ) । तत्परं तदूर्ध्वभागे ऐन्द्रनीली (इन्द्रनीलघटिता) सूक्ष्मपद्या सूक्ष्मसरणिः वा ( तादृशी श्यामा रोमावलिः) स्फुरति । काञ्चननिर्मितां सोपानपङ्क्तिमधिगतवती सा ( तत्सदृशीं त्रिवलीं प्राप्तवती ।) तथा अग्रे तदूर्ध्वदेशे चन्दनाच्छादितौ शैलौ (तद्वत्तुङ्गविशालौ चन्दनलेपितौ स्तनौ ) स्फुरतः यौ पुण्यकृतां सुगमौ स्तः । तत्रत्यानां सुधांशोः सन्निधानात् अमृतं सुलभम् । (तत्र गतानां आह्लादकस्य मुखस्य समीपात् अधरमाधुर्यं सुलभम् ।)

अत्र वापी, गगनं, सूक्ष्मपद्या, सोपानाली, शैलः, अमृतं सुधांशुः चेत्यादिशब्दैः ( उपमानैः) क्रमशः नाभिः, मध्यभागः, रोमावलिः, त्रिवलिः, स्तनद्वयम्, अधररसः तथा च मुखम् इत्यादयः उपमेयशब्दाः निगीर्णाः । तस्मादेव अभेदनिश्चयेन अतिशयोक्तिः । परन्तु सर्वाणि रूपकाणि तेन हि रूपकातिशयोक्तिः । अत्र अतिशयोक्तौ रूपकविशेषणात् रूपके दर्शितानां सर्वभेदानामन्तर्भावः शक्यः तस्मादेव रूपकातिशयोक्तिः इति नामकरणम् । अतः रूपकालङ्कार इव अभेदातिशयोकितिः ताद्रूप्यातिशयोक्तिरिति द्वैविध्यं द्रष्टव्यम् । तत्रापि आधिक्यन्यूनताविभागश्चेति सर्वम् अनुसंधेयम् ।

**२. सापह्नवा अतिशयोक्तिः –**

**यद्यपह्नुतिगर्भत्वं सैव सापह्नवा मता ।**
**त्वत्सूक्तिषु सुधाराजन्भ्रान्ताः पश्यन्ति तां विधौ ॥**

यदि अपह्नुतिगर्भत्वं तर्हि सा सापह्नवा। यत्र अतिशयोक्तिः अपह्नुति - अलङ्कारेण युक्ता तत्र सापह्नवा अतिशयोक्तिः इति मन्यते।

यथा – 'हे राजन्! त्वत्सूक्तिषु सुधा अस्ति। किन्तु भ्रान्ताः तां विधौ(चन्द्रे) पश्यन्ति'।

अत्र त्वत्सूक्तिमाधुर्यमेव अमृतमित्यतिशयोक्तिः। चन्द्रमण्डलस्थं अमृतं न भवतीति अपह्नुतिगर्भा। यतः चन्द्रस्थितामृतस्य निषेधं विधाय सूक्तिरूपे संस्थापनम् अस्ति। अत्र हि सूक्तिमाधुर्यस्य विषयस्य निगरणेन सुधाभेदाध्यवसायात् अतिशयोक्तिः। तथैव प्रस्तुतोदाहरणे –

**मुक्ताविद्रुममन्तरा मधुरस; पुष्पं परं धूर्वहं**
**प्रालेयद्युतिमण्डले खलु तयोरेकासिका नार्णवे।**
**तच्चोदञ्चति शङ्खमूर्ध्नि, न पुनः पूर्वाचलाभ्यन्तरे**
**तानीमानि विकल्पयन्ति त इमे येषां न सा दृक्पथे॥**

कश्चित् कविः श्लोकेऽस्मिन् सुन्दर्याः वर्णनं करोति। मौक्तिकं प्रवालमनयोर्मध्ये मधुरसः। पुष्पं केवलं (धूर्वहम्) भारवाहकं न तु मधुरसयुक्तम्। तयोः मुक्ताविद्रुमयोः खलु (निश्चितं) प्रालेयद्युतिमण्डले (चन्द्रमण्डले) एकासिका (एकस्मिन् अवस्थितिः) न तु समुद्रे। तच्च (चन्द्रमण्डलञ्च) शङ्खस्य (ग्रीवायाः) मूर्ध्नि (मस्तके) उदयं प्राप्नोति। न पुनः पूर्वाचलस्य उदयगिरेः अभ्यन्तरे। तानि इमानि वस्तूनि ते इमे जनाः विकल्पयन्ति येषां सा (सुन्दरी) दृक्पथे (लोचनमार्गे) नागाता।

अत्र मुक्ताविद्रुममधुरसप्रालेयद्युतिमण्डलशङ्खशब्दैः क्रमेण दन्ताधरतन्माधुर्यमुखकण्ठाः निगीर्णाः। अधररस एव मधुरस इत्याद्यतिशयोक्तिः। पुष्परस मधुरसः न भवतीत्यपह्नुतिगर्भा इत्यतः सापह्नवा अतिशयोक्तिः।

अलङ्कारसर्वस्वकारः रुय्यकः स्वरूपोत्प्रेक्षायामपि सापह्नवा भेदं कल्पयति। यथा –

**गतासु तीरं तिमिघट्टनेन ससंभ्रमं पौरविलासिनीषु।**
**यत्रोल्लसत्फेनततिच्छलेन मुक्ताट्टहासैव विभाति शिप्रा॥**

**श्लोकार्थः** – यदा पौरविलासिन्यः तिमीनां (मत्स्यानां) संघट्टनेन ससंभ्रमं (सभयं) तीरं प्रति गच्छन्ति तदा नगर्यां शिप्रानदी उल्लसन्तीनां फेनततीनां (फेनसमूहानां) छलेन मुक्तः अट्टहास एव कुर्वती विभाति (शोभते)।

अत्र नेयं फेनततिः इति अपह्नवप्रतीतेः सापह्नवत्वम्। तत्रैव अट्टहासत्वम् उत्प्रेक्षितम्। इह तु पर्यस्तापह्नुतिगर्भत्वम्।

स्वरूपोत्प्रेक्षायामपि पर्यस्तापह्नुतिगर्भत्वं सम्भवतीत्यस्य इदम् उदाहरणं प्रदीयते।

**जानेऽतिरागादिदमेव बिम्बं बिम्बस्य च व्यक्तमितोऽधरत्वम्।**
**द्वयोर्विशेषावगमाक्षमाणां नाम्नि भ्रमोऽभूदनयोर्जनानाम्॥**

नैषधीयचरितस्य सप्तमसर्गे उद्धृतोऽयं श्लोकः । दमयन्त्याः अधरवर्णनमिदम् – अतिरागात् इदमिव बिम्बं जाने । बिम्बस्य च इतः अधरत्वं व्यक्तम् । द्वयोःविशेषावगमाक्षमाणां (द्वयोः भेदम् अजानन्तः) जनानाम् अनयोः द्वयोः नाम्नि भ्रमः अभूत् ।

वास्तविकबिम्बफलस्य अपेक्षया अधरोष्ठबिम्बे अत्यधिका रक्तिमा दृश्यते । तेन हि मूलबिम्बफलं निकृष्टमिति भावः । किन्तु द्वयोः तारतम्यं नैव जानन्ति इत्युक्त्वा प्रसिद्धबिम्बफले बिम्बतापह्नुत्यातिरागेण निमित्तेन दमयन्त्याः अधरे तदुत्प्रेक्षा पर्य स्तापह्नुतिगर्भा ।

अधुना फलोत्प्रेक्षायां पर्यस्तापह्नुतिगर्भत्वं दर्शयितुमिदम् उदाहरणम् –

**रवितप्तो गजः पद्मांस्तद्बन्धूनम्बाधितुं ध्रुवम् ।**
**सरो विशति न स्नातुं गजस्नानं हि निष्फलम् ।।**

श्लोकार्थः – रवितप्तः ( सूर्यकिरणैः सन्तप्तः ) गजः स्नातुं सरः न प्रविशति ( अपि तु ) तद्बन्धून् पद्मान् ( तस्य बन्धून् पद्मान् ) बाधितुम् (पीडयितुम् इति ) । ध्रुवं (निश्चयेन ) हि गजस्नानं निष्फलम् ।

अस्मिन् श्लोके गजस्य सरःप्रवेशं प्रति फले स्नाने फलत्वमपह्नुत्य पद्मबाधने तन्निवेशितम्। त्रिविधासु उत्प्रेक्षासु एवमेवसर्वत्र चिन्तनीयम्।

**३. भेदकातिशयोक्तिः**

**भेदकातिशयोक्तिस्तु तस्यैवान्यत्ववर्णनम् ।**
**अन्यदेवास्य गाम्भीर्यमन्यद्धैर्यं महीपतेः ।।**

यत्र तस्यैव ( विषयस्य ) अन्यत्ववर्णनं तत्र भेदकातिशयोक्तिः । यथा – अस्य राज्ञः गाम्भीर्यम् अन्यदेव, धैर्यञ्च अन्यदेव । अत्र लोकप्रसिद्धं गाम्भीर्यं धैर्यञ्चानयोः राज्ञः गाम्भीर्येण धैर्येण च समम् अभेदे सति भेदप्रदर्शनमस्ति । अतः भेदकातिशयोक्तिः वर्तते । भेदकः इत्युक्ते भेदसूचकः ।

अपरञ्चोदाहरणम् –

**अन्येयं रूपसम्पत्तिरन्या वैदग्ध्यधोरणी ।**
**नैषा नलिनपत्राक्षी सृष्टिस्साधारणी विधेः ।।**

**श्लोकार्थः** – इयं रूपसम्पत्तिः अन्या । इयं वैदग्ध्यधोरणी ( चातुर्यपरिपाटी ) अन्या । एषा नलिनपत्राक्षी विधेः ( ब्रह्मदेवस्य ) साधारणी सृष्टिः न ।

इयं कमललोचना सुन्दरी ब्रह्मदेवस्य साधारणी सृष्टिः नास्ति । यतो ह्यस्याः सौन्दर्यं चातुर्यपरिपाटी च भिन्नमेव । अतः भेदाकातिशयोक्तिः ।

**४. सम्बन्धातिशयोक्तिः** –

**सम्बन्धातिशयोक्तिस्स्यादयोगे योगकल्पनम् ।**
**सौधाग्राणि पुरस्यास्य स्पृशन्ति विधुमण्डलम् ।।**

अयोगे योगकल्पनम् इत्युक्ते कस्यचित् केनचित् असम्बन्धेऽपि सम्बन्धकल्पनं सम्बन्धातिशयोक्तिः । यथा – अस्य नगरस्य सौधाग्राणि (भवनोन्नतानि अग्राणि ) विधुमण्डलस्य (चन्द्रमण्डलस्य) स्पर्शं कुर्वन्ति । अत्र हि नगरसौधाग्राणां चन्द्रमण्डलेन असम्बन्धेऽपि सम्बन्धकल्पनम् इत्यस्मात् सम्बन्धातिशयोक्तिः । इतोऽपि एकमुदाहरणमिदम्–

**कतिपयदिवसैः क्षयं प्रयायात् कनकगिरिः कृतवासरावसानः ।**
**इति मुदमुपयाति चक्रवाकी वितरणशालिनि वीररुद्रदेवे ।।**

**श्लोकार्थः -** वीररुद्रदेवस्य दानशीलत्वात् चक्रवाकी सन्तोषमाप्नोति यत् कतिपयदिवसैः वासरस्य (दिनस्य) नाशकर्ता कनकगिरिः (सुमेरुः) क्षयं प्राप्नुयादिति ।

अत्र हि चक्रवाक्याः सूर्यास्तमयकारकस्य सुमेरोः क्षय-सम्भावनया प्रयुक्तसन्तोषा-सम्बन्धेऽपि तत्सम्बन्धः वर्णितः ।

**स्वावलोकनप्रश्नाः -**

1. अतिशयोक्त्यलङ्कारस्य कति प्रकाराः ? के च ते ?
2. अतिशयोक्तेः लक्षणं किम् ?
3. रूपकातिशयोक्तिः कदा भवति ?
4. भेदकातिशयोक्तेः किं वैशिष्ट्यम्?
5. अयोगे योगकल्पनं कुत्र वर्तते ?

**४. असम्बन्धातिशयोक्तिः -**

**योगेऽप्ययोगोऽसम्बन्धातिशयोक्तिरितीर्यते ।**
**त्वयि दातरि राजेन्द्र ! स्वर्द्रुमान्नाद्रियामहे ।।**

योगेऽपि सम्बन्धेऽपि अयोगः असम्बन्धः यत्र प्रतिपाद्यते तत्र असम्बन्धातिशयोक्तिः ।

यथा – हे राजन् ! त्वयि दातरि स्वर्द्रुमाः ( कल्पवृक्षाः ) नैव आद्रियन्ते । अर्थात् त्वम् इव दाता भूतले उपस्थितः चेत् कल्पवृक्षाः आदरं न प्राप्नुवन्ति। अत्र हि स्वर्द्रुमेषु यः आदरः तस्य सम्बन्धेऽपि असम्बन्धप्रतिपादनमस्ति। अन्यदपि उदाहरणं पश्यत।

**अनयोरनवद्याङ्गि ! स्तनयोर्जृम्भमाणयोः ।**
**अवकाशो न पर्याप्तस्तव बाहुलतान्तरे ।।**

**श्लोकार्थः** – हे अनवद्याङ्गि ! (अनिन्दनीयावयवसहिता) तव जृम्भमाणयोः ( वर्धमानयोः ) स्तनयोः बाहुलतान्तरे पर्याप्तः अवकाशः न वर्तते ।

अत्र बाहुलतयोः मध्ये स्तनपर्याप्तः अवकाशसम्बन्धेऽपि तदसम्बन्धः उक्तः अतः असम्बन्धातिशयोक्तिः ।

**६. अक्रमातिशयोक्तिः –**

**अक्रमातिशयोक्तिः स्यात् सहत्वे हेतुकार्ययोः ।**
**आलिङ्गन्ति समं देव ! ज्यां शराश्च पराश्च ते ।।**

अक्रमातिशयोक्तेः लक्षणं यत् हेतुकार्ययोः (कारणकार्ययोः) सहत्वं ( समकालत्वम् ) यत्र सञ्जायते तत्र अक्रमातिशयोक्तिरिति । वस्तुतः 'कार्यात् पूर्वं कारणं विद्यते' इति प्रसिद्धम् । किन्त्वत्र अयं पौर्वापर्यक्रमम् उल्लङ्घ्य कार्यकारणयोः समकालत्वं वर्ण्यते अतः अक्रमातिशयोक्तिः । यथा – हे देव ! तव बाणाः शत्रवश्च ज्यां ( प्रत्यञ्चां पृथिवीं च ) समम् आलिङ्गन्ति ।

अत्र शरसन्धानकार्यं शत्रूणां भूमौ पतनञ्च समकाले एव भवतः । वस्तुतः पूर्वं प्रत्यञ्चायां बाणसन्धानं ततः शत्रोः भूमौ पतनमावश्यकम् । किन्त्वत्र कार्यकारणयोः सहभावः निर्दिष्टः अतः अक्रमातिशयोक्तिः ।अन्यदेकमुदाहरणम् –

**मुञ्चति मुञ्चति कोशं भजति च भजति प्रकम्पमरिर्वाः ।**
**हम्भीरवीरखड्गे त्यजति त्यजति क्षमामाशु ।।**

**श्लोकार्थः –** हम्भीरसंज्ञकस्य वीरस्य खड्गः यदा कोशं मुञ्चति तदैव अरिवर्गः अपि कोशं (धनभाण्डारं) मुञ्चति । यदा प्रकम्पितः खड्ग तदा शत्रुवर्गोऽपि (मृत्युभयात्) कम्पते। यदा खड्गः क्षमां त्यजति (निर्दयः भवति) तदा शत्रुवर्गोऽपि शीघ्रमेव क्षमां (पृथ्वीं) त्यजति ।

अत्र खड्गस्य कोशत्यागादिकाले एव रिपूणां धनगृहत्यागादिकार्ये अपौर्वापर्यम् अक्रमातिशयोक्तिः अलङ्कारं प्रदर्शयति ।

**७. चपलातिशयोक्तिः –**

**चपलातिशयोक्तिस्तु कार्ये हेतुप्रसक्तिजे ।**
**यास्यामीत्युदिते तन्व्या वलयोऽभवदूर्मिका ।।**

यत्र हेतोः प्रसक्तिज्ञानमात्रेण कार्योत्पत्तिः तत्र चपलातिशयोक्तिः । अर्थात् कारणस्य केवलं ज्ञानं भवति चेदपि कार्यसिद्धिः वर्तते । यथा – यास्यामि इति उक्ते सति तन्व्याः ऊर्मिका (अङ्गुलीयकम्) कङ्कणम् अभवत् ।

अत्र नायकप्रयाणप्रसक्तिमात्रेण नायिकायाः कृशत्वं (दुर्बलत्वम्) अभवत् । अतः अङ्गुलीयकं वलयमभवदिति वर्णनम् । अत्र प्रयाणज्ञानेनैव कृशत्वकार्यसिद्धिः प्रस्तुता अतः चपलातिशयोक्तिः । इदमपि उदाहरणं आलोकयत –

**आदातुं सकृदीक्षितेऽपि कुसुमे हस्ताग्रमालोहितं**
**लाक्षारञ्जनवार्तयापि सहसा रक्तं तलं पादयोः ।**

**अङ्गानामनुलेपनस्मरणमप्यत्यन्तखेदावहं**
**हन्ताधीरदृशः किमन्यदलकामोदोऽपि भारायते ॥**

अत्र सहजसौकुमार्यवत्याः विरहदशायां तदतिशयवर्णनमिदम्।

श्लोकार्थः – पुष्पं ग्रहीतुं सा एकवारं तत् पश्यति चेदपि तस्याः हस्ताग्रम् आरक्तं भवति। यदा लाक्षारञ्जनस्य वार्तयापि सहसा तस्याः पादयोस्तलं रक्तं भवति। अङ्गानां चन्दनादिना अनुलेपनस्य स्मरणेनैव सा कष्टमनुभवति। हा हन्त! तस्याः चञ्चलनेत्रवत्याः कृते तु केशकलापे सुगन्धलेपनमपि भारयते (भारस्वरूपमस्ति)।

श्लोकेऽस्मिन् तत्तत् कारणात् तत्तत्क्रियोत्पत्तिः समभवति। परन्तु अत्र तु हेतुकार्ययोः हेतुप्रसक्तकार्ययोरपि समकालत्वं सूचयति अतः चपलातिशयोक्तिः।

**८.अत्यन्तातिशयोक्तिः –**

**अत्यन्तातिशयोक्तिस्तु पौर्वापर्यव्यतिक्रमे ।**
**अग्रे मानो गतः पश्चादनुनीता प्रियेण सा ॥**

यत्र हेतुकार्ययोः पौर्वापर्ये व्यतिक्रमः वैपरीत्यं वा वर्ण्यते तत्र अत्यन्तातिशयोक्तिः व्यज्यते। अर्थात् कार्यस्य प्राग्भावत्वं कारणस्य च परभावित्वं दृश्यते सा अत्यन्तातिशयोक्तिः । अस्मिन् लोके पुष्पं पूर्वं ततः फलमिति प्रसिद्धक्रमः परन्तु तस्य वैपरीत्यं नाम प्राक् फलं ततः पुष्पम् इति काव्ये वर्ण्यते अतः अत्यन्तातिशयोक्तिः । यथा अभिमानोऽस्ति अग्रे गतः नाम पूर्वमेव नष्टः ततः प्रियेण सा अनुनीता ।

अत्र नायिकायाः मानापनोदनकार्यमस्ति । परञ्च तत्कार्यमत्र नायकस्य अनुनयक्रियारूपकारणात् प्रागेव सञ्जातम् । यद्यपि कार्यात् पूर्वं कारणं कारणादनन्तरं कार्यमिति पौर्वापर्यं तथापि तस्य व्यतिक्रमवर्णनं कार्यसिद्धतां व्यञ्जयितुं क्रियते । यथा वा –

**कवीन्द्राणामासन् प्रथमतरमेवाङ्गणभुव-**
**श्चलद्भृङ्गासङ्गाकुलकरिमदामोदमधुराः ।**
**अमी पश्चात्तेषामुपरि पतिता रुद्रनृपतेः**
**कटाक्षाः क्षीरोदप्रसरदुरुवीचीसहचराः ॥**

श्लोकेऽस्मिन् महाराजरुद्रस्य दातृत्ववर्णनं दृश्यते ।

श्लोकार्थः – कवीन्द्राणाम् अङ्गणभुवस्तु प्रथममेव चञ्चलभ्रमराणां कुलैः करिमदगन्धैः च आपूरिताः आसन् । पश्चात् तेषामुपरि रुद्रनृपतेः क्षीरसमुद्रस्य प्रसरन्तीनाम् बृहत्तरङ्गाणां सहचराः इव कटाक्षाः पतिताः ।

महाराजरूद्रस्य कृपाकटाक्षपातेनैव कवीन्द्राणाम् अङ्गणेषु गजानामुपस्थितिः शक्या । परन्तु अत्र कविना आदौ गजानामुपस्थितिरिति कार्यं, पश्चात् रुद्रदेवस्य कृपाकटाक्षरूपकारणं समुपवर्णितम् । अतः अत्यन्तातिशयोक्तिः ।

ज्ञातव्यं यत् अक्रमातिशयोक्तिः, चपलतिशयोक्तिः तथा च अत्यन्तातिशयोक्तिः इत्येताः तिस्रोऽपि कार्यशीघ्रतां व्यञ्जयितुमेव सन्ति। इत्थम् अतिशयोक्ते भेदाः उपन्यस्ताः।

**२.४. उपसंहारः**

द्वितीयखण्डेऽस्मिन् अस्माभिः सादृश्यगर्भालङ्कास्य द्वितीयभेदः उपवर्णितः । तत्र हि अभेदप्रधानस्य उपभेदद्वयं सविस्तरं प्रतिपादितम् । उपभेदेषु समाविष्टानां सर्वेषामलङ्कारणां लक्षणं प्रदाय उदाहरणानि उल्लिखितानि । अभेदप्रधानालङ्कारस्य उपभेदः 'आरोपमूलकः' इत्यत्र रूपक-परिणाम-स्मृति-भ्रान्ति-सन्देह-उल्लेख-अपह्नुत्यालङ्काराः निरूपिताः । तथैव अध्यवसायमूलके उपभेदे उत्प्रेक्षातिशयोक्त्योः वर्णन विहितम्। तेषु सर्वेषु अवधेयांशाः अपि तत्र तत्र विश्लेषिताः। इतःपरं सादृश्यमूलकालङ्कारस्य तृतीयभेदविस्तारः तृतीयखण्डे क्रियते।

# कुवलयानन्दः

## तृतीयखण्डः

**संरचना**

३.०. प्रस्तावना

३.१. लक्षिताधिगमविशेषाः

३.२. सादृश्यमूलकालङ्कारस्य तृतीयभेदः – गम्यौपम्याश्रयालङ्कारः

३.२.१. तुल्ययोगिता

३.२.२. दीपकः

३.२.२.१. दीपकालङ्कारविषये उपस्थितशङ्कायाः समाधानाम्

अ) आवृत्तिदीपकः

३.२.३. प्रतिवस्तूपमा

३.२.४. दृष्टान्तः

३.२.५. निदर्शना

३.२.६. व्यतिरेकः

३.२.७. सहोक्तिः

३.२.८. विनोक्तिः

३.२.९. समासोक्तिः

३.२.१०. परिकरः

३.२.११. परिकराङ्कुरः

३.३. उपसंहारः

**३.०. प्रस्तावना** –

इतःपूर्वं खण्डद्वये अस्माभिः सादृश्यगर्भालङ्कारस्य भेदद्वयं उपदिष्टम् । तत्र समाविष्टालङ्काराणां सविस्तृतं विवेचनमपि प्रदत्तम् । उपमानोपमेययोः भेदाभेदप्राधान्यम् अभेदमूलत्वञ्च भवन्तः सम्यक् पर्यालोचितवन्तः । उभयत्रापि सादृश्यमतीव महत्त्वं भजते इत्यवलोकितं भवद्भिः । सम्प्रति तादृशमेव सादृश्यगर्भालङ्कारस्य तृतीयभेदं निरूपयितुं खण्डोऽयं प्रारभते ।

### ३.१. लक्षिताधिगमविशेषाः

- सादृश्यगर्भालङ्कारस्य तृतीयभेदः छात्रैः अवगम्यते ।
- गम्यौपम्याश्रयालङ्कारे अन्तर्भूतानां कतिचन अलङ्काराणां ज्ञानं प्राप्नोति ।
- प्रत्यलङ्कारवैशिष्ट्यमवगत्य उदाहरणमपि जानति ।
- अन्यकाव्येषु तेषामलङ्काराणां परीक्षणं कर्तुं प्रभवति ।
- अलङ्कारयोजनया काव्यसौन्दर्यवर्धनं कथं भवति? इत्यपि अवगच्छति ।

### ३.२. सादृश्यमूलकालङ्कारस्य तृतीयभेदः– गम्यौपम्याश्रयालङ्कारः

त्रिषु सादृश्यमूलकालङ्कारेषु एकतमः गम्यौपम्याश्रयालङ्कारः । गम्यायाः उपमायाः भावः गम्यौपम्यम् । तस्य आश्रयेण स्थितोऽलङ्कारः गम्यौपम्याश्रयालङ्कारः । प्रकृताप्रकृतयोः (उपमानोपमेययोः) सादृश्ये भेदाभेदत्वम् अभेदत्वञ्च इतःपूर्वम् अवलोकितमस्माभिः । तत्र सादृश्यं वाच्यं भवतीति वैशिष्ट्यम् । परन्तु अत्र गम्यौपम्याश्रये तयोः वर्ण्यावर्ण्ययोः (उपमानोपमेययोः) सादृश्यं वाच्यं नास्ति। उपमायाः गम्यत्वं (अवाच्यत्वम्) तत्र दृश्यते । सादृश्यगर्भः इत्यस्मात् सादृश्यं तु भवत्येव किन्तु व्यङ्ग्यत्वेन तिष्ठति, न स्पष्टतया । उपमानोपमेययोः एकधर्मसम्बन्धात् धर्मैक्यं तत्र प्रतीयते । यद्यपि गुणक्रियाभावादिरूपैकधर्मान्वयः तथापि गम्यौपम्यमूलकत्वं प्रामुख्यं भजते । तस्मादेव गम्यौपम्याश्रयालङ्कारः इति तृतीयभेदः समुल्लसति । अत्र हि तुल्ययोगितादीपकादयः बहवः अलङ्काराः समावेशं प्राप्नुवन्ति । अधुना तेषामेव विवेचनं क्रियते ।

### ३.२.१. तुल्ययोगितालङ्कारः

तुल्यम् = युगपत्, योगिता = अन्वयोऽस्यामिति तुल्ययोगिता। अस्यालङ्कारस्य लक्षणमस्ति –

**'वर्ण्यानामितरेषां वा धर्मैक्यं तुल्ययोगिता'** इति ।

अर्थात् प्रस्तुतानाम् अप्रस्तुतानां वा गुणक्रियारूपैकधर्मान्वयः तुल्ययोगिता । इयं तुल्ययोगिता द्विधा – प्रस्तुतगततुल्ययोगिता अप्रस्तुतगततुल्ययोगिता चेति । सम्प्रति सोदाहरणं स्पष्टीक्रियते ।

**१. प्रस्तुतगततुल्ययोगिता–**

यत्र केवलं द्वयोः उपमेययोः धर्मैक्यं निर्दिश्यते तत्र प्रस्तुतगततुल्ययोगितालङ्कारः सम्भवति । यथा – 'सङ्कुचन्ति सरोजानि स्वैरिणीवदनानि च '।

( चन्द्रोदयादनन्तरं ) कमलानि तथा च स्वैरिणीवदनानि म्लानानि भवन्ति । अत्र हि कमलानि तथा च स्वैरिणीमुखानि प्रस्तुतं वर्तन्ते । द्वयोः प्रस्तुतयोः सङ्कोचनक्रियारूपधर्मैक्यं प्रदर्शितमस्ति। निशामुखे चन्द्रोदयादनन्तरं सर्वत्र कौमुदीप्रकाशः प्रसरति तेन हि स्वैरिणीनां बहिर्गमने स्वैरविहारे वा काठिन्यमुद्भवति। अतः तासां मुखानि सङ्कुचितानीति वर्णनमत्र। तथैव कमलसङ्कोचस्तु नैसर्गिकी क्रिया । तस्मात् सङ्कोचरूपैकक्रियान्वयात् प्रस्तुतगततुल्ययोगितालङ्कारः। तस्यैव इदमपि एकमुदाहरणं पश्यामः –

**सञ्जातपत्रप्रकारान्वितानि समुद्वहन्ति स्फुटपाटलत्वम्।**
**विकस्वराण्यर्ककराभिमर्शाद्दिनानि पद्मानि च वृद्धिमीयुः॥**

**श्लोकार्थः** – सूर्यकिरणसम्पर्कात् नवपत्राणां समूहैः युक्तानि तथा च स्फुटपाटलत्वं समुद्वहन्ति कमलानि प्रकाशमानानि दिनानि च वृद्धिङ्गतानि।

अत्र हि ग्रीष्मर्तोः वर्णनमास्ति । वसन्तेन पूर्वपत्राणां विगलनात् नवपल्लवानि अङ्कुरितानि । तानि च स्पुटपाटलत्वम् आवहन्ति । सूर्यकिरणसम्पर्कात् पद्मानि विकसन्ति दिनानि च प्रकाशमानानि सन्ति। प्रस्तुतानां ग्रीष्मदिनानां पद्मानाञ्च वर्धनक्रियारूप एकक्रियान्वयः अतः प्रस्तुततुल्ययोगितालङ्कोऽत्र।

**२. अप्रस्तुतगततुल्ययोगता–**

यत्र केवलं द्वयोः अप्रस्तुतयोः गुणक्रियारूपधर्मैक्यं प्रदर्श्यते तत्र अप्रस्तुतगततुल्ययोगितालङ्कारः भवति।

यथा –

**त्वदङ्गमार्दवे दृष्टे कस्य चित्ते न भासते।**
**मालती – शशभृल्लेखाकदलीनां कठोरता ?**

श्लोकेऽस्मिन् कश्चित् नायकः नायिकां प्रशंसति– 'तवाङ्गस्य कोमलतां दृष्ट्वा कस्य चित्ते मालतीपुष्प– चन्द्रकला-कदलीनां कठोरता न भासते? ' इति।

अत्र हि नायिकासौकुमार्यवर्णनं प्रस्तुतमस्ति । अपि च मालत्यादीनां वर्णनमप्रस्तुतम् । मालत्यादीनाम् अप्रस्तुतानां कठोरतारूपैकगुणान्वयः स्फुटोऽत्र । तेन हि अप्रस्तुतगततुल्ययोगितालङ्कारः समभवत्। अस्यैव अपरमुदाहरणं पश्यामः –

**नागेन्द्रहस्तास्त्वचि कर्कशत्वादेकान्तशैत्यात् कदलीविशेषाः।**
**लब्ध्वापि लोके परिणाहि रूपं जातास्तदूर्वोरुपमानबाह्याः॥**

पार्वत्याः ऊरुवर्णनं श्लोकेऽस्मिन् कविना क्रियते । त्वचि कर्कशत्वात् ( कठोरत्वात् ) नागेन्द्रहस्ताः (गजशुण्डाः) तथा च एकान्तशैत्यात् (सदैव शीतलत्वात् ) कदलीविशेषाः परिणाहि रूपं (विशालस्वरूपम्) लब्ध्वापि लोके तस्याः (पार्वत्याः) ऊर्वोः उपमानत्वरहिताः जाताः । अर्थात् पार्वत्याः ऊरुयुगलस्य उपमानत्वं प्राप्तुं करिशुण्डाः कदलीविशेषाश्च असमर्थाः। अत्र हि ऊरुवर्णनप्रस्तावे नागेन्द्रहस्तादीनाम् अप्रस्तुतत्वात् तेषाम् उपमानबाह्यत्वरूपैकगुणान्वयात् अप्रस्तुततुल्ययोगितालङ्कारः ।

तथैव यत्र हिताहितविषये वर्तनव्यवहरणसाम्यं वर्ण्यते तत्र अपरा तुल्ययोगितेति अपय्यदीक्षितः सूचयति । अतः **'हिताहिते वृत्तितौल्यमपरा तुल्ययोगिता'** इत्यनेन लक्षणेन तुल्ययोगितालङ्कारस्य अपरभेदं दर्शयति । प्रस्तुतोदाहरणेन तस्य स्पष्टीकरणं करोति ।

**'प्रदीयते पराभूतिः मित्रशात्रवयोस्त्वया ।'**

'हे राजन् ! त्वया मित्र-शात्रवयोः पराभूतिः प्रदीयते' इत्युल्लेखः । अत्र 'पराभूतिः' इति पदश्लेषेण परा = उत्कृष्टा, भूतिः = सम्पत्तिः तथा च पराभव इति अर्थद्वयं सूच्यते । मित्रपक्षे (हितपक्षे) सम्पत्तिदानं शत्रुपक्षे (अहितपक्षे) च पराभवदानं राज्ञा क्रियते । अतः हिताहितविषये नाम मित्रशत्रुविषये समानव्यवहारस्य दानवृत्तिप्रक्रियायाः साम्यं प्रदर्श्य तुल्ययोगितायाः अपरभेदः ज्ञापितः । द्वाभ्यां सह भिन्नव्यवहारः भूत्वापि अभेदाध्यवसायात् अभिन्नत्ववर्णनमत्र दृश्यते । अन्यदपि उदाहरणमत्र –

**यच्च निम्बं परशुना, यश्चैनं मधुसर्पिषा ।**
**यश्चैनं गन्धमाल्याद्यैः सर्वस्य कटुरेव सः ।।**

**श्लोकार्थः -** यः निम्बवृक्षं परशुना छिनत्ति, यश्च एनं मधुयुक्तेन घृतेन सिञ्चति तथा च यः एतं गन्धमाल्याद्यैः अर्चति तेषां सर्वेषां कृते वृक्षोऽयं कटुरेव भवति ।

श्लोकेऽस्मिन् निम्बवृक्षस्य त्रिविधजनैः सह कटुत्वव्यवहारः एव प्रदर्शितः । तथैव छिनत्ति, सिञ्चति, अर्चति इत्यध्याहारैः वाक्यानि पूरणीयानि । पूर्वोक्ते उदाहरणे राज्ञः स्तुतिपर्यवसानं दृश्यते द्वितीये च निम्बवृक्षस्य निन्दापर्यवसानम् अवलोक्यते अस्माभिः । सरस्वतीकण्ठाभरणे भोजराजेन अस्याः तुल्ययोगितायाः उल्लेखः कृतोऽस्ति ।

तथैव उत्कृष्टगुणानां साम्यमुक्त्वा तुल्ययोगितां प्रदर्शयितुं कविना इदमेकमुदाहरणं प्रस्तूयते–

**गुणोत्कृष्टैः समीकृत्य वचोऽन्या तुल्ययगिता ।**
**लोकपालो यमः पाशी श्रीदः शक्रो भवानपि ।।**

श्रैष्ठैः गुणैः साम्यं विवक्ष्य वचनप्रतिपादनम् अन्या तुल्ययोगिता। यथा – हे राजन्। यमः, पाशी (वरुणः), श्रीदः (कुबेरः), शक्रः (इन्द्रः) तथा च भवानपि लोकपालोऽस्ति।

वस्तुतः लोकपालपदम् इन्द्रादिषु रूढम्। अत्र वर्णनीयराजा शक्रादिभिः लोकपालत्वेन उत्कृष्टगुणः समीकृतः। अतः राज्ञि तत्पदं योगमात्रेण प्रयुक्तम्। अर्थात् लोकपालत्वमिति साधारणधर्मस्य वर्णनं तुल्ययोगितां प्रदर्शयति। अन्यदपिउदाहरणमत्र प्रदीयते।

**सङ्गतानि मृगाक्षीणां तडिद्विलसितान्यपि।**
**क्षणद्वयं न तिष्ठन्ति घनारब्धान्यपि स्वयम्॥**

**श्लोकार्थः** – स्वयं घनारब्धानि मृगाक्षीणां (हरिणी इव चञ्चलनेत्रं यासाम्) सङ्गतानि (सङ्गमाः) तथा च (मेघैः) आरब्धानि विद्युतां विलसितानि क्षणद्वयं न तिष्ठान्ति।

यथा तडिद्प्रकाशनं क्षणकालं तिष्ठति तथैव सुन्दरीणां सङ्गातिः। इत्थं वर्णनं स्त्रीणाम् क्षणिकानुरागं सूचयित्वा तासां निन्दाम् अभिप्रैति। पूर्वोक्तोदाहरणे राज्ञः स्तुतिः अपरेऽस्मिन् च निन्देति भेदः। दण्डिकृतग्रन्थे काव्यादर्शेऽपि अस्याः तुल्ययोगितायाः उल्लेखः दृश्यते। केचिदालङ्कारिकाः इमां तुल्ययोगितां सिद्धिरिति व्यवहृतवन्तः। यथा चन्द्रालोके जयदेवः समुल्लिखाति –

**सिद्धिः ख्यातेषु चेन्नाम कीर्त्यते तुल्यतोक्तये।**
**युवामेवेह विख्यातौ त्वं बलैजलधिजलैः॥**

यत्र विख्यातपदार्थेषु तुल्यतां (साम्यम्) कथयितुं तेषां वर्णनं क्रियते तत्र सिद्धिरिति अलङ्कारः।

यथा – हे राजन्। अस्यां पृथिव्यां भवन्तौ द्वौ एव विख्यातौ। तत्र हि त्वं बलैः (सैन्यैः) सागरश्च जलैः। अत्र सैन्यजलयोः प्रसरणशीलत्वसादृश्यात् अभेदमाश्रित्य धर्मैक्यं बोधितम्।

**स्वावलोकनप्रश्नाः**

1. तुल्ययोगितालङ्कारस्य लक्षणं किम्?
2. तुल्ययोगितायाः द्विविधभेदं कथयत।
3. 'सङ्कुचन्ति सरोजानि ---------------' इति कस्य अलङ्कारस्य उदाहरणम्?
4. अपय्यदीक्षितस्य अभिप्रायेण हिताहितविषये वर्तनव्यवहरणसाम्यं कुत्र प्रदर्श्यते ?
5. तुल्ययोगितायाः 'सिद्धिः' इति नामकरणं कस्मिन् ग्रन्थे अवलोक्यते?

### ३.२.२. दीपकालङ्कारः

**वदन्ति वर्ण्यावर्ण्यानां धर्मैक्यं दीपकं बुधाः ।**
**मधेन भाति कलभः प्रतापेन महीपतिः ।।**

कारिकायाम् अस्यां दीपकालङ्कारस्य लक्षणमुपनिबद्धमस्ति । वर्ण्यावर्ण्यानाम् इत्युक्ते प्रस्तुत-अप्रस्तुतानां एकधर्मान्वयः 'दीपकम्' इति बुधाः (विद्वांसः) वदन्ति । यथा – कलभः (गजः) मदेन राजा च प्रतापेन शोभते । वाक्येऽस्मिन् 'भाति' इति क्रियापदेन अप्रस्तुतगजस्य प्रस्तुतमहीपतेश्च धर्मैक्यं विवक्षितम् ।

दीपकशब्दस्य अन्वर्थतां वक्तुं तस्य व्युत्पत्तिं कथयति कविः यत् **'प्रस्तुतैकनिष्ठस्समानो धर्मः प्रसङ्गादन्यत्रोपकरोति प्रासादार्थमारोपितो दीप इव रथ्यामिति दीपसादृश्याद्दीपकम्'** इति। यथा प्रासादे संस्थापितः दीपः न केवलं प्रासादं प्रकाशयति अपि तु प्रसङ्गात् तत्पुरतः स्थितमार्गमपि । तद्वत् प्रस्तुतैकपरः साधारणधर्मः अप्रस्तुतमपि उपकरोति । अतः दीपकसादृश्यात्समानो धर्मः दीपकमुच्यते । 'दीपकम्' इत्यत्र 'संज्ञायां च' (५-३-९७) इति सूत्रेण इवार्थे कन् प्रत्यये जाते दीपकशब्दस्य निष्पत्तिः । दीपस्य धर्मान्वयः इत्यस्मात् 'दीपकम्' इति । अधोनिर्दिष्टेन उदाहरणेन स्पष्टीभवति –

**मणिः शाणोल्लीढः समरविजयी हेतिदलितो**
**मदक्षीणो नागः शरदि सरितः श्यानपुलिनाः ।**
**कलाशेषश्चन्द्रः सुरतमृदिता बालवनिता**
**तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु नृपाः ।।**

श्लोकार्थः - शाणोल्लीढः मणिः (निकषपाषाणे उल्लिखितमणिः), समरे (युद्धे) हेतिभिः (आयुधैः) निहतः विजयशीलयोद्धा, मदेन क्षीणः नागः (गजः), शरत्काले शुष्काणि तटानि यासां ताः नद्यः, कलाशेषः चन्द्रः, सुरतक्रीडायां मृदिता (चुम्बालिङ्गनाद्युपमर्दिता म्लायिताङ्गी) नवयौवना स्त्री, अर्थिषु (याचकेषु) गलितः (सङ्क्रान्तः) विभवः (समृद्धिः) येषां ते नृपाश्च तनिम्ना (कृशशरीरेण) शोभन्ते ।

श्लोकेऽस्मिन् प्रस्तुतानां नृपाणाम् अप्रस्तुतानां मण्यादीनां च शोभारूपैकधर्मान्वयः । अत्र हि प्रस्तुतस्य समानधर्मः अप्रस्तुतेऽपि अन्वितः । ततः दीपकालङ्कारः ।

**स्वावलोकनप्रश्नाः –**

1. दीपकालङ्कारस्य लक्षणं किम् ?
2. प्रासादार्थमारोपितः दीपः कां प्रकाशयति ?

3. दीपकशब्दे इवार्थे कः प्रत्ययः ?

4. 'भाति' इति क्रियापदेन कयोः द्वयोः धर्मैक्यं विवक्षितम् ?

### ३.२.२.१. दीपकालङ्कारविषये उपस्थितशङ्कायाः समाधानम् –

दीपकालङ्कारे प्रस्तुतानामप्रस्तुतानां युगपद्धर्मान्वयः उत अप्रस्तुतस्यैव आदौ इति आशङ्कायामुच्यते -

**सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः ।**
**शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ।।**

**श्लोकार्थः** – सुवर्णपुष्पां पृथिवीं त्रयः पुरुषाः चिन्वन्ति । शूर; कृतविद्यः यः सेवितुं जानाति सश्चेति।

अत्र हि 'चिन्वन्ती'ति क्रियापदस्य एकत्वात् प्रस्तुतानामप्रस्तुतानां युगपद्धर्मान्वयः प्रतिभति । तेन ह्यत्र प्रासङ्गिकता नैव युज्यते । किन्तु पूर्वोक्ते उदाहरणे 'मदेन भाति कलभ' इत्यत्र अप्रस्तुतस्यैव प्रथमं धर्मान्वयः ततः प्रस्तुतस्य । एवं चेत् प्रासादस्थ-दीप इव धर्मस्य प्रासङ्गिकत्वं कथं स्यादिति प्रश्नः उदेति। अस्याः शङ्कायाः समाधानमेवमुच्यते –

यथा जामातुः कृते निर्मितस्य सूपस्य अतिथिभ्यः प्रथमपरिवेषणेन तस्य प्रासङ्गिकत्वं नैव नश्यति तथैव अप्रस्तुतेन सह प्रस्तुतस्य युगपत् धर्मैक्यं वा अप्रस्तुतस्य आदौ धर्मान्वयः वा समुपस्थाप्यते चेदपि प्रासङ्गिकत्वं न हीयते । वस्तुतः प्रस्तुतोद्देशेन प्रवृत्तस्य / प्रयुक्तस्य अप्रस्तुतस्य आदौ अन्वयः तद्विषयधर्मस्य कारणादेव । तेन हि तस्य प्रसङ्गोपकारित्वं तथैव सन्तिष्ठते । तुल्ययोगितायां त्वेकं प्रस्तुतमपरञ्च अप्रस्तुतमिति नैव भवति । यतो हि तत्र सर्वमप्रस्तुतं वा सर्वं प्रस्तुतमित्यनयोः एकधर्मनिर्देशः । दीपकालङ्कारे एकं प्रस्तुतं द्वितीयञ्च अप्रस्तुतं वरीवर्ति । अयमेव भेदः द्वयोः अलङ्कारयोः । अनयोः अपरोऽपि विशेषः यत् दीपकालङ्कारे अप्रस्तुतमुपमानं प्रस्तुतमुपमेयमिति व्यवस्थितम् इत्यतः उपमानोपमेयभावः । परन्तु तुल्ययोगितालङ्कारे प्रस्तुताप्रस्तुतत्वरूपव्यवस्थापकाभावात् तादृशभावस्य ग्रहणमशक्यम् । तत्र तु कवेः इच्छा प्रामाणिकीति ।

**इदमत्रावधेयम्** –

तुल्ययोगितातः दीपकस्य पृथग्भावसंसूचकनिमित्तानि-

| **तुल्ययोगिता** | **दीपकः** |
| --- | --- |
| १. केवलं प्रकृतप्रकृतयोः धर्मैक्यम्।<br>अथवा<br>केवलम् अप्रकृताप्रकृतयोः साधारणधर्मनिर्देशः | १. प्रकृताप्रकृतयोः धर्मैक्यम् । |
| २. उपमानोपमेयभावस्य अग्रहणम् । | २. उपमानोपमेयभावग्रहणम् । |
| ३. प्रकृताप्रकृतयोः स्पष्टनिर्देशाभावात् ऐच्छिकोपमाव्यञ्जकत्वम् । | ३. प्रकृताप्रकृतयोः स्पष्टनिर्देशात् निश्चितोपमाव्यञ्जकत्वम् । |

**स्वावलोकनप्रश्नाः –**

1. दीपकालङ्कारे कयोः धर्मैक्यं वर्तते?
2. 'उपमानोपमेययोः स्पष्टनिर्देशः ' इति कस्य अलङ्कारस्य वैशिष्ट्यम्?
3. तुल्ययोगितातः दीपकालङ्कारस्य पृथकत्वतत्त्वानि कानि ?
4. उपमानोपमेयभावस्य ऐच्छिकत्वं कुत्र दृश्यते ?
5. सुवर्णपुष्पां पृथिवीं के चिन्वन्ति?

**३.२.२. अ). आवृत्तिदीपकालङ्कारः**

आवृत्तिदीपकं लक्षयति –

त्रिविधं दीपकावृत्तौ भवेदावृत्तिदीपकम् ।

यदा दीपकालङ्कारे पदस्य , अर्थस्य तथा च पदार्थयोः आवृत्तिः (पुनरावृत्तिः) जायते तदा आवृत्तिदीपकालङ्कारः भवति । तेन ह्यमलङ्कारः त्रिविधः । पदावृत्तिदीपकः, अर्थावृत्तिदीपकः उभयावृत्तिदीपकश्चेति । अधुना एकैकः आवृत्तिदीपकभेदः सोदाहरणं प्रस्तूयते ।

**१. पदावृत्तिदीपकालङ्कारः**

यस्मिन् दीपकालङ्कारे पदानामावृत्तिः तत्र पदावृत्तिदीपकालङ्कारः सम्भवति । यथा –

'वर्षत्यम्बुदमालेयं वर्षत्येषा च शर्वरी '

'इयम् अम्बुदमाला(मेघमाला) वर्षति । एषा शर्वरी (रात्रिः) च वर्षति ।' अर्थात् एषा रात्रिः वर्षमिव आचरति । रात्रिकाले प्रियवियोगात् नायिकायाः कृते सः कालः वर्षमिव प्रतीयते ।

वाक्येऽस्मिन् 'वर्षति' इति क्रियारूपैकधर्मवाचकपदस्य पुनरावृत्तिः दृश्यते न तु अर्थस्य । प्रथमे वाक्ये 'वर्षति' इति पदस्य अर्थः वर्षणं करोतीति । द्वितीये वाक्ये वर्षमिव आचरति इत्यर्थः ।

अतः स्थानद्वये अर्थभेदः भूत्वा अपि क्रियापदरूपं त्वेकमेव । तेन हि पदावृत्तिदीपकालङ्कारः । अस्यैव इतोऽपि उदाहरणं पश्यामः ।

**उत्कण्ठयति मेघानां माला वर्गं कलापिनाम् ।**
**यूनां चोत्कण्ठयत्यद्य मानसं मकरद्वजः ॥**

श्लोकार्थः – अद्य मेघानां माला कलापिनां (मयूराणां) वर्गं (समूहम्) उत्कण्ठयति (ऊर्ध्वं कण्ठं कर्तुं प्रेरयति) । तथा मकरध्वजः (मदनः) यूना (तरुणानां ) मानसम् उत्कण्ठयति इत्युक्ते उत्सुकं करोति।

अत्र हि मयूरवृन्दं तथा च युवकानां मानसम् इत्यनयोः एकधर्माभिसम्बन्धः उत्कण्ठयतीति क्रियापदेन प्रदर्श्य चरणद्वयेऽपि तस्य पदस्यावृत्तिः वर्तते । तेन हि पदावृत्तिदीपकालङ्कारोऽत्र ।

**२. अर्थावृत्तिदीपकालङ्कारः –**

यास्मिन् अलङ्कारे अर्थस्य आवृत्तिः तत्र अर्थावृत्तिदीपकालङ्कारः भवति । यथा-

**'उन्मीलन्ति कदम्बानि स्फुटन्ति कुटजोद्गमाः ।'**

कदम्बकुसुमानि उन्मीलन्ति (विकसन्ति) तथा च कुटजोद्गमाः (कुटजकलिकाः) स्फुटन्ति (विकसन्ति) इत्यर्थः । अत्र हि विकासरूपस्य अर्थस्य आवृत्तिः 'उन्मीलन्ति स्फुटन्ति' चेत्याभ्यां क्रियापदाभ्यां द्योतिता । अतः अर्थावृत्तिदीपकालङ्कारोऽस्ति अत्र । इतोऽप्यकमुदाहरण् अधुना प्रदीयते । तद्यथा –

**शमयति जलधरधारा चातकयूनां तृषं चिरोपनताम् ।**
**क्षपयति च वधूलोचनजलधारा कामिनां प्रवासरुचिम् ॥**

**श्लोकार्थः** – जलधरधारा (मेघस्य धारा) चातकयूनां (चातकतरुणानाम्) चिरोपनतां (चिरकालमुपनताम्) तृषं (पिपासां) शमयति । वधूलोचनजलधारा च कामिनां प्रवासेच्छां क्षपयति।

श्लोकेऽस्मिन् 'शमयति', 'क्षपयति, चेति क्रियापदद्वयमपि नाशरूपोऽर्थमेव बोधयति । यद्यपि क्रियापदभेदः तथापि अर्थस्तु 'नाशः' एव । अतः अर्थस्यावृत्तिः सञ्जायते इत्यस्मात् अर्थावृत्तिदीपकालङ्कारः ।

**३. उभयावृत्तिदीपकालङ्कारः -**

पदानाम् अर्थानाञ्च आवृत्तिः यास्मिन् दीपकालङ्कारे समकाले एव अवलोक्यते तत्र उभयावृत्तिदीपकालङ्कारः भवति । यथा –

**'माद्यन्ति चातकास्तृप्ता माद्यन्ति च शिखावलाः ।'**

आकाशे मेघान् वीक्ष्य चातकाः तृप्ताः सन्तः माद्यन्ति (मोदन्ते)। शिखावलाश्च आनन्दिताः भवन्ति ।

वाक्येऽस्मिन् द्वयोरावृत्तिः स्फुटैव । 'माद्यन्ति' इति पदस्य अर्थस्य चावृत्तिः उभयावृत्तिदीपकालङ्कारं ज्ञापयति । अत्र मोदक्रियारूपैकधर्माभिसम्बन्धः चातकमयूराभ्यां सह सुस्पष्टः । तथैव एकस्मिन्नैवार्थे 'माद्यन्ति' पदस्य पुनरावृत्तिरपि। अन्येन उदाहरणेन इतोऽपि स्पष्टीक्रियते । तद्यथा –

**वदनेन निर्जितं तव निलीयते चनद्रबिम्बमम्बुधरे ।**
**अरविन्दमपि च सुन्दरि ! निलीयते पाथसां पूरे ।।**

श्लोकार्थः – हे सुन्दरि ! तव वदनेन पराजितं चन्द्रबिम्बम् अम्बुधरे ( मेघे ) निलीयते (गुप्तरूपेण तिष्ठति) । अरविन्दञ्चापि (कमलमपि) पाथसां (जलानाम् ) पूरे (समूहे) निलीयते ।

उदाहरणेऽस्मिन् कविना 'निलीयते' इति पदस्य द्विवारं प्रयोगं कृत्वा चन्द्रकमलयोः निलीनरूपसमानधर्मः समुपवर्णितः । तस्मादेव 'निलीयते ' इति शब्दस्य तदर्थस्य तिरोधानस्य चावृत्तिः अभवत् । तेन हि उभयावृत्तिदीपकालङ्कारः स्पष्टतया दृश्यते ।

एवं चावृत्तीनां प्रस्तुत – अप्रस्तुतोभयविषयत्वाभावेऽपि दीपकच्छायापत्तिमात्रेण इत्युक्ते दीपकसादृश्यात् दीपकव्यपदेशः ।

**इदमत्रावधेयम् –**

केचन आवृत्तिदीपकालङ्कारं दीपकात् पृथक् मन्यन्ते । केचित्तु दीपकस्यैव प्रभेदानिति स्वीकुर्वन्ति ।

**आवृत्तिदीपकालङ्कारः**

| | | |
|---|---|---|
| पदावृत्तिदीपकः | अर्थावृत्तिदीपकः | उभयावृत्तिदीपकः |
| (अर्थभेदेन पदस्य पुनरावृत्तिः) | (पदभेदेन अर्थस्य पुनरावृत्तिः) | (पदार्थस्य पुनरावृत्तिः) |

काव्यादर्शे दण्डिनापि आवृत्तिदीपकस्य भेदत्रयं प्रोक्तमस्ति।

**अर्थावृत्तिः पदावृत्तिरुभयावृत्तिरित्यपि।**
**दीपकस्थानमेवेष्टमलङ्कारत्रयं यथा॥**

**स्वावलोकनप्रश्नाः**

1. आवृत्तिदीपकालङ्कारस्य कति भेदाः ? के च ते ?
2. पदानामावृत्तिः कस्मिन् अलङ्कारे दृश्यते ?
3. उभयावृत्तिदीपकालङ्कारः कुत्र भवति ?
4. 'उन्मीलन्ति कदम्बानि स्फुटन्ति कुटजोद्गमाः' इत्यस्मिन् वाक्ये कोऽलङ्कारः ?
5. 'काव्यादर्शः' इत्यस्य प्रणेता कः ?

### ३.२.३. प्रतिवस्तूपमालङ्कारः

**वाक्ययोरेकसामान्ये प्रतिवस्तूपमा मता।**
**तापेन भ्राजते सूरः, शूरश्चापेन राजते॥**

प्रस्तुतकारिकायां प्रतिवस्तूपमालङ्कारं लक्षयति । यत्र द्वयोः वाक्ययोः उपमानोपमेयविषययोः एकसाधारणधर्मनिर्देशः भिन्नशब्देन क्रियते तत्र प्रतिवस्तूपमालङ्कारः । प्रतिवाक्यार्थम् उपमा (समानधर्मः) अस्यामिति प्रतिवस्तूपमेति । यथा – 'तापेन भ्राजते सूरः, शूरश्चापेन राजते' इत्यत्र सूरः (सूर्यः) तापेन (तेजसा) भ्राजते (शोभते) शूरश्च चापेन (धनुषा) राजते (शोभते) इत्यर्थः । अत्र कविना 'भ्राजते' इति उपमानवाक्ये तथा च 'राजते' इति उपमेयवाक्ये भिन्नपदाभ्यां शोभारूपैक एव समानधर्मः निर्दिष्टः । अत्र उपमानोपमेयभावस्तु गम्य एव। अतः प्रतिवस्तूपमा वाक्येऽस्मिन् सन्दृश्यते। अपरमपि उदाहरणं प्रदीयते अत्र।

**स्थिरा शैली गुणवतां खलबुद्ध्या न बाध्यते।**
**रत्नदीपस्य हि शिखा वात्ययापि न नाश्यते॥**

**श्लोकार्थः** – यथा रत्नदीपस्य शिखा वात्ययापि (झञ्झावातेनापि) न नाश्यते तथा गुणवतां स्थिरा शैली (सद्व्यवहारः) खलबुद्ध्या (दुष्टबुद्धया) न बाध्यते। अर्थात् दुर्जनाः गुणवतां सद्वृत्तौ (सज्जनानां व्यवहारे) बाधां जनयितुं नैव शक्नुवन्ति।

श्लोकेऽस्मिन् पूर्वार्धमुपमेयवाक्यम् उत्तरार्धमुपमानवाक्यम् अस्ति। अत्र हि 'खलबुद्ध्या न बाध्यते ' तथा च 'वात्ययापि न नाश्यते' इति उभयत्र च नाशाभावरूपः समानधर्मः शब्दभेदेनोपात्तः। तेन हि प्रतिवस्तूपमा अलङ्कारोऽस्ति। इतोऽप्येकमुदाहरण्–

**तवामृतस्यन्दिनि पादपङ्कजे निवेशितात्मा कथमन्यदिच्छति।**

**स्थितेऽरविन्दे मकरन्दनिर्भरे मधुव्रतो नेक्षुरसं समीक्षते॥**

**श्लोकार्थः** – हे भगववन् ! तव अमृतस्यन्दिनि पादपङ्कजे निवेशितात्मा अन्यत् कथमिच्छति? मकरन्दनिर्भरे अरविन्दे स्थितः मधुव्रतः इक्षुरसंनैव वीक्षते।

ईश्वरं प्रति भक्तस्योक्तिरियम्। अमृतप्रस्रवणशीले पादपङ्कजे निवेशितम् अन्तःकरणं येन तादृशः भक्तोऽन्यत् अमृतातिरिक्तं फलं नैव इच्छति। अमृतं चात्र ब्रह्मानन्दरूपं हि निश्चितम्। अत्र हि 'न इक्षुरसं समीक्षते ' इति उपमानवाक्ये 'अनिच्छा' तथैव 'निवेशितात्मा कथमन्यदिच्छति' इति उपमेयवाक्ये 'अवीक्षा' ( न वीक्षणं वा अदर्शनं वा) इति धर्मभेदः प्रतिभाति। तस्मात् कथं प्रतिवस्तूपमेति शङ्का उद्भवति। अस्याः शङ्कायाः समाधानमिदम् –

उदाहरणेऽस्मिन् 'अनिष्टं समीक्षणम्' प्रतिषेधानर्हत्वात् इचछापूर्वकवीक्षाप्रतिषेधोऽयम् अनिच्छायां पर्यवसित एवेति धर्मैक्यम् अवगन्तव्यम्।

अर्थावृत्तिदीपकेऽपि तत्तत्वाक्ये पृथक्पदाभ्यां समानधर्मनिर्देशः अवलोक्यते खलु। उपर्युक्ते उदाहरणे तथैव चेत् प्रतिवस्तूपमा तथा च अर्थवृत्तिदीपकः इत्यत्र को भेदः?

अर्थावृत्तिदीपके उपमानोपमेयं द्वावपि प्रस्तुतं वा अप्रस्तुतं वेति भवति। किन्तु प्रतिवस्तूमा इत्यत्र वाक्यमेकं प्रस्तुतपरकम् अपरञ्चाप्रस्तुतपरकम्।

द्वितीयं वैलक्षण्यं नाम आवृत्तिदीपकालङ्कारः सदा साधर्म्येण न तु वैधर्म्येण सम्भवति। प्रतिवस्तूपमा तु वैधर्म्येणापि दृश्यते। यथा–

विद्वानेव विजानाति विद्वज्जनपरिश्रमम्।

नहि वन्ध्या विजानाति गुर्वीं प्रसववेदनाम्॥

यदि सन्ति गुणाः पुंसां विकसन्त्येव ते स्वयम्।

न हि कस्तूरिकामोदः शपथेन विभाव्यते॥

श्लोकार्थः - विद्वानेव विद्वज्जनपरिश्रमं विजानाति। तथा हि वन्ध्या गुर्वी प्रसववेदनां न विजानाति।

यदि पुंसां गुणाः सन्ति तर्हि ते स्वयं विकसन्त्येव। तथा हि कस्तूरिकामोदः शपथेन न विभाव्यते।

प्रथमश्लोके 'विजानाति' इति पूर्वार्धोपमेयेन तथा च 'न विजानाति' इति उत्तरार्धोपमानेन विरुद्धधर्मसम्बन्धात् प्रतिवस्तूपमा। द्वितीये श्लोकेऽपि 'विकसन्ति' इति उपमेयवाक्यं 'न विभाव्यते' इति उपमानवाक्यं च विरुद्धर्मप्रतीतिः। इत्थम् उभयत्रापि वैधर्म्येण समानधर्मस्य पृथग्निर्देशः कृतोऽस्ति।

**स्वावलोकनप्रश्नाः**

1. प्रतिवस्तूपमालङ्कारस्य लक्षणं किम्?
2. अर्थावृत्तिदीपकप्रतिवस्तूपमावलङ्कारयोः को भेदः?
3. ' तापेन भ्राजते सूरः, शूरश्चापेन राजते' इत्यत्र कोऽलङ्कारः?
4. कस्य शिखा वात्ययापि न नाश्यते?
5. विद्वज्जनपरिश्रमं कः विजानाति?

### ३.२.४. दृष्टान्तालङ्कारः

**चेद्बिम्बप्रतिबिम्बत्वं दृष्टान्तस्तदलङ्कृतिः।**

**त्वमेव कीर्तिमान् राजन्! विधुरेव हि कान्तिमान्॥**

प्रस्तुतकारिकायां दृष्टान्तालङ्कारस्य लक्षणं निबद्धमस्ति। यत्र उपमानोपमेयवाक्ययोः भिन्नावेव धर्मौ बिम्बप्रतिबिम्बभावेन निर्दिष्टौ इति। यथा –

'हे राजन्! त्वमेव कीर्तिमान्। तथैव विधुरेव (चन्द्र एव) कान्तिमान् वर्तते।'

अत्र हि 'त्वमेव कीर्तिमान्' इति उपमेयवाक्ये कीर्तिमत्त्वधर्मोऽस्ति। अपि च 'विधुरेव कान्तिमान्' इत्यत्र कान्तिमत्त्वधर्मः दृश्यते। वाक्येऽस्मिन् यद्यपि नृपचन्द्रयोः विभिन्नधर्मौ तथापि सादृश्येन तद्धर्मयोः कीर्तिकान्त्योः बिम्बप्रतिबिम्बभावात् दृष्टान्तालङ्कारः। रघवंशमहाकाव्यात् उद्धृतोऽयं श्लोकः -

**कामं नृपाः सन्ति सहस्रशोऽन्ये राजन्वतीमाहुरनेन भूमिम्।**

**नक्षत्रताराग्रहसंकुलापि ज्योतिष्मती चन्द्रमसैव रात्रिः॥**

श्लोकार्थः - सहस्रशः अन्ये नृपाः कामं सन्तु। किन्तु अनेन भूमिं राजन्वतीम् आहुः। नक्षत्रतारा-ग्रहसंकुला अपि रात्रिः चन्द्रमसा एव ज्योतिष्मती कथ्यते।

'सुनन्दा' इति काचित् दासी इन्दुमतीं मगधराजस्य विषये ज्ञापयति। उदाहरणेऽस्मिन् राजन्वती-ज्योतिष्यतीत्यनयोः बिम्बप्रतिबिम्बभावः वर्तते। पूर्वतने उदाहरणे नृपचन्द्रयोः मनोहारित्वरूपसादृश्यधर्मोऽस्ति। अत्र तु नृपचन्द्रयोः प्रशंसनीयत्वरूपसादृश्यधर्मप्रतीतिः। विलोक्यते। अन्यदपि उदाहरणमेकम्-

देवीं वाचमुपासते हि बहवः सारं तु सारस्वतं
जानीते नितरामसौ गुरुकुलक्लिष्टो मुरारिः कविः
अब्धिर्लङ्घित एव वानरभटैः किं त्वस्य गम्भीरता-
मापातालनिमग्नपीवरतनुर्जानाति मन्थाचलः॥

श्लोकार्थः - तथा तु बहवः देवीं वाचम् (सरस्वतीम्) उपासते। किन्तु गुरुकुले परिश्रमेण अध्ययनं कुर्वन् मुरारिकविरेव सारस्वतं सारं जानीते । (तथैव) अनेकैः वानरभटैः समुद्रलङ्घनं कृतम् । किन्तु सागरस्य गम्भीरता तु आपातालनिमग्नः पीवरतनुः (पुष्टशरीरः) मन्थाचलः एव जानाति ।

नन्वत्र उपमानोपमेयवाक्ययोः ज्ञानमेकः एव धर्मः इत्यतः प्रतिवस्तूपमा युक्तेति । परमेवं न चिन्तनीयम् । यतो हि अचेतने मन्थाचले ज्ञानस्य बाधित्वेन तत्र जानातीत्यनेन सागरस्य अधस्तलावधिसंस्पर्शमात्रस्य विवक्षा अस्ति । एवमत्र सारज्ञानं तथा च अधस्तलस्पर्शः इत्यत्र बिम्बप्रतिबिम्बभावः घटते । अत्रोदाहरणे पदावृत्तिदीपकाद्विशेषोऽयं यत् पूर्ववत्प्रस्तुताप्रस्तुतविषयत्वकृतो द्रष्टव्यः । उदाहरणे मुरारिवृत्तान्तः प्रस्तुतः मन्दारवृन्तान्तश्च अप्रस्तुतोऽस्ति। अतः दृष्टान्तः वैधर्म्येणापि अयं दृश्यते। यथा –

**कृतं च गर्वाभिमुखं मनस्त्वया किमन्यदेवं निहताश्च नो द्विषः ।**
**तमांसि तिष्ठन्ति हि तावदंशुमान्न यावदायात्युदयाद्रिमौलिताम् ॥**

**श्लोकार्थः -** कश्चित् मन्त्री राजानं वक्ति यत् हे राजन्! भवता भवदीयं मनः गर्वाभिमुखं कृतम्। अर्थात् तव मनसि गर्वः नास्ति। अस्माकं शत्रवस्तु शस्त्रैः विना निहता इतोऽपि किमन्यद् आवश्यकम्। यावत् सूर्यः उदयाचलं न प्राप्नोति तावत्कालः एव तमांसि तिष्ठन्ति इति।

अत्र हि मनसः गर्वाभिमुखीकरणं शत्रुहननञ्च राजधर्मरूपेण निर्दिष्टम्। अस्य वैधर्म्येण सूर्यस्य उदयाचलं प्रति अनागमनम् अन्धकारस्थितिश्चेति सूर्यधर्मेण सह क्रमशः बिम्बप्रतिबिम्बभावं द्योतयति।

**स्वावलोकनप्रश्नाः**

1. दृष्टान्तालङ्कारस्य लक्षणं लिखत।
2. 'कामं नृपाः सन्ति -----------' इति उदाहरणं कस्मात् महाकव्यात् वर्तते ?
3. बिम्बप्रतिबिम्बभावः कस्मिन् अलङ्कारे दृश्यते ?
4. प्रतिवस्तूपमादृष्टान्तयोः भेदं प्रदर्शयत।
5. 'कृतं गर्वाभिमुखं---------------' इत्यत्र केन धर्मेण बिम्बप्रतिबिम्बभावः अवलोक्यते ?

**इदमत्रावधेयम्**

- 'दृष्टान्तालङ्कारः' इति गम्यौपम्यमूलकोऽस्ति।
- अत्र हि उपमेयवाक्यम् उपमानवाक्यञ्च स्वतन्त्रं वा परस्परनिरपेक्षं वा भवति।
- उपमेयोपमानवाक्ययोः धर्मौ भिन्नौ स्तः। अर्थात् द्वयोर्मध्ये परस्परं बिम्बप्रतिबिम्बभावः आवश्यकः। तथैव भावोऽयं न केवलं प्रकृते, अप्रकृते अपि भवेत्।
- अयं साधर्म्यवैधर्म्येण द्विधा विभक्तः।
- प्रतिवस्तूपमादृष्टान्तालङ्कारयोः भेदः - प्रतिवस्तूपमालङ्कारे यद्यपि साधारणधर्मः एकः तथापि तस्य निर्देशस्तु भिन्नशब्देन क्रियते। दृष्टान्तालङ्कारेः तथा नावलोक्यते। अत्र हि उपमेयोपमानवाक्ययोः साधारणधर्मभेदः सर्वथा वर्तते। किन्तु औपम्यव्यञ्जनया द्वयोः पदार्थयोः विशेषता अस्ति।

**३.२.५. निदर्शनालङ्कारः -**

निदर्शयति (क्रियया) प्रदर्शयतीति निदर्शना। गम्यौपम्यमूलकेषु निदर्शनालङ्कारः एकतमः। यत्र द्वयोः पदार्थयोः परस्परम् ऐक्यारोपः तत्र निदर्शनालङ्कारः सम्भवति। निदर्शना त्रिविधा – वाक्यार्थवृत्तिः, पदार्थवृत्तिः सदसदर्थबोधनरूपा चेति। आसां क्रमेण लक्षणोदाहरणानि दीयन्ते।

**१. वाक्यार्थवृत्तिः निदर्शना** –

अस्य अलङ्कारस्य लक्षणं कुवलयानन्दे एव निर्दिष्टम् –

**वाक्यार्थयोः सदृशयोरैक्यारोपो निदर्शना ।**
**यद्दातुः सौम्यता सेयं पूर्णेन्दोरकलङ्कता ॥**

सदृशयोः तुल्ययोः वाक्यार्थयोः ऐक्यारोपः अभेदारोपः वाक्यार्थवृत्तिः निदर्शना । अर्थात् उपमेयवाक्यार्थस्य उपरि उपमानवाक्यार्थस्य अभेदारोपः स्यात् । यथा –

दातृपुरुषसौम्यत्वस्य उपमेयवाक्यार्थस्य पूर्णेन्दोः अकलङ्कत्वस्य उपमानवाक्यार्थस्य यत्तद्भ्याम् ऐक्यारोपः । यथा पूर्णेन्दोः अकलङ्कता असंभाव्या तथा दातुः सौम्यता दुर्लभेति भावः । अधोलिखितोदाहरणेन इतोऽपि स्पष्टीक्रियते ।

**अरण्यरुदितं तं शवशरीरमुद्वर्तितं**
**स्थलेऽब्जमवरोपितं सुचिरमूषरे वर्षितम् ।**
**श्वपुच्छमवनामितं बधिरकर्णजापः कृतो**
**धृतोऽन्धमुखदर्पणो यदबुधो जनः सेवितः ॥**

**श्लोकार्थः** – येन मूर्खजनः सेवितः तेन अरण्यरोदनं कृतम् । तथैव तस्य मूर्खजन सेवा तु मृतशरीरे उद्वर्तनं, भूमौ कमलावरोपणं , उषरे सुचिरं वर्षणं, श्वपुच्छस्य अवनामनं, बधिरे कर्णजापकरणं, अन्धमुखस्य पुरतः दर्पणदर्शनमेव।

उदाहरणेऽस्मिन् उपमानरूपेण नैकानां वाक्यार्थानां प्रयोगः सन्दृश्यते । स च प्रयोगः निरर्थकतारूपधर्मदृष्ट्या समानः । अबुधजनसेवारूपस्य उपमेयवाक्यार्थस्य अरण्यरुदितादिरूपैः उपमानवाक्यार्थैः अभेदारोपः । अरण्यरुदितादिवद् अबुधजनसेवा निष्फलेति भावोऽस्ति । अत्र 'यत्-तत्' इति पदप्रयोगेन अबुधजनसेवनं तथा च अरण्यरोदनम् इत्यनयोः ऐक्यारोपः वर्णितः ।

**२. पदार्थवृत्तिः निदर्शना** –

**पदार्थवृत्तिमप्येके वदन्त्यन्यां निदर्शनाम् ।**
**त्वन्नेत्रयुगलं धत्ते लीलां नीलाम्बुजन्मनोः ॥**

केचित् पदार्थसम्बन्धिनीं निदर्शनाम् अङ्गीकुर्वन्ति । अस्यार्थः एकस्मिन् पदार्थे अन्यपदार्थधर्मस्य आरोपणमिति अन्या निदर्शनेति । (हे कान्ते ) त्वन्नेत्रयुगलं नीलाम्बुजन्मनोः (नीलारविन्दयोः) लीलां धत्ते (धरति ) इति ।

अत्र कान्तानेत्रयुगले नीलाम्बुजगतलीलापदार्थारोपोऽस्ति निदर्शना । आरोप्यमाणो धर्मः पदप्रतिपाद्य इति पदार्थवृत्तित्वम्, नीलारविन्दलीलायाः नेत्रे असम्भवात् लीलेव लीला इति सदृशधर्माक्षेपात् आरोपः औपम्ये पर्यवस्याति ।

विशिष्टयोः धर्मयोः ऐक्यारोपः वाक्यार्थवृत्तिनिदर्शना, उपमानोपमेययोः अन्यतरस्मिन् अन्यतरधर्मारोपः पदार्थवृत्तिनिदर्शना इत्यनयोः भेदः ।

पदार्थवृत्तिनिदर्शनायाः अपरमेकमुदाहरणमिदम् –

**वियोगे गौडनारीणां यो गण्डतलपाण्डिमा ।**
**अदृश्यत स खर्जूरीमञ्जरी गर्भरेणषु ॥**

**श्लोकार्थः** – निजप्रियवियोगे गौडनारीणां ( गौडदेशस्य स्त्रीणाम्) गण्डतलपाण्डिमा अदृश्यत स खर्जूरीमञ्जरीगर्भरेणुषु(खर्जूरीलतायाः परागकणेषु) अपि।

अत्र अन्यधर्मस्य गौडनारीगण्डपाण्डिम्नः अन्यस्मिन् पदार्थे खर्जरीमञ्जरीगर्भरेणुषु आरोपात् पदार्थवृत्तिनिदर्शना । पूर्वस्मिन्नुदाहरणे उपमेये उपमानधर्मारोप; इह तु उपमाने उपमेयधर्मारोपः इति भेदः । उभयत्रापि अन्यधर्मस्य अन्यत्र असम्भवेन तत्सदृशधर्माक्षेपाद् औपम्ये पर्यवसानं तुल्यम्।

इयं पदार्थवृत्तिनिदर्शना ललितोपमेति जयदेवेन व्याहृता । यद्यपि 'वियोगे गौडनारीणाम्' इति श्लोकः प्राचीनैः वाक्यार्थवृत्ति-निदर्शनायाम् उदाहृतः तथापि विशिष्टयोः धर्मयोः ऐक्यारोपः वाक्यार्थवृत्तिनिदर्शना । उपमानोपमेययोः अन्यतरस्मिन् अन्यतरधर्मारोपः पदार्थवृत्तिनिदर्शना इति व्यवस्थाम् आश्रित्य अस्माभिः इह श्लोकोऽयम् उदाहृतः इति अप्पय्यदीक्षितः विवेचयति ।

**३. सदसदर्थबोधनरूपा निदर्शना** –

**अपरं बोधनं प्राहुः क्रिययाऽसत्सदर्थयोः ।**

कस्यचित् किञ्चित् क्रियाविशिष्टस्य स्वक्रियया परान्प्रति असतः सतो वाऽर्थस्य बोधनं यन्निबध्यते तदपरां निदर्शनाम् आहुः । तथा च इमपि द्विधा – क्रियया असदर्थबोधनरूपा क्रियया सदर्थबोधनरूपा चेति । अधुना सोदाहरणं स्पष्टीक्रियते ।

अ) क्रियया असदर्थबोधनरूपायाः निदर्शनाया उदाहरणमिदम् –

**'नश्येद्राजविरोधीति क्षीणं चन्द्रोदये तमः ॥'**

'राज्ञः विरोधी नश्येत्' इति चन्द्रोदये तमः क्षीणमेव ( नश्येदेव ) । उदाहरणेऽस्मिन् नश्येदित्यत्र बोधयत् इति वक्तव्ये बोधयदित्यस्य गम्यमानत्वात् अप्रयोगः । ततश्च राज्ञा चन्द्रेण सह विरुध्य स्वयं नाशक्रियाविशिष्टं तमः स्वकीयनाशक्रियया दृष्टान्तभूतया अन्योऽप्येवं राज्ञः विरुद्धः चेत् नश्येत् इति अनिष्टपर्यवसायिनमर्थं बोधयदेव नष्टमित्यर्थनिबन्धनात् असदर्थनिदर्शना । अस्या एवापरमुदाहरणं प्रस्तूयते–

**उन्नतं पदमवाप्य यो लघुर्हेलयैव स पतेदिति ब्रुवन् ।**
**शैलशेखरगतः पृषद्गणश्चारुमारुतधुतः पतत्यधः ॥**

श्लोकार्थः – पर्वतशिखरे आरूढः जलसमूहः मन्दवायुना अधः पतन् बोधयति यत् क्षुद्रपुरुषः उन्नतपदं सम्प्राप्य अपि अधः पतेदेवइति ।

अत्र गिरिशिखरगतो वृष्टिबिन्दुगणो मन्दमारुतमात्रेणापि कम्पितः पतन् लघोः उन्नतपदप्राप्तिः पतनहेतुः इति असदर्थं बोधयति ।

ब) क्रियया सदर्थबोधनरूपायाः निदर्शनायाः उदाहरणमेतत्

**उदयन्नेव सविता पद्मेष्वर्पयति श्रियम् ।**
**विभावयन् समृद्धीनां फलं सुहृदनुग्रहः ॥**

श्लोकार्थः – सविता (सूर्यः) उदयन्नेव पद्मेषु श्रियं ( शोभाम् ) अर्पयति । ( सः) समृद्धीनां फलं सुहृदनुग्रहः विभावयन्( अर्पयति ) ।

अर्थात् सविता स्वोदयसमये एव कमलेषु लक्ष्मीमादधानः स्वया पद्मलक्ष्म्याधानक्रियया परान्प्रति समृद्धीनां फलं सुहृदनुग्रह एवेति श्रेयस्करमर्थं बोधयति इत्यतः सदर्थनिदर्शना । अपरमेकमुदाहरणम् इतोऽपि स्पष्टीक्रियते -

**चूडामणिपदे धत्ते यो देवं रविमागतम् ।**
**सतां कार्याऽऽतिथेयीति बोधयन् गृहमेधिनः ॥**

श्लोकार्थः - 'सताम् आतिथ्यं कार्यम्' इति गृहस्थान् बोधयितुं यः (पर्वतः) आगतं देवं रविं चूडामणिपदे (शिरसि) धत्ते (धारणं करोति) ।

अत्र समागतं रविं शिरसा सम्भावयन् उदयाचलः स्वनिष्ठया रविधारणक्रियया समागतानां सताम् एवं गृहमेधिभिः आतिथ्यं कार्यमिति सदर्थं ज्ञापयति इत्यतः सदर्थनिदर्शना ।

केचन वाक्यार्थवृत्तिपदार्थवृत्तिनिदर्शनाद्वयम् असम्भवद्वस्तुसंबन्धनिबन्धनमिति संबोधयन्ति। तृतीया तु सम्भवद्वस्तुसंबन्धनिबन्धनेति च व्यवहरन्ति । तथा हि आद्यनिदर्शनायां

वाक्यार्थयोः ऐक्यम् असंभवत्तयोः साम्ये पर्यवस्यति । द्वितीयनिदर्शनायामपि अन्यधर्मोऽन्यत्र असंभवन् धर्मिणोः साम्ये पर्यवस्यति । तृतीयनिदर्शनायां तु स्वक्रियया परान्प्रति सदसदर्थबोधनं संभवदेव समतां गर्भीकरोति ।

**स्वावलोकनप्रश्नाः**

1. निदर्शना कतिविधा नामानि लिखत ।
2. वाक्यार्थयोः ऐक्यारोपः कस्यां निदर्शनायां विहित ?
3. पदार्थवृत्तिनिदर्शनायाः वैशिष्ट्यं कथयत ।
4. 'नश्येद्राजविरोधीति ------------' कस्याः निदर्शनायाः उदाहरणम् ?
5. स्वक्रियया परान्प्रति बोधनं कुत्र भवति ?

**इदमत्रावधेयम् –**

**निदर्शनालङ्कारः**

वाक्यार्थवृत्तिः पदार्थवृत्तिः सदसदर्थबोधनरूपा

क्रियया असदर्थबोधनरूपा क्रियया

सदर्थबोधनरूपा

- रूपके केवलोपमानोपमेययोः अभेदारोपः, निदर्शनायां तु उपमानोपमेयघटितवाक्यार्थयोः अभेदारोपः इति भेदः । तथैव दृष्टान्ते सदृशयोः वाक्यार्थयोः बिम्बप्रतिबिभावेन निर्देशः, निदर्शनायां तु ऐक्यारोपः इति भेदः।

## ३.२.६. व्यतिरेकालङ्कारः

व्यतिरेको नाम वैलक्षण्यम् । तच्च कदाचिदुपमानापेक्षया उपमेयस्य आधिक्ये न्यूनतायाम् अनुभये वा पर्यवस्यति । अत्र उपमेयोत्कर्षपर्यवसायी भवति । अतः कुवलयानन्दे तस्य लक्षणमिदं वर्णितम् –

**व्यतिरेको विशेषश्चेदुपमानोपमेययोः ।**
**शैला इवोन्नताः सन्तः किन्तु प्रकृतिकोमलाः ।।**

अर्थात् उपमानोपमेययोः विशेषः चेत् व्यतिरेकोऽलङ्कारः । यथा सन्तः (सज्जनाः) शैलाः (पर्वताः) इव उन्नताः किन्तु (सन्तः) प्रकृत्या स्वभावेन कोमलाः (शैलास्तु कठिना इति भावः )।

अत्र प्रकृतिकोमला इति उपमानभूतशैलेभ्यः उपमेयभूतसज्जनानां वैलक्षण्यं वर्णितमिति व्यतिरेकलक्षणसमन्वयः।

अयं व्यतिरेकः उपमेयाधिक्यपर्यवसायी, तन्न्यूनत्वपर्यवसायी तथा च अनुभयपर्यवसायी भवति। तेषां क्रमशः उदाहरणं प्रदीयते।

**१. उपमेयाधिक्यपर्यवसायी -**

यत्र उपमानापेक्षया उपमेयस्य विशेषः आधिक्येन प्रदर्शितः भवति तत्र उपमेयाधिक्यपर्यवसायी व्यतिरेकः। यथा वा –

**पल्लवतः कल्पतरोरेष विशेषः करस्य ते वीर !**
**भूषयति कर्णमेकः परस्तु कर्णं तिरस्कुरुते ।।**

**श्लोकार्थः -** कश्चित् कविः कस्यचित् राज्ञः दानशूरतां प्रशंसति । हे वीर ! तव करस्य कल्पतरोः पल्लवतः एषः विशेषोऽस्ति यत् कल्पवृक्षस्य पल्लवं केवलं देवाङ्गणानां कर्णं भूषयति किन्तु तव हस्तस्तु दानशीलतायां कर्णं तिरस्करोति।

अत्र उपमानभूतकल्पवृक्षात् उपमेयभूतमहाराजस्य दानगुणे आधिक्यविशेषोऽस्ति।

**२. तन्न्यूनत्वपर्यवसायी -**

यत्र उपमानापेक्षया उपमेयस्य विशेषः न्यूनत्वेन वर्णितः भवति तत्र न्यूनत्वपर्यवसायी व्यतिरेकोऽलङ्कारः। यथा हि –

**रक्तस्त्वं नवपल्लवैरहमपि श्लाघ्यैः प्रियाया गुणै-**
**स्त्वामायान्ति शिलीमुखाः स्मरधनुर्मुक्तास्तथा मामपि।**
**कान्तापादतलाहतिस्तव मुदे तद्वन्ममाप्यावयोः**
**सर्वं तुल्यमशोक! केवलमहं धात्रा सशोकः कृतः ।।**

श्लोकार्थः – कश्चित् विरही पुरुषः अशोकवृक्षं प्रति वदति यत् 'हे अशोक ! भवान् नवपल्लवैः रक्तः अहञ्च प्रियायाः श्लाघ्यैः गुणैः (तस्याम् ) अनुरक्तः । तव समीपं शिलीमुखाः (भ्रमराः) आयान्ति किन्तु मम समीपं कामदेवस्य धनोः मुक्ताः शिलीमुखाः(बाणाः) आगच्छन्ति। कान्तायाः पादतलाहतिः यथा तव मोदाय (आनन्दाय) तथा ममापि । इदं सर्वम् आवयोः तुल्यं

(समानम् ) वर्तते । केवलं धात्रा (ब्रह्मदेवेन) अहं सशोकः (शोकसहितः) त्वञ्च अशोकः (शोकरहितः) कृतः ।

उदाहरणेऽस्मिन् 'सशोकः' इति पदप्रयोगः उपमानस्य अशोकवृक्षस्य उपमेयस्य कान्ताविरहयुक्तपुरुषस्य विशेषतः न्यूनत्वं प्रतिपादयति । अतः उपमेयन्यूनत्वपर्यवसायी व्यतिरेकोऽस्ति ।

**३. अनुभयपर्यवसायी–**

यत्र उपमेयस्य न तु आधिक्यं न च न्यूनत्वं दृश्यते उत द्वयोः विशेषः समानः तत्र अनुभयपर्यवसायी व्यतिरेकः । यथा-

**दृढतरनिबद्धमुष्टेः कोशनिषण्णस्य सहजमलिनस्य ।**
**कृपणस्य कृपाणस्य च केवलमाकारतो भेदः ।।**

श्लोकार्थः – कृपणः कृपाणः चेत्यनयोः केवलम् आकारतः (स्वरूपं वा 'आ' इति स्वरः) भेदोऽस्ति । अन्यानि विशेषणानि समानानि एव । यथा कृपणः निजमुष्टिः दृढतया बध्नाति तथा कृपाणस्य मुष्टिग्राह्यः मध्यभागः अत्यधिकः दृढः भवति । तथैव कृपणः स्वीये कोशे सदा उपविशति कृपाणोऽपि । यथा कृपणः स्वभावेन मलिनः (न निर्मलः ) तथा कृपाणोऽपि मलिनवर्णस्य भवति ।

अत्र हि उपमानोपमेयोः कृपणकृपाणयोः वैलक्षण्यं नाधिक्यं नापि न्यूनत्वं प्राप्नोति । तस्मात् अनुभयपर्यवसायी व्यतिरेकः ।

किन्तु पण्डिराजजगन्नाथः उदाहरणमिदं व्यतिरेकालङ्कारस्य नैव मन्यते । तस्य मते उपमा अलङ्कारोऽत्र।

**स्वावलोकनप्रश्नाः**

1. व्यतिरेकालङ्कारस्य लक्षणं लिखत ।
2. अपय्यदीक्षितदिशा व्यतिरेकः कतिविधः ?
3. 'शैला इवोन्नताः --------------' इत्यत्र के प्रकृतिकोमलाः ?
4. किं नाम व्यतिरेकः ?
5. उपमेयाधिक्यपर्यवसायी इत्यस्य उदाहरणं प्रतिपादयत ।

**३.२.७. सहोक्त्यलङ्कारः**

सहोक्त्यलङ्कारः गम्यौपम्याश्रयोऽस्ति । 'चमत्कृतिजनकं साहित्यं सहोक्तिः' इति चन्द्रिकाकारस्य लक्षणमस्ति । कुवलयानन्दे सहोक्त्यलङ्कारः एवं निर्दिष्टः –

**सहोक्तिः सहभावश्चेद्भासते जनरञ्जनः ।**
**दिगन्तमगमत्तस्य कीर्तिः प्रत्यार्थिभिः सह ।।**

जनरञ्जनः चमत्कारकारी सहभावः साहित्यं भासते (प्रकाशते) चेत् सहोक्तिर्नाम अलङ्कारः । सहृदयहृदयाह्लादजनकसहित्यवर्णनं सहोक्तिः इति निष्कर्षः । यथा –

तस्य राज्ञः कीर्तिः प्रत्यर्थिभिः (शत्रुभिः) सह दिगन्तम् अगमत् । अत्र हि कीर्तेः शत्रूणां च दिगन्तगमने साहित्यं चमत्कारितया वर्णितमिति सहोक्तिलक्षणसमन्वयः । राज्ञः प्रतापम् असहमानाः शत्रवः यदा दिक्षु पलायिताः तदैव राज्ञः कीर्तिरपि तासु व्याप्तेति सहृदयचित्तमोदकः सहभावोऽस्ति । अपरमेकमुदाहरणं प्रदर्श्यते । तद्यथा–

**छाया संश्रयते तलं विटपिनां श्रान्तेव पान्थैः समं**
**मूलं याति सरोजलस्य जडता ग्लानेव मीनैः सह ।**
**आचामत्यहिमांशुदीधितिरपस्तप्तेव लोकैः समं**
**निद्रा गर्भगृहं सह प्रविशति क्लान्तेव कान्ताजनैः ।।**

श्लोकार्थः – ग्रीष्मर्तोः मध्याह्नवर्णनमत्र कविना क्रियते । छाया पान्थैः सह श्रान्ता इव तरुतलं संश्रयते । जडता ग्लानेव मीनैः सह सरोवरस्य मूलं गच्छति । सूर्यकिरणाः तप्तेव लोकैः सह जलं पिबन्ति । कलान्तेव निद्रा कान्ताजनैः सह अभ्यन्तरगृहं प्रविशति इति । अत्र जनरञ्जनसहभाववर्णनात् सहोक्त्यलङ्कारः ।

सहोक्त्यलङ्कारे बहुभिः पदार्थैः सह एकस्य एव धर्मस्योल्लेखः भवति । तत्रापि कश्चिदेकः पदार्थः प्रधानः अपरश्च गौणः वर्तते । सह, साकम्, सार्धम्, समम् चेत्यादयः सहोक्तिवाचकशब्दाः प्रायशः तस्मिन् दृश्यन्ते । क्वचित् सहोक्तिवाचकशब्दाभावेऽपि सहार्थविवक्षा अलङ्कारस्य अस्य स्फुटत्वं प्रदर्शयति ।

**स्वावलोकनप्रश्नाः**

1. चन्द्रिकाकारस्य सहोक्त्यलङ्कारस्य लक्षणं किम्?
2. अपय्यदीक्षितस्य निर्दिष्टे लक्षणे 'जनरञ्जनः' इति पदं किं बोधयति ?
3. सहोक्तिवाचकाः के शब्दाः ?
4. 'दिगन्तमगमत्तस्य ------------' इत्यत्र सहोक्तिलक्षणसमन्वयं प्रदर्शयत ।
5. छाया पान्थैः समं कं संश्रयते ?

### ३.२.८. विनोक्त्यलङ्कारः

**विनोक्तिश्चेद्विना किञ्चित्प्रस्तुतं हीनमुच्यते।**
**विद्या हृद्यापि साऽवद्या विना विनयसम्पदम्॥**

कारिकायामस्यां प्रथमपद्यं विनोक्त्यलङ्कारलक्षणं प्रतिपादयति । यत्र 'विना' इति पदप्रयोगं कृत्वा प्रस्तुतं(वर्ण्यं वस्तु) हीनं (निकृष्टम्) उच्यते तत्र विनोक्त्यलङ्कारः स्यात्। यथा – विद्या हृद्यापि (मनोहरापि) विनयसम्पदं विना अवद्या (निन्द्या) एव । अर्थात् विनयसमृद्धिं विना प्रस्तुतस्य विद्यायाः हीनत्वोक्तेः लक्षणसमन्वयः । अन्यदेकमुदाहरण् इदम्–

**यश्च रामं न पश्येत्तु यं च रामो न पश्यति।**
**निन्दितः स भवेल्लोके स्वात्माप्येन विगर्हते॥**

**श्लोकार्थः -** यः रामं न पश्येत् तथा च यं रामः न पश्यति सः लोकेऽस्मिन् निन्दितः भवेत्। तावदेव न, तस्य स्वात्मा अपि तं निन्दति । रामदर्शनेन विना पुरुषः निन्दितो भवतीत्यर्थः ।

अत्र च रामदर्शनेन विना हीनत्वं 'विना' शब्दमन्तरेणैव दर्शितम् । उपरि निर्दिष्टे उदाहरणे विनोक्तिः शाब्दी दृश्यते किन्तु अस्मिन् उदाहरणे आर्थी भवति ।

**तच्चेत्किञ्चिद्विना रम्यं विनोक्तिः सापि कथ्यते।**
**विना खलैर्विभात्येषा राजेन्द्र ! भवतः सभा॥**

कस्यचित् वस्तुनः अभावेनापि किमपि वस्तु रम्यं भाति तत्रापि विनोक्त्यलङ्कारः कथ्यते । यथा – हे राजेन्द्र ! भवतः एषा सभा दुर्जनैः (खलैः) विना विभाति (शोभते) । अत्र सभायाः खलसंपर्कं विना रम्यत्ववर्णनात् द्वितीया विनोक्तिः । इतोऽप्येकम् उदाहरणं पश्यतु तद्यथा–

**आविर्भूते शशिनि तमसा मुच्यमानेव रात्रि –**
**नैशस्यार्चिर्हुतभुज इव च्छिन्नभूयिष्ठधूमा।**
**मोहेनान्तर्वरतनुरियं लक्ष्यते मुक्तकल्पा**
**गङ्गा रोधःपतनकलुषा गृह्णतीव प्रसादम्॥**

**श्लोकार्थः** – कश्चित् नायकः नायिकायाः विषये कथयति यत् – यथा चन्द्रोदयेन रात्रिः तमसा (अन्धकारेण) मुक्ता भवति । घनान्धकारनाशात् धूमेन विना अग्निज्वाला प्रकाशते । गङ्गारोधः पतनकलुषा नदी पुनः निर्मलतां प्राप्नोति तथैव कोमलाङ्गी इयं मोहेन विना मुक्तकल्पा लक्ष्यते ।

अत्र तमः प्रभृतीन् विना निशादीनां रम्यत्वं 'विना' शब्दमन्तरेण दर्शितम् ।

**स्वावलोकनप्रशनाः**

1. विनोक्त्यलङ्कारस्य लक्षणसमन्वयं दर्शयत।
2. विनोक्त्यलङ्कारे कस्य पदस्य प्रयोगः प्रायशः दृश्यते ?
3. शाब्दीविनोक्तिम् उदाहरत।
4. का खलैर्विना विभति ?
5. आर्थीविनोक्तिं प्रतिपादयत्।

**अवधेयांशाः**

1. विनोक्तिः द्विधा
   - शाब्दी ('विना' शब्दप्रयोगसहिता)
   - आर्थी ('विना' शब्दप्रयोगरहिता)

2. प्रायः अस्मिन् अलङ्कारे 'विना' अथवा तत्समानार्थकशब्दप्रयोगः अवलोक्यते। क्वचित्तु विनार्थविवक्षायां 'विना' इति शब्दाभावेनापि विनोक्तिः सम्भवति।

3. अलङ्कारस्यास्य उद्दिष्टं नाम तदभावात् तद्वस्तु स्थितिसङ्केतदर्शनम्।

**३.२.९. समासोक्तिः अलङ्कारः**

समासेन संक्षेपेण प्रस्तुताप्रस्तुतयोः उक्तिः समासोक्तिः । अयं अलङ्कारः गम्यौपम्याश्रयोऽस्ति। अस्य लक्षणम् अपय्यदीक्षितः एवं विवृणोति –

**समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य चेत्।**
**अयमैन्द्रीमुखं पश्य रक्तश्चुम्बति चन्द्रमाः ॥**

यत्र प्रस्तुतवृत्तान्ते वर्ण्यमाने विशेषणसाम्यबलाद् अप्रस्तुतवृत्तान्तस्य अपि परिस्फूर्तिः (व्यञ्जना) तत्र समासोक्तिः अलङ्कारः। उदाहरणम् – अयमैन्द्रीति।

अयं रक्तः चन्द्रमाः ऐन्द्रयाः प्राचीदिशः मुखं प्रारम्भभागं चुम्बति स्पृशति पश्य इति। अत्र चन्द्रोदयवर्णने प्रस्तुते रक्तादिविशेषणसाम्यात् नायिकानायकवृत्तान्तस्य अप्रस्तुतस्य प्रतीतेः लक्षणसमन्वयः । तथा हि रक्तशब्दस्य श्लेषेण लोहितानुरक्तसाधारण्यात् , मुखशब्दस्य प्रारम्भवदनसाधारण्यात् 'चुम्बति' इत्यस्य संस्पर्शवदनसंयोगसाधारण्यात् च 'चन्द्रमाः' शब्दगतपुल्लिङ्गेन 'ऐन्द्री' शब्दगतस्त्रीलिङ्गेन तत्प्रतिपाद्येन्द्रसंबन्धित्वेन च परवनितासक्तपुरुषवृत्तान्तः प्रतीयते, स च प्रतीतोऽर्थः प्रस्तुतमेव चन्द्रोदयवृत्तान्तम् उपस्करोति इत्यलङ्कारत्वम्।

समासोक्तौ अप्रस्तुतव्यवहारसमारोपः, रूपके तु अप्रस्तुतरूप समारोप इति भेदः।

समासोक्तेः अपरेण उदाहरणेन इतोऽपि स्पष्टीभवेत्।

**व्यावल्गत्कुचभारमाकुलकचं व्यालोलहारावलि**
**प्रेङ्खत्कुण्डलशोभिगण्डयुगलं प्रस्वेदिवक्त्राम्बुजम्।**
**शश्वद्दत्तकरप्रहारमधिकश्वासं रसादेतया**
**यस्मात्कन्दुक! सादरं सुभगया संसेव्यसे तत्कृती॥**

**श्लोकार्थः -** नायिकायाम् अनुरक्तः कश्चित् नायकः तस्याः क्रीडाकन्दुकं सम्बोधयन् वदति यत् 'हे कन्दुक ! त्वं सत्यमेव धन्योऽसि। यतो हि इयं नायिका आदरेण स्नेहेन च तव सेवनं करोति। क्रीडया अस्याः कुचभारः विशेषः चञ्चलः जातः, केशाश्च इतस्ततः अभवन्। तस्याः हारावलिः दोलायमाना वर्तते। चञ्चलकुण्डलाभ्यां कपोलाः सुशोभिताः सञ्जाताः। वक्त्राम्बुजं स्वेदमयं दृश्यते। पुनः करप्रहारेण अस्याः श्वासः वेगेन प्रचलति' इति।

अत्र कन्दुकक्रीडावृत्तान्ते वर्ण्यमाने 'व्यावल्गत्कुचभारम्' इत्यादिक्रियाविशेषणसामान्यात् विपरीतरतासक्तनायिकावृत्तान्तः प्रतीयते। पूर्वत्र विशेषणानि श्लिष्टानि, इह साधारणानीति भेदः। सारूप्यादपि समासोक्तिः दृश्यते। यथा वा –

**पुरा यत्र स्रोतः पुलिनमधुना तत्र सरिता**
**विपर्यासं यातो घनविरलभावः क्षितिरुहाम्।**
**बहोर्दृष्टं कालादपरमिव मन्ये वनमिदं**
**निवेशः शैलानां तदिदमिति बुद्धिं द्रढयति॥**

'उत्तररामचरितम्' इति नाटकस्य द्वितीये अङ्के श्लोकोऽयं उद्धृतः। दण्डकारण्यभूमेः वर्णनं रामः करोत्यत्र।

श्लोकार्थः - पुरा यत्र नदीस्रोतः ( नद्याः प्रवाहः) आसीत् तत्राधुना पुलिनं दृश्यते। क्षितिरुहां (वृक्षाणाम् ) घनविरलभावः विपर्यासं यातः। अर्थात् यत्र वृक्षाणां सघनता आसीत् तत्र विरलता तथा च यत्र विरलता आसीत् तत्र घनत्वम् अवलोक्यते। बहोः कालात् वनमिदं दृष्टम् इत्यतः अपरमेव वनं भाति। अत्रत्यः शैलानां (पर्वतानां) निवेशः तथैव वर्तते इत्यस्मात् तदेव इदमिति बुद्धिं द्रढयति।

अत्र वनवर्णने प्रस्तुते तत्सारूप्यात् कुटुम्बिषु धनसंतानादिसमृद्ध्यस्मृद्धिविपर्यासं प्राप्तस्य तत्समाश्रयस्य ग्रामनगरादेः वृत्तान्तः प्रतीयते।

अत्र च प्रस्तुताप्रस्तुतसाधारणविशेषणबलात् सारूप्यबलाद् वा यदप्रस्तुतवृत्तान्तस्य प्रत्यायनं तत्प्रस्तुते विशेष्ये तत्समारोपार्थं सर्वथैव प्रस्तुतानन्वयिनः कविसंरम्भगोचरत्वायोगात्।

ततश्च समासोक्तौ अप्रस्तुतव्यवहारसमारोपश्च चारुताहेतुः वर्तते । 'मुखं चन्द्रः' इत्यत्र मुखे चन्द्रत्वारोपहेतुचन्द्रपदसमाभिव्याहारवत् 'रक्तश्चुम्बति चन्द्रमा' इत्यादिसमासोक्त्युदाहरणे चन्द्रादौ जारत्वद्यारोपहेतोः तद्वाचकपदसमभिव्याहारस्य अभावात्।

**स्वावलोकनप्रश्नाः**

1. समासोक्तिः नाम किम् ?
2. लक्षणकारिकायां परिस्फूर्तिः इति पदं कमर्थं द्योतयति ?
3. 'अयमैन्द्रीति' इत्यत्र समासोक्तेः लक्षणसमन्वयं प्रदर्शयत ।
4. समासोक्तिः रूपकालङ्कारः चेत्यनयोः कः भेदः ?
5. समासोक्तौ कः चारुताहेतुः वर्तते ?

**इदमत्रावधेयम्**

- **भेदः**

| **समासोक्तिः** | **श्लेषः** |
| --- | --- |
| 1. प्रकृतपक्षकवाच्यार्थेन । अप्रकृतपक्षव्यङ्ग्यार्थप्रतीतिः । | 1. उभयोः प्रकृताप्रकृतपक्षयोः वाच्यार्थः |
| 2. केवलं विशेषणानां श्लिष्टत्वं प्रकृतम् अप्रकृतञ्च अन्वेति । | 2. अत्र विशेषणाविशेष्यमुभयोरपि श्लिष्टत्वं वर्तते । |

| **समासोक्तिः** | **अप्रस्तुतप्रशंसा** |
| --- | --- |
| 1. वाच्यार्थः प्रकृतविषयकः व्यङ्ग्यार्थः चाप्रकृतविषयकः । | 1. वाच्यार्थः अप्रकृतविषयकः व्यङ्गयार्थः च प्रकृतविषयकः । |

| **समासोक्तिः** | **रूपकः** |
| --- | --- |
| 1. अप्रस्तुतव्यवहारसमारोपः । | 1. प्रस्तुतेऽप्रस्तुतरूपसमारोपः । |

- समासोक्तौ वाच्यार्थः तथा च व्यङ्ग्यार्थः द्वयोः प्रतीतिः भवति । अपि च व्यञ्जना लिङ्गसाम्यात् वा विशेषणसाम्यात् वा सम्भवति ।

### ३.२.१०. परिकरालङ्कारः

**अलङ्कारः परिकरः साभिप्राये विशेषणे ।**
**सुधांशुकलितोत्तंसस्तापं हरतु वशिवः ॥**

अस्यां कारिकायां परिकरालङ्कारस्य लक्षणं उदाहरणञ्च प्रदत्तम् । प्रकृतार्थोपपादकार्थव्यञ्जकविशेषणत्वं परिकरलक्षणम् । यदा विशेषणं प्रकृतार्थोपपादकस्य अर्थविशेषस्य व्यञ्जकत्वाभिप्रायेण अर्थात् साभिप्रायं प्रयुङ्क्ते तदा परिकरालङ्कारः भवति । अत्र विशेषणे इत्येकवचनम् अविवक्षितम् । व्यङ्ग्यार्थस्य वाच्यार्थं प्रति परिकरत्वात् (अङ्गत्वात्) परिकरालङ्कार इति व्यपदेशः । यथा –

सुधांशुना(शीतलचन्द्रेण) कलितः कृतः उत्तंसः शिरोभूषणं येन सः शिवः वः युष्माकं तापं (दुःखम्) हरतु इति ।

अत्र 'सुधांशुकलितोत्तंसः' इति विशेषणं प्रकृततापहरणरूपार्थोपपादकत्वेन साभिप्रायं प्रयुक्तम् । सुधांशोः हि तापहरणसामर्थ्यम् उपपन्नं तद्विशिष्टश्च शिवः मनस्तापं हरतु इति प्रकृतार्थोपस्कारकत्वं व्यज्यमानस्य अर्थस्य इति लक्षणसङ्गतिः । अन्यदपि उदाहरणं पश्यामः –

**तव प्रसादात्कुसुमायुधोऽपि सहायमेकं मधुमेव लब्ध्वा ।**
**कुर्यां हरस्यापि पिनाकपाणेः धैर्यच्युतिं के मम धन्विनोऽन्ये ॥**

**श्लोकार्थः** – ( हे देवेन्द्र !) तव प्रसादात् (कृपया) एकं मधुमेव (वसन्तमेव) सहायं लब्ध्वा कुसुमायुधोऽपि पिनाकपाणेः हरस्यपि धैर्यच्युतिं कुर्याम् । के अन्ये धन्विनः मम पुरतः ? अर्थात् सर्वे धन्विनः मम पुरतः विफलाः सन्ति ।

अत्र 'पिनाकपाणेः' इति हरविशेषणं (शिवस्य विशेषणम्) तस्य प्रबलायुधत्वं, 'कुसुमायुध' इति विशेषणं मन्मथस्य निस्सारायुधत्वं च द्योतयतः । तेन च कैमुतिकन्यायेन पिनाकपाणेः अपि धैर्यच्यतिं कुर्यां, किमुत वक्तव्यम् अन्यधन्विनामिति सर्वधन्विधैर्यभञ्जकत्वरूपः वाच्यार्थ एवोपस्क्रियते इति परिकरालङ्कारः ।

**स्वावलोकनप्रश्नाः**

1. परिकरालङ्कारस्य लक्षणं लिखत ।
2. 'सुधांशुकलितोत्तंसः' इति कस्य विशेषणम् ?

3. पिनाकपाणेः धैर्यच्चुतिं कः कर्तुं समर्थः ?
4. कस्मिन् अलङ्कारे साभिप्रायविशेषणप्रयोगः भवति ?

**इदमत्रावधेयम्**

- परिकरालङ्कारे साभिप्रायविशेषणप्रयोगः भवति।
- अत्र व्यङ्ग्यार्थः वाच्यार्थस्य उपस्कारकः वर्तते । अतः एव व्यङ्ग्यार्थस्य वाच्यपरिकरत्वात् (वाच्यपोषकत्वात्) परिकर इति नाम सार्थकम्।
- विशेषणानां साभिप्रायत्वं परिकरः इति रसगङ्गाधरे जगन्नाथपण्डितः अवोचत्।
- साभिप्रायविशेषणैः अलङ्कारेऽस्मिन् कश्चित् विशेषचमत्कारः दृश्यते।

**३.२.११. परिकराङ्कुरालङ्कारः**

**साभिप्राये विशेष्ये तु भवेत् परिकराङ्कुरः।**
**चतुर्णां पुरुषार्थानां दाता देवश्चतुर्भुजः ॥**

यत्र विशेष्यस्य प्रयोगः साभिप्रायं भवेत् तत्र परिकराङ्कुरालङ्कारः स्यात् । अतः 'प्रकृतार्थोपपादकार्थव्यञ्जकविशेष्यत्वं ' परिकराङ्कुरलक्षणम् । यथा – चतुर्णां पुरुषार्थानां ( धर्म-अर्थ-काम-मोक्षादयः चत्वारः पुरुषार्थाः ) दाता देवः चतुर्भुजः(विष्णुः) इति।

अत्र 'चतुर्भुज' इति विशेष्यं पुरुषार्थचतुष्टयदानसामर्थ्यस्य अभिप्रायेण प्रयुक्तम् । अस्येव इदमपि एकमुदाहरणं प्रतिपाद्यते। तद्यथा–

**फणीन्द्रस्ते गुणान्वक्तुं लिखितुं हैहयाधिपः।**
**द्रष्टुमाखण्डलः शक्तः, क्वाहमेष क्व ते गुणाः ॥**

श्लोकार्थः – कश्चित् कवि कञ्चित् राजानं वक्ति यत् हे राजन्! तव गुणान् वर्णयितुं सहस्रजिह्वफणीन्द्रः (शेषनागः), लिखितुं हैहयाधिपः (सहस्रभुजः कार्तवीर्याजुनः) तथा च द्रष्टुम् आखण्लः (सहस्रनेत्रः इन्द्रः) एव समर्थः। एषोऽहं क्षुद्रः कुत्र? अपि च तव असंख्यगुणाः कुत्र? अर्थात् तव असङ्ख्यगुणान् वक्तुं मादृशः सामान्यः न प्रभवति।

अत्र 'फणीन्द्रः', 'हैहयाधिपः', 'आखण्डलः' चेत्यादीभिः पदैः विशेष्यवाचकैः व्यज्यमानाः सहस्रवदनत्वसहस्रबाहुत्वसहस्रनयनत्वरूपाः अर्थाः प्रकृतगुणवर्णनलेखनदर्शन-सामर्थ्यापादकतया साभिप्राया इति परिकराङ्कुरालङ्कारः।

वस्तुतः परिकराङ्कुरालङ्कारं पृथक्त्वेन केवलम् एकावलीकारविद्यानाथः तथा च अप्पय्यदीक्षितः एव गणयति। इतरे तु परिकरे एव तस्य अन्तर्भावं कुर्वन्ति।

ज्ञातव्यं यत् साभिप्रायं विशेषणप्रयोगः परिकरे साभिप्रायं विशेष्यप्रयोगः च परिकराङ्कुरे इत्येव द्वयोः भेदः इति।

**स्वावलोकनप्रश्नाः**

1. परिकराङ्कुरालङ्कारः कुत्र भवेत्?
2. परिकराङ्कुरस्य लक्षणं किम् ?
3. 'चतुर्णां पुरुषार्थानां------------'इत्यत्र विशेष्यं किम्?
4. एकावलीकारः विद्यानाथः कम् अलङ्कारं पृथक्त्वेन गणयति ?
5. परिकरपरिकराङ्कुरालङ्कारयोः भेदं कथयत।

**३.३. उपसंहारः**

तृतीयखण्डेऽस्मिन् अस्माभिः 'गम्यौपम्याश्रयालङ्कारः' इति सादृश्यमूलकालङ्कारस्य तृतीयभेदः समुपवर्णितः। तत्र हि तुल्ययोगिता अलङ्कारस्य भेदद्वयं कथयित्वा दीपकालङ्कारः सविस्तरं प्रतिपादितः । ततश्च प्रतिवस्तूपमा-दृष्टान्त-निदर्शना-व्यतिरेक-सहोक्ति-विनोक्ति-समासोक्ति-परिकर-परिकराङ्कुरादयः अलङ्काराः विवेचिताः । भवताम् अभ्यासाय तत्र-तत्र स्वावलोकनप्रश्नाः प्रदत्ताः। केचन अवधेयांशाः पृथक्रूपेण प्रदर्शितास्सन्ति खण्डेऽस्मिन्। तेन हि प्रस्तूतानां सर्वेषाम् अलङ्काराणाम् अवगमनाय भवतां सौकर्यं स्यात्। इतः परं चतुर्थे खण्डेऽपि गम्यौपम्याश्रयाधीनाः इतोऽपि केचन अलङ्काराः निरूप्यन्ते।

# कुवलयानन्दः

## चतुर्थखण्डः

संरचना

४.०. प्रस्तावना
४.१. लक्षिताधिगमविशेषाः
४.२. सादृश्यमूलकालङ्कारस्य तृतीयभेदः
४.३. गम्यौपम्याश्रयालङ्कारे अन्तर्भूताः केचन अलङ्काराः
    ४.३.१. श्लेषः
    ४.३.२. अप्रस्तुतप्रशंसा
    ४.३.३. प्रस्तुताङ्कुरः
    ४.३.४. अर्थान्तरन्यासः
    ४.३.५. पर्यायोक्तिः
    ४.३.६. व्याजस्तुतिः
    ४.३.७. व्याजनिन्दा
    ४.३.८. आक्षेपः
४.४. उपसंहारः

### ४.०. प्रस्तावना

पूर्वस्मिन् खण्डे अस्माभिः सादृश्यगर्भालङ्कारस्य तृतीयभेदस्य गम्यौपम्याश्रयस्य कतिचन अलङ्काराणां विषये उद्बोधितम्। तेषां वैशिष्ट्यमुदाहरणञ्च सविस्तरं पठितंभवद्भिः। तत्रैव अन्तर्भूतानाम् अवशिष्टालङ्काराणां विवेचनम् अधुना भवतां समक्षं समुपस्थाप्यते।

### ४.१. लक्षिताधिगमविशेषाः

- गम्यौपम्याश्रयस्य इतोऽपि कतिचिदालङ्काराणां बोधः छात्राणां भवति।
- तेषाम् अलङ्काराणां प्रदत्तैः उदाहरणैः तत्र तत्सदृशालङ्कारपरिचये सामर्थ्यम्आप्नोति।
- स्वयं तेषाम् अलङ्काराणां प्रयोगं कर्तुं प्रभवति।
- अन्येषु काव्येषु अलङ्कारैः जातं सौन्दर्यवर्धनं वीक्ष्य आनन्दं प्राप्नोति।
- प्रतिपादितालङ्काराणां ज्ञानं सम्प्राप्य अन्यम् बोधयितुं शक्नोति।

**४.२. सादृश्यमूलकालङ्कारस्य तृतीयभेदः-**

सादृश्यमूलकालङ्कारस्य तृतीयभेदोऽस्ति गम्यौपम्याश्रयः इति पूर्वमेव प्रोक्तम्। तस्य विवेचनमपि पूर्वस्मिन् खण्डे अवलोकितम्। उपमायाः गम्यत्वमेव अत्र अलङ्कारभेदाय कारणमिति सर्वैः विदितमेव। कतिचन अलङ्काराः सोदाहरणं तृतीयखण्डे समुपवर्णिताः। अवशिष्टाः कतिपयाः इदानीमत्र चर्चयिष्यन्ते।

**४.३. गम्यौपम्याश्रयालङ्कारे अन्तर्भूताः केचन अलङ्काराः –**

गम्यौपम्याश्रयेण स्थिताः केचन अलङ्काराः भवद्भिः इतःपूर्वम् अधीताः। किन्तु काव्येषु प्रयुज्यमानाः इतोऽपि केचित् अलङ्कारास्सन्ति येषां विवरणं खण्डेऽस्मिन् क्रियमाणं वर्तते। ते च गम्यौपम्याश्रयान्तर्भूताः सन्दृश्यन्ते। छात्रैः तेषामपि बोधः विधेयः इति धिया अत्र विवेच्यन्ते।

**४.३.१. श्लेषालङ्कारः**

**'नानार्थसंश्रयः श्लेषो वर्ण्यावर्ण्योभयाश्रितः'** इत्यत्र श्लेषालङ्कारस्य लक्षणेन सह प्रकारा अपि समुपवर्णिताः। नानार्थसंश्रयः इत्युक्ते अनेकार्थगोचरः शब्दविन्यासः। अतः अनेकार्थशब्दविन्यासः श्लेषः। स च त्रिविधः – प्रकृतानेकविषय-, अप्रकृतानेकविषयः, प्रकृताप्रकृतानेकविषयश्च। उपरि निर्दिष्टे वाक्ये 'वर्ण्यावर्ण्योभयाश्रितः' इति पदं श्लेषप्रकारान् एव निदर्शयति। तत्र हि वर्ण्याश्रयः, अवर्ण्याश्रयः उभयाश्रयश्चेति त्रीणि पदानि सन्ति। तेषां क्रमेण सविस्तरं वर्णनं क्रियते।

**१) वर्ण्याश्रयश्लेषः –**

प्रकृतानेकार्थविषयशब्दविन्यासरूपः प्रकृतश्लेषः एव वर्ण्याश्रयश्लेषः। यथा –

**सर्वदो माधवः पायात् स योऽगं गामदीधरत्।।**

सकलाभीष्टदाता माधवः (विष्णुः) भवन्तं रक्षेत् यः च अगं (पर्वतं) गां (पृथिवीं) च अदीधरत् (धृतवान्)।

सर्वं ददातीति सर्वदः सकलाभीष्टदाता, मायाः लक्ष्म्याः धवः (पतिः) विष्णुः यः पर्वतं गोवर्धनं पृथिवीं च धृतवान् सः रक्षेत् इत्येकः प्रकृतार्थः। सर्वदा उमायाः धवः शिवः, यः गङ्गाम् स्वशिरसि धृतवान् अस्ति सः पायादिति द्वितीयोऽर्थः प्रकृत एव अतः प्रकृतश्लेषः। अत्र 'सर्वदोमाधव' इति स्तोतव्यत्वेन प्रकृतयोः हरिहरयोः कीर्तनं प्रकृतश्लेषः। अस्यैव अपरमुदाहरणं प्रस्तूयते।

तद्यथा-

**त्रातः काकोदरो येन द्रोग्धापि करुणात्मना।**

**पूतनामारणख्यातः स मेऽस्तु शरणं प्रभुः।।**

**श्लोकार्थः** – येन करुणात्मना रामचन्द्रेण द्रोहकर्तुः भयरहितस्य काकस्य रक्षणं कृतम्। तथा च यः पवित्रनामधेयः युद्धे ख्यातः सः मे शरणस्थानम् इति रामपक्षे अर्थः।

येन करुणात्मना कृष्णेन द्रोहकर्तुः काकोदरस्य ( कालियसर्पस्य) रक्षणं कृतम्। अपि च पूतनायाः वधेन ख्यातः जातः सः मे शरणम् इति कृष्णपक्षे प्रकृतार्थः।

अत्र स्तोतव्यत्वेन प्रकृतयोः रामकृष्णयोः श्लेषः।

**२) अवर्ण्याश्रयश्लेषः –**

अप्रकृतानेकार्थविषयशब्दविन्यासरूपः अप्रकृतश्लेष एव अवर्ण्याश्रयश्लेषोऽस्ति। यथा –

**'अब्जेन त्वन्मुखं तुल्यं हरिणाहितसक्तिना।**

हे सुन्दरि! तव मुखं अब्जेन (चन्द्रेण) तुल्यमस्ति यस्य हरिणे (मृगे) आसक्तिः दृश्यते इति चन्द्रपक्षे अर्थः। अत्र हि अब्जं कमलम्, अब्जः चन्द्रः, तयोः उपमानमात्रत्वेन अप्रकृतयोः कीर्तनमिति अप्रकृतश्लेषः। अन्यदेकम् उदाहरणं प्रदीयते। यथा हि–

**नीतानामाकुलीभावं लुब्धैर्भूरिशिलीमुखैः।**

**सदृशे वनवृद्धानां कमलानां त्वदीक्षणे।।**

श्लोकार्थः – हे सुन्दरि! तव ईक्षणे (नेत्रे) लुब्धैः मधुलोलुपैः भूरिशिलीमुखैः (बहुभिः भ्रमरैः) आकुलीभावं नीतानां वने जले वृद्धानां ( वृद्धिं प्राप्तानां) कमलानां सदृशे स्तः इत्येकोऽर्थः।

हे सुन्दरि! लुब्धैः व्याधैः शिलीमुखैः (बाणैः) आकुलीभावं नीतानां वने वृद्धानां (हरिणानां) सदृशे स्तः तव ईक्षणे इति द्वितीयोऽर्थः

अत्र उपमात्वेन अप्रकृतयोः पद्म-हरिणयोः श्लेषः।

**३. उभयाश्रयश्लेषः**

प्रकृताप्रकृतानेकार्थगोचरः शब्दविन्यासः प्रकृताप्रकृतश्लेषः एव उभयाश्रयश्लेषः। यथा –

**'उच्चरद्भूरिकीलालः शुशुभे वाहिनीपतिः।**

उच्चरद् उद्गच्छद् भूरि कीलालं (शोणितं रक्तं वा) यस्य सः वाहिनीपतिः(सेनापतिः) शुशुभे (शोभते) इति प्राकरणिकार्थः। उच्चरद् भूरि कीलालं (उदकम्) यस्य सः वाहिनीनां (नदीनां) पतिः (समुद्रः) शोभते इति अप्राकरणिकार्थः।

अत्र हि वाहिनीपतिः सेनापतिः समुद्रश्च। अत्र समितौ (युद्धे) शस्त्रप्रहारोत्पतद्रुधिरस्य सेनापतेः एव वर्णनं प्रकृतमिति प्रकृताप्रकृतश्लेषः। अपरमेकम् उदहरणं स्वीक्रियते अत्र। तथा हि–

**असावुदयमारूढः कान्तिमान् रक्तमण्डलः।**

**राजा हरति लोकस्य हृदयं मृदुलैः करैः॥**

श्लोकार्थः – अत्र उदयं (अभिवृद्धिम्) प्राप्तः रक्तमण्डलः (अनुरक्तप्रजः) राजा मृदुलैः करैः (अल्पैः ग्राह्यधनैः) लोकहृदयं हरति इति प्राकरणिकार्थः। उदयगिरिमारूढः अरुणमण्डलो राजा चन्द्रः मृदुकिरणैः जनहृदयम् आकर्षतीति अप्राकरणिकार्थः।

अत्र 'राजा हरति लोकस्य' इति चन्द्रवर्णनप्रस्तावे प्रत्यग्रोदितचन्द्रस्य अप्रकृतस्य नवाभिषिक्तस्य नृपतेः श्लेषः।

**स्वावलोकनप्रश्नाः**

1. कः श्लेषः? सलक्षणं लिखत।
2. श्लेषः कतिविधः? तेषां नामानि प्रतिपादयत।
3. 'सर्वदो माधवः पायात्' इत्यत्र कः श्लेषः?
4. अवर्ण्याश्रयश्लेषः कुत्र भवति?
5. 'असावुदयमारूढः --------' इति कस्य उदाहरणम्?

**इदमत्रवधेयम्**

'सर्वदो माधवः', 'योऽगङ्गाम्', 'हरिणाहितसक्तिना' इत्यादौ परस्परविलक्षणं पदभङ्गम् अपेक्ष्य नानार्थबोधनात् सभङ्गश्लेषः। अब्ज-कीलाल-वाहिनीपति प्रभृतिषु पदेषु तादृशपदभङ्गम् अनपेक्ष्यैव नानार्थबोधनाद् अभङ्गश्लेषः इति प्रकारान्तरेणापि श्लेषस्य द्वैविध्यम् इति केचन।

प्रकृताप्रकृतश्लेषे अप्रकृतार्थस्य व्यङ्ग्यत्वमिति केषाञ्चिन्मतम्। अन्ये तु तस्यापि वाच्यत्वम् अङ्गीकृत्य प्रकृताप्रकृतयोः अभेदः सादृश्यं वा व्यङ्ग्यमिति वदन्ति। अत्र प्रथममते प्रकृताप्रकृतश्लेषः सोदाहर्तव्यः। द्वितीयमते शब्दशक्तिमूलवस्तुध्वनिः नोदाहर्तव्यः।

**४.३.२. अप्रस्तुतप्रशंसालङ्कारः**

**अप्रस्तुतप्रशंसा स्यात् सा यत्र प्रस्तुताश्रया।**

**एकः कृती शकुन्तेषु योऽन्यं शक्रान्न याचते॥**

निर्दिष्टकारिकायाम् अस्याम् अप्रस्तुतप्रशंसालङ्कारस्य लक्षणम् उदाहरणञ्च उपनिबद्धमस्ति।

यत्र अप्रस्तुतवृत्तान्तवर्णनं प्रस्तुतवृत्तान्तावगतिपर्यवसायी तत्र अप्रस्तुतप्रशंसालङ्कारः। अर्थात् प्रस्तुतवृत्तान्स्य अवगमनोद्देशेन अप्रस्तुतवृत्तान्तः वर्ण्यते तत्र अप्रस्तुतप्रशंसा इति निष्कर्षः।

यथा- शकुन्तेषु (पक्षिषु) यः शक्राद् अन्यं (इन्द्रादन्यं) प्रभुं न याचते सः एकः चातक एव कृती (कुशलः) इति।


अत्र सार्वभौमं विना अन्यं क्षुद्रं प्रभुं न प्रार्थये इति अभिमानशालिनः वत्तान्तस्य प्रस्तुतस्य कथनाय तत्सदृशचातकवृत्तान्तवर्णनम्। अस्यार्थः अप्रस्तुतस्य चातकस्य प्रशंसा प्रशंसनीयत्वेन प्रस्तुते तत्सरूपे क्षुद्रेभ्यो याचनान्निवृत्तेमानिनि पर्यवस्यति।

अप्रस्तुतवृत्तान्तवर्णनेन प्रस्तुतावगतिश्च प्रस्तुताप्रस्तुतयोः सम्बन्धे सति भवति। अयं सम्बन्ध च सारूप्यं सामान्यविशेषभावः कार्यकारणभावो वा सम्भवति। तत्र सामान्यविशेषभावे सामान्यात् विशेषस्य विशेषाद्वा सामान्यस्यावगतौ द्वैविध्यम्। कार्यकारणभावेऽपि कार्यात् कारणस्य कारणाद्वा कार्यस्य अवगतौ द्वैविध्यम्। सारूप्ये तु एको भेद इत्यस्याः पञ्चप्रकाराः। यदाहुः –

**कार्ये निमित्ते सामान्ये विशेषे प्रस्तुते सति।**

**तदन्यस्य वचस्तुल्ये तुल्यस्येति च पञ्चधा।। इति।**

प्रस्तुतकारिकायाम् अप्रस्तुतप्रशंसायाः पञ्च प्रकाराः निर्दिष्टाः। तद्यथा




एतेषां सोदाहरणं वर्णनम् अधुना क्रियते।

**१. सारूप्यनिबन्धना** – यत्र प्रस्तुताप्रस्तुतयोः सारूप्यसम्बन्धेन अप्रस्तुतवृत्तान्तवर्णनेन प्रस्तुतवृत्तान्तः अभिव्यक्तः भवति तत्र सारूप्यनिबन्धा अप्रस्तुतप्रशंसालङ्कारः वर्तते। यथा-

**आबद्धकृत्रिमसटाजटिलांसभित्ति-**
**रारोपितो मृगपतेः पदवीं यदि श्वा।**
**मत्तेभकुम्भतटपाटनलम्पटस्य**
**नादं करिष्यति कथं हरिणाधिपस्य।।**

श्लोकार्थः – यदि कृत्रिमसटाभिः आबद्धस्कन्धः कश्चित् शुनकः मृगराजपदे आरोपितः तर्हि सः मदोन्मत्तगजस्य गण्डस्थलविदीर्णे चातुर्यं यस्य तस्य हरिणाधिपस्य (सिंहस्य) नादं कथं करिष्यति? अर्थात् सिंहगर्जनां कर्तुं कथं प्रभवेत्?

अत्र मृगपतेः पदमारोपितोऽपि शुनकः सिंहस्य नादं न करिष्यतीति अप्रस्तुतशुनकवृत्तान्तवर्णनं तत्सारूप्यात् कृत्रिमवेषव्यवहारमात्रेण विद्वज्जनवदभिएनयतो मूर्खस्य वृत्तान्ते पर्यवस्यति। तेन हि वाच्यार्थरूपेण अप्रस्तुतश्ववृत्तान्तः मूर्खरूपप्रस्तुतवृत्तान्तं व्यञ्जयति सारूप्यनिबन्धनात्।

**२. सामान्यनिबन्धना** –

य़त्र प्रस्तुताप्रस्तुतयोः सामान्यविशेषभावसम्बन्धेन सामान्य-अप्रस्तुतात् विशेषप्रस्तुतं व्यञ्जयति तत्र सामान्यनिबन्धना अप्रस्तुप्रशंसालङ्कारः वर्तते। यथा हि -

**विधाय वैरं सामर्षे नरोऽरौ य उदासते।**
**प्रक्षिप्योदर्चिषं कक्षे शेरते तेऽभिमारुतम्॥**

श्लोकार्थः – यः नर क्रोधयुक्तेन शत्रुणा सह वैरं विधाय उदासीनः भवति सः तृणे अग्निं प्रक्षिप्य अभिमारुतं कक्षे शयनं करोति।

माघकवेः काव्यस्य द्वितीयसर्गे उद्धृतोऽयं श्लोकः बलरामस्य। प्रागेव सामर्षे शिशुपाले रुक्मिणीहरणादिना वैरं दृढीकृतवता कृष्णेन तस्मिन् उदासितुम् अयुक्तमिति वक्तव्यऽर्थे प्रस्तुते तत्प्रत्यायनार्थं सामान्यम् अभिहितम्। अतः सामान्यनिबन्धना अत्र वर्तते।

**३. विशेषनिबन्धना** –

यत्र प्रस्तुताप्रस्तुतयोः सामान्यविशेषभावसम्बन्धेन विशेषरूपाप्रस्तुतवृत्तान्तेन सामान्यरूप- प्रस्तुतवृत्तान्तं व्यञ्जयति तत्र विशेषनिबन्धना अप्रस्तुतप्रशंसालङ्कारः स्यात्। यथा –

**अङ्काधिरोपितमृगश्चन्द्रमा मृगलाञ्छनः।**
**केसरी निष्ठुरक्षिप्तमृगयूथो मृगाधिपः॥**

इयमपि बलरामस्यैव उक्तिः। मृगं निजाङ्के अधिरोपितः (उपावेशितः) चन्द्रः मृगलाञ्छनः (मृगकलङ्कितः) इति कथ्यते। किन्तु निष्ठुरः मृगयूथनाशकः केसरी 'मृगाधिपः' इत्युच्यते। अत्र कृष्णं प्रति बलभद्रवाक्ये मार्दवदूषणपरे पूर्वप्रस्तावानुसारेण 'क्रूर एव ख्यातिभाग्भवति, न तु मृदुः' इति सामान्ये वक्तव्ये तत्प्रत्यायनार्थम् अप्रस्तुतविशेषः अभिहितः। अर्थात् सामान्यतः कञ्चिदर्थं प्रस्तुत्य तद्विवरणार्थम् अप्रस्तुतविशेषोदाहरणमेव विशेषनिबन्धना अप्रस्तुतप्रशंसालङ्कारः।

**४. कारणनिबन्धना** –

यत्र प्रस्तुताप्रस्तुतयोः कार्यकारणभावसम्बन्धेन कारणरूप-अप्रस्तुतवृत्तान्तवर्णनेन कार्यरूप-प्रस्तुतवृत्तान्तः व्यज्यते तत्र कारणनिबन्धना अप्रस्तुतप्रशंसा अलङ्कारः भवति। यथा–

**हृतसारमिवेन्दुमण्डलं दमयन्तीवदनाय वेधसा।**
**कृतमध्यबिलं विलोक्यते धृतगम्भीररखनीखनीलिम।।**

पद्यमिदं नैषधीयचरितस्य द्वितीयसर्गे विलोक्यते। दमयन्तीसौन्दर्यवर्णनाय उद्धृतः श्लोकोऽयम्। अस्यार्थः दमयन्तीमुखं निर्मातुं ब्रह्मदेवेन चन्द्रमण्डलात् सारभागः स्वीकृतः। तस्मात् चन्द्रस्य मध्यभागे छिद्रम् अभवत्। अपि च सः आकाशस्य नीलिमां परिधारयतीव विलोक्यते। (चन्द्रमण्डले दृश्यमानः कलङ्कस्तु गर्तः एव यश्च ब्रह्मदेवेन अपहृतसारस्य परिणामः इति भावः)

अत्र अप्राकरणिकेन्दुमण्डलगतया उत्प्रेक्ष्यमाणेन दमयन्तीवदननिर्माणार्थं सारांशहरणेन तत्कारणेन तत्कार्यरूपं वर्णनीयतया प्रस्तुतं दमयन्तीवदनगतलोकोत्तरं सौन्दर्यं प्रतीयते। अतः कारणनिबन्धना अप्रस्तुतप्रशंसा।

**५. कार्यनिबन्धना** –

यत्र प्रस्तुताप्रस्तुतयोः कार्यकारणभावसम्बन्धेन कार्यरूप-अप्रस्तुतवर्णनात् कारणरूप-प्रस्तुतवृत्तान्तः अभिव्यञ्जितः स्यात् तत्र कार्यनिबन्धना अप्रस्तुतप्रशंसालङ्कारः भवति। यथा-

**नाथ! त्वदंघ्रिनखधावनतोयलग्ना-**
**स्तत्कान्तिलेशकणिका जलधिं प्रविष्टाः।**
**ता एव तस्य मथनेन घनीभवन्त्यो**
**नूनं समुद्रनवनीतपदं प्रपन्नाः।।**

कश्चित् भक्तः भगवन्तं स्तौति – हे नाथ! तव चरणनखप्रक्षालनात् जले लग्नाः तत्कान्तिलेशकणिकाः समुद्रं प्रविष्टाः। तस्य मथनेन ता एव घनीभवन्त्यः समुद्रनवनीतपदं प्राप्ताः। समुद्रमथनकाले नवनीतमिव यः चन्द्रः बहिः आगतः सः तु भगवतः विष्णोः चरणप्रक्षालनकारणात् सम्मिश्रितानां नखकान्तिलेशकणिकानां घनीभूतरूपमेव इति भावः।

अत्र भगवत्पादाम्बुजक्षालनतोयरूपायां दिव्यसरित्यलक्तकरसात् इव लग्नानां, तया सह समुद्रं प्रविष्टानां तन्नखकान्तिलेशकणिकानां परिणामतया संभाव्यमानेन 'समुद्रनवनीत' पदवाच्येन चन्द्रेण कार्येण तन्नखकान्तेः उत्कर्षः प्रतीयते। अर्थात् चन्द्रमाः नखकान्तिरूपकारणस्य कार्यमस्ति।

कार्यरूप-अप्रस्तुतेन कारणरूप्रस्तुतवृत्तम् अभिव्यज्यते अतः कार्यनिबन्धना अप्रस्तुतप्रशंसा अलङ्कारः वर्तते।


एवम् अप्रस्तुतप्रशंसालङ्कारः पञ्चधा विभक्तः। मम्मटाचार्यस्य काव्यप्रकाशे इमे पञ्चप्रकाराः समुपदिष्टाः सन्ति।

**स्वावलोकनप्रश्नाः**

1. अप्रस्तुतप्रशंसा अलङ्कारः कुत्र भवति?
2. प्रस्तुताप्रस्तुतयो कतिविधः सम्बन्धः अप्रस्तुतप्रशंसालङ्कारे वर्तते?
3. 'हृतसारमिवेन्दुमण्डलं ---------- ' इति कस्य उदाहरणम्?
4. सारूप्यनिबन्धना कुत्र दृश्यते?
5. अप्रस्तुतप्रशंसालङ्कारस्य कति प्रकाराः मम्मटाचार्येण समुपदिष्टाः?

**इदमत्रावधेयम्**

- अप्रस्तुतप्रशंसालङ्कारः गम्यौपम्याश्रयार्थालङ्कारोऽस्ति।
- अप्रस्तुतप्रशंसा इत्यत्र 'प्रशंसा' इति पदं केवलं वर्णनार्थे एव प्रयुक्तम्।
- अत्र द्वयोः अर्थयोः प्रतीतिः जायते। वाच्यार्थः व्यङ्ग्यार्थश्चेति। तत्र हि वाच्यार्थः अप्रकृतपरकः तथा व्यङ्ग्यार्थः प्रकृतपरकः भवति।
- प्रस्तुतव्यङ्ग्यार्थविवक्षा एव कवेः उद्दिष्टमस्य अलङ्कारस्य प्रयोगे वर्तते।



**४.३.३. प्रस्तुताङ्कुरालङ्कारः**

**प्रस्तुतेन प्रस्तुतस्य द्योतने प्रस्तुताङ्कुरः।**

**किं भृङ्ग! सत्यां मालत्यां केतक्या कण्टकेद्धया?**

उपर्युक्तकारिकायां प्रथमा पङ्क्तिः प्रस्तुताङ्कुरालङ्कारस्य लक्षणं प्रस्तौति। द्वितीया च उदाहरणम् अस्ति। यत्र प्रस्तुतेन वर्ण्यमानेन अभिमतम् अन्यत्प्रस्तुतं द्योत्यते तत्र प्रस्तुतालङ्कारः।

यथा – हे भृङ्ग! मालत्यां सत्यां विद्यमानायां कण्टकेद्धया (कण्टकैः व्याप्तया) केतक्या किम्?

अत्र प्रियतमेन साकम् उद्याने विहरन्ती काचित् भृङ्गं प्रति एवं वदतीति वाच्यार्थस्य प्रस्तुतत्वम्। अनेन प्रस्तुतभ्रमरवृत्तान्तेन अन्यः प्रस्तुतनायकवृत्तान्तः अभिव्यक्तः भवति। मयि रूपवत्याम् उपस्थित्याम् अन्या रमणी किमर्थमिति भावः। बहुदोषयुक्तायाःपरवनितासङ्गात् कान्तं निवर्तयितुम् इच्छन्त्याः कुलवनितायाः वचने वाच्यार्थस्य भृङ्गोपालम्भस्य, द्योत्यस्य परवनितासक्तप्रियोपालम्भरूपार्थस्य प्रस्तुतत्वमेवेति लक्षणसमन्वयः।

अतः प्रस्तुतवाच्यार्थात् कवेः अभीष्टान्यप्रस्तुतार्थस्य व्यञ्जना एव प्रस्तुताङ्कुरालङ्कारः। मम्मटादयः प्रस्तुताङ्कुरालङ्कारं नाङ्गीकुर्वन्ति। अस्य अपरमपि उदाहरणं प्रस्तूयते।

**अन्यासु तावदुपमर्दसहासु भृङ्ग**
**लोलं विनोदय मनः सुमनोलतासु।**
**बालामजातरजसं कलिकामकाले**
**व्यर्थं कदर्थयसि किं नवमल्लिकायाः ।।**

श्लोकार्थः – हे भृङ्ग! यावदियं नवमल्लिकायाः कलिका विकसिता न भवति तावदन्यासु सुमनोलतासु उपमर्दसहासु मनः लोलं विनोदय। यस्याम् इदानीं परागकणाः नोत्पन्नाः तां बालाम् अकाले किमर्थं व्यर्थं कदर्थयसि (पीडयसि) त्वम्?

अत्रापि भृङ्गोपालम्भस्य वाच्यार्थस्य तथा प्रौढाङ्गनासु सतीषु बालिकां रतये (कामक्रीडायै) क्लेशयतः (पीडयतः) कामिनः उपालम्भरूपद्योत्यार्थस्य च प्रस्तुतत्वात् प्रस्तुताङ्कुरालङ्कारः।

**स्वावलोकनप्रश्नाः**

1. प्रस्तुताङ्कुरालङ्कारः कदा भवति?
2. प्रस्तुताङ्कुरस्य उदाहरणं लिखत।
3. के प्रस्तुताङ्कुरं नैव अङ्गीकुर्वन्ति?

4. अजातरजसा का वर्तते?
5. 'अन्यासु तावदु---------' इत्यत्र द्योत्यार्थः कः?

**४.३.४. अर्थान्तरन्यासः**

**उक्तिरर्थान्तरन्यासः स्यात्सामान्यविशेषयोः।**

'सामान्यविशेषयोः उक्तिः अर्थान्तरन्यासः' इति। तयोश्चैकं प्रस्तुतम् अन्यदप्रस्तुतं भवति। ततश्च विशेषे प्रस्तुते तेन सह अप्रस्तुतसामान्यरूपस्य सामान्ये प्रस्तुते तेन सह अप्रस्तुतविशेषरूपस्य वा अर्थान्तरस्य न्यसनम् अर्थान्तरन्यास इत्युक्तं भवति। एवम् अर्थान्तरन्यासः द्विविधः। तयोः विवेचनं उदाहरणं स्पष्टीक्रियते।

**१) सामान्येन विशेषसमर्थनरूपः अर्थान्तरन्यासः**

यत्र सामान्यप्रस्तुतेन अप्रस्तुतविशेषरूपम् अर्थान्तरं प्रदर्श्यते तत्र अर्थान्तरन्यासः इति।

**यथा- हनूमानब्धिमतरद् दुष्करं किं महात्मनाम्**

अत्र हि हनूमान् अब्धिं (समुद्रं) अतरत् इति विशेषः। महात्मनां किं दुष्करम्? इति सामान्येन समर्थ्यते।

अन्यदेकम् उदहरणम् अत्र प्रदीयते तद्यथा–

**दिवाकराद्रक्षति यो गुहासु लीनं दिवा भीतमिवान्धकारम्।**
**क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैः शिरसामतीव।।**

यः हिमालयः दिवा सूर्यात् भीतम् इव गुहासु लीनम् अन्धकारं रक्षति।( यतः) क्षुद्रेऽपि शरणं प्रपन्ने (प्राप्ते) नूनं महन्तः तेन सह अत्यधिकं ममत्वं दर्शयति।

श्लोकेऽस्मिन् हिमालयः अन्धकारं रक्षति इति विशेषः। अस्य पूर्वार्धस्यसमर्थनं महात्मनां स्वभावं प्रदर्श्य सामान्येन अप्रस्तुतेन विहितम्।

**२. विशेषेण सामान्यसमर्थनरूपः अर्थान्तरन्यासः**

यत्र विशेषप्रस्तुतेन अप्रस्तुतसामान्यरूपम् अर्थान्तरं दृष्टिपथम् आयाति तत्रापि अर्थान्तरन्यासः। यथा – **गुणवद्वस्तुसंसर्गाद्याति स्वल्पोऽपि गौरवम्।**
**पुष्पमालानुषङ्गेण सूत्रं शिरसि धार्यते।।**

गुणवद्वस्तुसंसर्गात् स्वल्पोऽपि (निकृष्टोऽपि) गौरवं याति (प्राप्नोति) पुष्पमालायाः अनुषङ्गेण (सम्पर्केण) सूत्रं शिरसि धार्यते।

उदाहरणेऽस्मिन् निर्गुणस्य गुणवत्सम्पर्काद् गौरवप्राप्तिरूपं सामान्यं प्रस्तुतं तन्तोः पुष्पमालासम्बन्धेन शिरसा वहनरूपगौरवप्राप्तिरूपेण अप्रस्तुतविशेषेण समर्थितमति अर्थान्तरन्यासः लक्षणसमन्वयः। अपरमपि उदहरणमत्र उपस्थाप्यते। तथा हि -

**निजदोषावृमनसामतिसुन्दरमिवाभाति विपरीतम्।**
**पश्यति पित्तोपहतः शशिशुभ्रं शङ्खमपि पीतम्॥**

निजदोषेण आवृतमनसाम् (व्याप्तं मनः येषाम्) अतिसुन्दरम् अपि विपरीतम् आभाति। (यथा) पित्तोपहतः शशिशुभ्रं (अतिश्वेतं) शङ्खमपि पीतं पश्यति।

श्लोकेऽस्मिन् निजदोषान्वितस्य सुन्दरवस्तुनः अपि विपरीतदर्शनमिति सामान्यं प्रस्तुतं, पित्तोपहतस्य अतिश्वेतशङ्खेऽपि पीतत्वदर्शनमिति अप्रस्तुतविशेषणेन समर्थयति इति अर्थान्तरन्यासः।

**अत्रेदमवधेयम्** –

सामान्यविशेषयोः न्यासे सामर्थ्यसमर्थकभावः अवश्यं भवति। किन्तु काव्यलिङ्गेऽपि स एव भावश्चेत् द्वयोः को भेद? इति शङ्का उदेति। तत्र उत्तरमिदं सामर्थ्यसमर्थकयोः सामान्यविशेषसम्बन्धे अर्थान्तरन्यासः किन्तु काव्यलिङ्गे तु तदन्यः निष्पाद्यनिष्पादकभावसम्बन्धः वर्तते इति अभ्युपगन्तव्यम्।

**स्वावलोकनप्रश्नाः**

1. अर्थान्तरन्यासः कतिविधः?
2. अर्थान्तरन्यासः तथा च काव्यलिङ्गम् इत्यनयोः को भेदः?
3. 'गुणवद्वस्तुसंसर्गात्------------' इति उदाहरणं स्पष्टीकुरुत।
4. क्षुद्रेऽपि शरणं प्रपन्ने महात्मनः किं कुर्वन्ति?
5. अर्थान्तरन्यासः कयोः उक्तिः स्यात्?

### ४.३.५. पर्यायोक्तम् अलङ्कारः

**पर्यायोक्तं तु गम्यस्य वचो भङ्ग्यन्तराश्रयम्।**
**नमस्तस्मै कृतौ येन मुधा राहुवधूकुचौ॥**

उपर्युक्ते श्लोके पूर्वार्धपङ्क्तिः पर्यायोक्तमलङ्कारस्य लक्षणम् उपस्थापयति। उत्तरार्धपङ्क्तिश्च उदाहरणरूपा वर्तते।

गम्यस्य(विवक्षितस्य अर्थस्य) भङ्ग्यन्तराश्रयं वचः (विवक्षितादपि चारुतरेण प्रकारेण अभिधानम्) पर्यायोक्तम्। पर्यायेण भङ्ग्यन्तरेण उक्तम् अभिहितं विवक्षितं यत्रइति व्युत्पत्तेः।

येन राहुवधूकुचौ मुधा (व्यर्थौ) कृतौ तस्मै वासुदेवाय नमः इत्युदाहरणम्।

अत्र भगवान् वासुदेवः स्वासाधारणरूपेण गम्यः राहुवधूकुचवैवर्थ्यकारकत्वेन रूपान्तरेण स एव अभिहितः। अपरेण उदाहरणेन इतोऽपि स्पष्टीक्रियते। तद्यथा –

**लोकं पश्यति यस्यांघ्रिः स यस्यांघ्रिं न पश्यति।**

**ताभ्यामप्यपरिच्छेद्या विद्या विश्वगुरोस्तव॥**

यस्य अक्षपादस्य अङ्घ्रिः (पादः) लोकं पश्यति स च लोकः यस्य पतञ्जलेः (आदिशेषावतारस्य) अङ्घ्रिं न पश्यति, ताभ्यां गौतमपतञ्जलिभ्यां विश्वगुरोः तव विद्या अपरिच्छेद्या इत्यत्र स्वासाधारणरूपाभ्याम् अक्षपादत्वपतञ्जलिभ्यां गम्यौ रूपान्तराभ्याम् अभिहितौ इति पर्यायोक्तम्।

( गौतमः **अक्षपाद** इति नाम्ना विख्यातोऽस्ति। एवं श्रूयते यत् गौतममुनिः मननं कुर्वन् गच्छति स्म तदा तस्य पादौ स्वयमेव मार्गान्वेषणं कुरुतः स्म। अतः तस्य पादयोः नेत्रमासीदिति। तथैव पतञ्जलिः शेषावतारः आसीत्। सर्पाणां राजा शेषोऽस्ति। किञ्च सर्पचरणाः गुप्ताः भवन्ति। तेन हि **गुप्तपादः** इत्यपि सर्पं सम्बोधयति। एतं सन्दर्भमनुसृत्यैव पतञ्जलेः पादौ लोकः न पश्यतीति वर्णितम्। एवमत्र गौतमऋषेः अक्षपादत्वं तथा च पतञ्जलेः गुप्तपादत्वं कथयित्वा तयोः असाधारणरूपवर्णनम् अभिहितम्।)

द्वितीयप्रकारेणापि पर्यायोक्तालङ्कारः भवति। तस्य लक्षणम् उदाहरणञ्च अधुना उच्यते।

**पर्यायोक्तं तदप्याहुर्यद्व्याजेनेष्टसाधनम्।**

**यामि चूतलतां द्रष्टुं युवाभ्यामास्यतामिह॥**

अर्थात् व्याजेन कार्यान्तरच्छलेन इष्टस्यार्थस्य स्वस्य परस्य वा इष्टस्य कार्यस्य साधनमिति यत् तदपि पर्यायोक्तम् आहुः (वदन्ति)। कार्यान्तरव्याजेन इष्टकार्यसाधनं द्वितीयं पर्यायोक्तमिति निष्कर्षः। यथा - अहं चूतलतां ( आम्रलतां) द्रष्टुं यामि (गच्छामि) युवाभ्याम् इह (अत्रैव) आस्यताम् (स्थीयताम्) इति।

अत्र हि नायिकां नायकेन सङ्गमय्य चूतलतादर्शनव्याजेन निर्गच्छन्त्या सख्या तत्स्वाच्छन्द्यसम्पादनरूपम् इष्टं साधितम् इति पर्यायोक्तम्।

**स्वावलोकनप्रश्नाः**

1. 'भङ्ग्यन्तराश्रयं वचः' इत्यस्य कोऽर्थः?
2. कः 'अक्षपादः' नाम्ना ख्यातः?

3. पर्यायोक्तेः द्वितीयप्रकारः कीदृशः?
4. 'यामि चूतलतां ---------' इत्यत्र किम् इष्टम् अस्ति?
5. पर्यायोक्तलक्षणे 'गम्यस्य' इति पदं कमर्थं द्योतयति?

### ४.३.६. व्याजस्तुत्यलङ्कारः

**व्याजेन स्तुतिः इति व्याजस्तुतिः** एवं व्युत्पत्तिः सम्भवति। अस्य लक्षणमेवं प्रदीयते यत्–

**'उक्तिर्व्याजस्तुतिर्निन्दास्तुतिभ्यांस्तुतिनिन्दयोः'** इति।

निन्दास्तुतिभ्यां स्तुतिनिन्दयोः उक्तिः अभिव्यक्तिः व्याजस्तुत्यलङ्कारः। निन्दाव्याजेन स्तुतेः, स्तुतिव्याजेन निन्दायाः च अवगमने व्याजस्तुतिरिति निष्कर्षः। अत्र हि वाच्यार्थः व्यङ्ग्यार्थः चेति अर्थद्वयम्। तथैव वाच्यार्थः स्तुतियुक्तश्चेत् व्यङ्ग्यार्थः निन्दासूचकः स्यात्। अपि च वाच्यार्थः निन्दायुक्तश्चेत् व्यङ्ग्यार्थः स्तुतिकथनसूचकः स्यात्। इयं व्याजस्तुतिः द्विधा– १)निन्दया स्तुतिः २) स्तुत्या निन्दा चेति। द्वयोः अधुना सोदाहरणं स्पष्टीक्रियते।

१) निन्दया स्तुतिः - निन्दया स्तुतेः अवगमनरूपायाः व्याजस्तुतेः उदाहरणमिदम् –

'कः स्वर्धुनि विवेकस्ते पापिनो नयसे दिवम्' इति।

अर्थात् 'हे स्वर्धुनि गङ्गे, ते विवेकः कः? नास्ति ते विवेकः (यस्मात्) त्वं पापिनः दिवं स्वर्गं नयसे इत्यत्र तव विवेको नास्ती'ति निन्दाव्याजेन महापातकिनामपि पापशमनेन स्वर्गप्रदानशक्तेति गङ्गायाः प्रभावातिशयस्तुतिः क्रियते इति व्याजस्तुतिः। अस्याः अपरमुदाहरणं कथ्यते। तद्यथा –

**कस्ते शौर्यमदो योद्धुं त्वय्येकं सप्तिमास्थिते**
**सप्तसप्तिसमारूढा भवन्ति परिपन्थिनः॥**

श्लोकार्थः - कश्चित् कविः राजानं प्रशंसति– हे राजन्! शौर्यस्य अहङ्कारः किमर्थम्? तव शौर्यमदस्तु व्यर्थः यतः भवान् योद्धुमेकम् अश्वं समारोहति चेत् तव शत्रवः सप्ताश्वान् आरोहन्ति इति।

अत्र आद्योदाहरणे सप्तसप्तिपदगतश्लेषमूलेन निन्दाव्याजेन स्तुतिः व्यज्यते। तत्र हि योद्धुं राज्ञि एकाश्वसमारूढे सति तच्छत्रवः सप्ताश्वसमारूढाः भवन्ति, तस्मात् मास्तु राज्ञः शौर्यमद इति निन्दाव्याजेन राज्ञा युद्धे हताः सूर्यमण्डलं भित्वा दिवं गच्छन्तीति शौर्यस्तुतिरेव क्रियते इति निन्दया स्तुतिरूपा व्याजस्तुतिः। सप्त सप्तयः अश्वाः यस्य सः सूर्यः, सप्त च ते सप्तयश्च इति उभयथा योजना।

२) स्तुत्या निन्दा - अधुना स्तुत्या निन्दायाः अवगमनरूपायाः व्याजस्तुतेः उदाहरणम् उदाह्रियते यत् –

**साधु दूति पुनः साधु कर्तव्यं किमतः परम्।**
**यन्मदर्थे विलूनासि दन्तैरपि नखैरपि ।।**

हे दूति ! त्वया साधु कृतम्। पुनः इतःपरं किं कर्तव्यमस्ति? यद्यस्मात् त्वं मदर्थं नखैः दन्तैश्च विलूना (विदारिता) असि।

अत्र हि नायकं समानेतुं प्रेषिता दूती स्वयं तत्सम्भोगमनुभूय समागता। शरीरे परिदृश्यमानैः दन्तनखक्षतैः ज्ञातया नायिकया एवं स्तुतिव्याजेन निन्द्यते। 'मदर्थे महान्तं क्लेशमनुभूतवती असि' इति व्याजरूपया स्तुत्या 'मदर्थं न गतासि, किन्तु रन्तुमेव गतासि, धिक्त्वां दूतिकाधर्मविरुद्धकारिणीम्' इति निन्दा अवगम्यते। अतः स्तुत्या निन्दापर्यवसायिनी व्याजस्तुतिरियम्।

अस्याः इतोऽप्येकम् उदाहरणं प्रस्तूयते। तद्यथा–

**अर्धं दानववैरिणा गिरिजयाऽप्यर्धं शिवस्याहृतं**
**देवेत्थं जगतीतले स्मरहराभावे समुन्मीलति**
**गङ्गासागरमम्बरं शशिकला नागाधिपः क्ष्मातलं**
**सर्वज्ञत्वमधीश्वरत्वमगमत्त्वां, मां च भिक्षाटनम् ।।**

श्लोकार्थः - कश्चित् दरिद्रकविः राज्ञः कृपणतां निन्दन् वक्ति– हे राजन्! शिवस्य शरीरस्य अर्धभागः दैत्यशत्रुना (विष्णुना) शेषभागः पार्वत्या च अपहृतः। एवमयं संसारः (इदं जगत्) कामदेवशत्रुरहितः (शिवरहितः) सञ्जातः। शिवस्य समीपस्थानि सर्वाणि वस्तूनि तस्य अभावात् अन्यत्र गतानि। (यथा) गङ्गा समुद्रं प्रति, शशिकला आकाशं प्रति, नागाधिपः (सर्पराजः) पातालं प्रति गमनम् अकुर्वन्। शिवस्य सर्वज्ञत्वम् अधीश्वरत्वञ्च (प्रभुत्वम्) तव समीपम् आगतम्। तथा च शिवस्य भिक्षाटनं मां प्रति आगच्छत्।

उदाहरणेऽस्मिन् 'सर्वज्ञः सर्वेश्वरोऽसि' इति राज्ञः स्तुत्या 'मदीयवैदुष्यादि दारिद्र्यादि सर्वं जानन्नपि बहुप्रदानेन रक्षितुं क्षमोऽपि मह्यं किमपि न ददासि' इति निन्दा व्यज्यते। सर्वमिदं निन्दा-स्तुत्योः एकविषयत्वेन उदाहृतम्।

अनेन अवगम्यते यत् निन्दया स्तुतेः स्तुत्या निन्दायाः वा अवगमनं व्याजस्तुतिरिति । ग्रन्थेऽस्मिन् अप्पय्यदीक्षितेन अलङ्कारोऽयं पञ्चधा विभक्तः । यथा –

१. एकविषयत्वे निन्दया स्तुत्यभिव्यक्तिः ।

२. एकविषयत्वे स्तुत्या निन्दायाः व्यञ्जना ।

३. भिन्नविषयत्वे निन्दया स्तुत्याभिव्यक्तिः।

४. भिन्नविषयत्वे स्तुत्या निन्दाभिव्याक्तिः ।

५. भिन्नविषयत्वे स्तुत्या स्तुतिव्यञ्जना ।

**स्वावलोकनप्रश्नाः**

१. व्याजस्तुते व्युत्पत्तिं लिखत ।

२ .व्याजस्तुतेः लक्षणं किम् ?

३. निन्दया स्तुतेः अवगमनरूपायाः व्याजस्तुतेः उदाहरणं किम् ?

४. केन व्याजस्तुत्यलङ्कारः पञ्चधा विभक्तः ?

५. 'सर्वज्ञः सर्वेश्वरोऽसि' इति राज्ञः स्तुत्या कीदृशी निन्दा व्याज्यते ?

**४.३.७. व्याजनिन्दालङ्कारः**

**'निन्दाया निन्दया व्यक्तिर्व्याजनिन्देति गीयते'**

निन्दया अन्यनिन्दया निन्दायाः अन्यनिन्दायाः व्यक्तिः अभिव्यक्तिः व्याजनिन्दाख्यालङ्कारः। 'व्याजेन निन्दा इति व्याजनिन्दा' इति व्युत्पत्तिः भवितुमर्हति । यथा–

**'विधे ! स निन्द्यो यस्ते प्रागेवमेवाहरच्छिरः ॥'**

'हे ब्रह्मन् ! सः निन्दनीयोऽस्ति यः प्राक् ते एकमेव शिरः अहरत् । '

अत्र वाच्यार्थे शिवनिन्दा प्रतीयते यत् तेन ब्रह्मणः शिरः कर्तितमिति। किन्तु हरनिन्दया दारुणविपाकं संसारं प्रवर्तयतः ब्रह्मणः अभिव्यङ्ग्या निन्दा विवक्षितेति व्याजनिन्दालङ्कारः। अन्यदेकम् उदाहरणमत्र उदाह्रियते। तद्यथा -

**विधिरेव विशेषगर्हणीयः ,करट ! त्वं रट, कस्तवापराधः ।**
**सहकारतरौ चकार यस्ते सहवासं सरलेन कोकिलेन ॥**

**श्लोकार्थः** –हे करट ! त्वं रट, तत्र कः तव अपराधः ? अस्मिन् विषये तु विशेषतः विधिरेव (ब्रह्मदेव एव) गर्हणीयः (निन्दनीयः)। यतो हि तेन एव सरलेन कोकिलेन सह आम्रवृक्षे तव निवासः (सहवासः) कारितः।

अत्र विधिनिन्दया कर्णकठोरं रटन् काको निन्द्यते इति व्याजनिन्दा । अयमत्र अवधेयांशोऽस्ति यत् अन्यस्तुत्या अन्यस्तुत्यभिव्यक्तिरिति व्याजस्तुतेः पञ्चमप्रकारः खलु । तस्य विरुद्धा इयं व्याजनिन्दा । तस्मादेव अत्र अन्यनिन्दया अन्यनिन्दायाः प्रतीतिः भवति ।

**स्वावलोकनप्रश्नाः**

1. व्याजनिन्दालङ्कारस्य लक्षणं किम् ?
2. 'विधे! स निन्द्यो ------------' इत्यत्र वाच्यार्थे कस्य निन्दा प्रतीयते ?
3. व्याजस्तुतिः व्याजनिन्दा इत्यनयोः को भेदः ?
4. विधिः विशेषगर्हणीयः किमर्थम् ?
5. विधिः सरलेन कोकिलेन सह कस्य सहवासं चकार ?

### ४.३.८. आक्षेपालङ्कारः

आक्षेपालङ्कारः अप्पय्यदीक्षितेन कुवलयानन्दग्रन्थे त्रिविधः उपनिबद्धः । प्रतिषेधाक्षेपः, निषेधाभासाक्षेपः, अन्याक्षेपश्च। एतेषां लक्षणानि उदाहरणानि च क्रमशः विवेच्यन्ते अधुना

**1. प्रतिषेधाक्षेपः –**

**आक्षेपः स्वयमुक्तस्य प्रतिषेधा विचारणात् ।**
**चन्द्र ! संदर्शयात्मानमथवास्ति प्रियामुखम् ।।**

स्वयमुक्तस्य अर्थस्य विचारणात् किञ्चिन्निमित्तम् अभिसन्धाय प्रतिषेधः आक्षेपो नाम अलङ्कारः । यथा –

हे चन्द्र! आत्मानं दर्शय, अथवा प्रियायाः मुखमस्ति इति । अत्र चन्द्रदर्शनम् आदौ प्रार्थितम् । ततश्च प्रियामुखस्य आह्लादकारिणः सत्त्वात् चन्द्रदर्शनस्य आनर्थक्यं (अनर्थतां) विचार्य अथवा इति पक्षान्तरेण निषेधसूचितः प्रतिषेध आक्षेपालङ्कारः। अन्यदेकम् उदाहरणं प्रतिपाद्यते अत्र। तद्यथा -

**साहित्यपाथोनिधिमन्थनोत्थं कर्णामृतं रक्षत हे कवीन्द्राः !**
**यत्तस्य दैत्या इव लुण्ठनाय काव्यार्थचोराः प्रगुणीभवन्ति ।।**

**गृह्णन्तु सर्वे यदि वा यथेच्छं, नास्ति क्षतिः क्वापि कवीश्वराणाम्।**
**रत्नेषु लुप्तेषु बहुष्वमर्त्यैरद्यापि रत्नाकर एव सिन्धुः ।।**

**श्लोकार्थः** –हे कवीन्द्राः । साहित्यरूपसमुद्रस्य मन्थनात् उत्पन्नं कर्णामृतं काव्यं रक्षत। यतो हि तस्य लुण्ठनाय काव्यार्थचोराः दैत्याः इव प्रगुणीभवन्ति (वर्धमानाः भवन्ति)। अथवा सर्वे काव्यार्थचोराः यथेच्छं काव्यामृतं गृह्णन्तु तेन कवीश्वराणां कापि हानिः नास्ति। यद्यपि देवाः दैत्याश्च बहूनि रत्नानि नीतवन्तः तथापि सिन्धुः (सागरः) अद्यापि रत्नाकर एव।

अत्र प्रथमश्लोकेन काव्यार्थचोरेभ्यः काव्यस्य संरक्षणं प्रार्थितम्। अनन्तरं कविसूक्तिवैचित्र्याणाम् अक्षयत्वं विचिन्त्य 'गृह्णन्तु सर्वे' इत्यादिना संरक्षणप्रतिषेधः कृत इत्याक्षेपः ।

**२ .निषेधाभासाक्षेपः** –

**निषेधाभासमाक्षेपं बुधाः केचन मन्वते ।**
**नाहं दूती तनोस्तापस्तस्याः कालानलोपमः॥**

केचन बुधाः निषेधाभासम् आभासरूपं निषेधम् आक्षेपं मन्वते। तथा च निषेधाभासः आक्षेप इति द्वितायाक्षेपलक्षणम्।

नाहं दूती, तस्याः (नायिकायाः) तनोः तापः शरीरतापः कालानलोपमः प्रलयकालाग्नितुल्यः (नितराम् असह्य इत्यर्थः) इति।

असह्यविरहवेदनातप्तया नायिकया। प्रेषितायाः दूत्याः नायकं प्रति वचनमिदम्। 'नाहं दूती' इति निषेधोऽत्र बाधितः सन् तदाभासरूपः भूत्या नाहम् अनुनयकालोचितकैतववादिनी (मिथ्यावादिनी)किन्तु सत्यमेव वद ,ामीत्यर्थे पर्यवस्यन् इदानीमेव आगत्य नायिका उज्जीवनीयेति विशेषम् आक्षिपन् आक्षेपालङ्कारः ।

अर्थात् न निषेधमात्रम् आक्षेपःकिन्तु यो निषेधः बाधितः सन्नर्थान्तरपर्यवसितः , कञ्चिद्विशेषम् आक्षिपति स आक्षेपः।

उपर्युक्ते लक्षणे 'केचन' इति पदम् 'अलङ्कारसर्वस्वकारादयः रुय्यकादयः' इति संसूचयति।

अपरेण श्लोकेन द्वितीयोऽयम् आक्षेपः वर्ण्यते। यथा –

**नरेन्द्रमौले ! न वयं राजसंदेशहारिणः।**
**जगत्कुटुम्बिनस्तेऽद्य न शत्रुः कश्चिदीक्ष्यते ॥**

– कश्चित् दूतः राजानं वक्ति हे नरेन्द्रमौले ! वयं न राजसन्देशहारिणः । भवतः कृते सम्पूर्णं जगत् कुटुम्बम् इत्यतः अद्यकोऽपि शत्रुः न दृश्यते ।

अत्र संदेशवाहकानाम् उक्तौ'न वयं सन्देशहारिणः' इति निषेधो बाधितः सन् तदाभासरूपो भूत्वा सन्धिसम्भाषणकालोचितकैतववचनपरिहारेण यथार्थवादित्वे पर्यवस्यन् सर्वजगत्पालकस्य तव न कश्चिदपि शत्रुभावेन अवलोकनीयः किन्तु सर्वेऽपि राजानो भृत्यभावेन ,'संरक्षणीयाः' इति विशेषमाक्षिपति ।

**३– अन्याक्षेपः .**

**आक्षेपोऽन्यो विधौ व्यक्ते निषेधे च तिरोहिते ।**
**गच्छ गच्छसि चेत्कान्त ! तत्रैव स्याज्जनिर्मम ।**

विधौ व्यक्ते स्फुटे सति निषेधे तिरोहिते अस्फुटे च सति अन्यः तृतीयः आक्षेपः भवति। यत्र अनभिमतं विधं स्फुटं प्रकटीकृत्य अभिमतो निषेधः भङ्ग्यन्तरेण अस्फुटतया प्रकाश्यते तत्राक्षेप इति निष्कर्षः ।

हे कान्त ! गच्छसि चेत् गच्छ, अवश्यं गन्तव्यं चेत्गम्यताम् । त्वं यत्र गच्छसि तत्रैव मम जनिः (जन्म) स्यात् ।

अत्र कान्तस्य दूरदेशगमनस्य अनभिमतस्यापि गच्छेति गमनानुमतिः स्फुटा प्रकाशिता । ततश्च मे तत्रैव पुनर्जन्म भवतु इति भङ्ग्यन्तरेण विरहे स्वस्य मरणेव भविष्यतीति सूचनया अभिमतः गमननिषेधः गूढतया प्रकाश्यते इति लक्षणसमन्वयः ।

इतोऽपि स्पष्टीक्रियते । प्रस्तुतमिदम् उदाहरणं पठतु ।

**न चिरं मम तापाय तव यात्रा भविष्यति ।**
**यदि यास्यसि यातव्यमलमाशङ्कयापि ते ।।**

तव यात्रा न चिरं मम तापाय भविष्यति । यदि यास्यसि । (गन्तव्यम्) यातव्यम् (गच्छसि) मम विषयिन्या शङ्कया अलम् ।

अत्रापि 'न चिरं मम तापाय' इति स्वमरणसंसूचनेन गमननिषेधो गर्भीकृतः । अर्थात् 'यातव्यम्' इति विधिः व्यक्तः । 'न चिरं मम तापाय' इति स्वमरणसूचनया गमननिषेधः तिरोहितः ।

एवम् आक्षेपालङ्कारे वक्ता सर्वदा किमपि कथयति ।

**स्वावलोकनप्रश्नाः**

१. प्रतिषेधाक्षेपः कदा भवति ?

२. निषेधाभासम् आक्षेपं के मन्वते ?

३. अन्याक्षेपस्य लक्षणं लिखत ।

४. 'नाहं दूती ' इति कस्योदाहरणम् ?

५. 'न चिरं मम तापाय' इति वाक्यं किं सूचयति ?

**४.४उपसंहारः .**

अस्मिन् चतुर्थखण्डे भवद्भिः गम्यौपम्याश्रयालङ्कारे एव अन्तर्भूताः केचन अलङ्काराः अभ्यस्ताः । तत्र हि श्लेषः पर्यायोक्तिः ,अर्थान्तरन्यासः ,प्रस्तुताङ्कुरः ,अप्रस्तुतप्रशंसा , व्याजनिन्दा आक्षेपश्चेत्यादयः अलङ्काराः सलक्षणं सोदाहरणं सविस्तरञ्च ,व्याजस्तुतिः चतुर्थखण्डयोः गम्यौपम्याश्रयालङ्कारवर्णनं विहितम् । उभयत्रापि स्थाने-विवेचिताः । तृतीय स्थाने अवधेयांशाः प्रदत्ताः सन्ति । एवमस्माभिः सादृश्यमूलकालङ्कारस्य भेदत्रयं चतुर्षु खण्डेषु उपनिबद्धम् । इतःपरं पञ्चमे खण्डे विरोधमूलकालङ्कारस्य विवरणं क्रियते ।

# कुवलयान्दः

## पञ्चमखण्डः

**संरचना**

५.०. प्रस्तावना
५.१. लक्षिताधिगमविशेषाः
५.२. विरोधमूलकालङ्कारः
    ५.२.१. विरोधाभासः
    ५.२.२. विभावना
    ५.२.३. विशेषोक्तिः
    ५.२.४. विषमः
५.३. उपसंहारः

### ५.०. प्रस्तावना

पूर्वतनीयेषु खण्डेषु अस्माभिः सादृश्यभर्भालङ्काराः उपनिबद्धाःसन्ति इति तु जानन्त्येव। तत्र अन्तर्भूताः अर्थालङ्काराः अपि भवद्भिः अधीताः । सम्प्रति अस्मिन् खण्डे विरोधमूलकालङ्कारणां विषये सविस्तरं ज्ञानं भविष्यति । मुख्यतः विरोधाभासः, विभावः, विशेषोक्तिः विषमश्चेत्यादयः चत्वारः अलङ्काराः अध्येतव्याः सन्ति। काव्यशोभावर्धनाय कवयः विरोधमूलकालङ्कारान्नपि काव्येषु योजयन्ति। तेन हि तेषां ज्ञानं भवत्विति धिया पाठ्यांशे समावेशः कृतः ।

### ५.१. लक्षिताधिगमविशेषाः

- विरोधगर्भालङ्काराणां ज्ञानं प्राप्नोति।
- तत्र समाविष्टानां कतिपयानाम् अर्थालङ्काराणां लक्षणमवगच्छति।
- अस्मात् विरोधगर्भालङ्कारात् काव्येषु कथं सौन्दर्यं वर्धते इति प्रतीतिः जायते।
- अन्यत्र तेषां लक्षणान्वयं कर्तुं प्रभवति।
- विवेचितानाम् अलङ्काराणां लक्षणमवगत्य अन्यान् बोधयितुं शक्नोति।
- अन्यैः आलङ्कारिकैः विरोधगर्भालङ्कारस्य प्रदत्तलक्षणे जिज्ञासा उद्भवति।

### ५.२. विरोधमूलकालङ्कारः

उपमेयमुपमानमिति विषयद्वयमधिकृत्य अलङ्काराः भवन्तीति आदौ एव कथितमस्ति । अनयोः उपमेयमुपमानयोः सम्बन्धम् अवलोक्य अलङ्काराः विभक्ताः । यत्र च उपमानोपमेययोः सादृश्यसम्बन्धः तत्र सादृश्यगर्भालङ्कारः इति भवद्भिः अवगतमेव । तथैव यत्र उपमानोपमेययोः विरोधसम्बन्धः स्यात् तत्र विरोधमूलकालङ्कारः । अर्थात् उपमानोपमेययोः अथवा प्रस्तुताप्रस्तुतयोः विरोधः तत्र प्रधानत्वेन सन्दृश्यते । अयं विरोधः सहृदयहृदयाह्लादकारकः सन् काव्यसौन्दर्यसंवर्धने कारणत्वेन तिष्ठति । इयं विरोधप्रतीतिः कीदृशी ? तदनु विरोधगर्भालङ्काराः सञ्जायन्ते । तेषां विवरणं सम्प्रति क्रियते ।

### ५.२.१. विरोधाभासालङ्कारः

**आभासत्वे विरोधस्य विरोधाभास इष्यते ।**
**विनापि तन्वि ! हारेण वक्षोजौ तव हारिणौ ॥**

अत्र पूर्वपङ्क्तिः विरोधाभासलक्षणम् उत्तरपङ्क्तिश्च उदाहरणरूपेण वर्तते ।

विरोधस्य आभासत्वे आपाततः स्फुरणे, पर्यवसाने तत्परिहारे च सति विरोधाभासो नाम अलङ्कारः । अर्थात् द्वयोः उक्तयोः यत्र आपाततः विरोधः दृष्टिगोचरः भवति किन्तु तस्य परिहारोऽपि दृश्यते तत्र विरोधाभासोऽलङ्कारः । यथा –

हे तन्वि ! तव वक्षोजौ (स्तनौ) हारेण विनापि हारिणौ (मनोहारिणौ) । अत्र हारेण विनापि हारिणौ इति विरोधः स्फुरति, ततश्च हारिणौ इत्यस्य हृद्यौ मनोहारिणौ वा इति अर्थयोजनया विरोधपरिहाराद् विरोधाभासः ।

अयं विरोधगर्भालङ्कारोऽस्ति । अलङ्कारेऽस्मिन् सदा परस्परविरोधयुक्तवस्तूनाम् एक एव आश्रयः भवति । किन्तु विरोधोऽयं न वास्तविकः अपि तु आभासमात्रं स्यात् । तस्मात् तस्य परिहारोऽपि शक्यः । तथैव विरोधसम्बन्धः द्रव्य-गुण-क्रिया-जातिगतश्च भवति । किञ्च उपमेयोपमानमिति तत्त्वद्वयमपि परस्परविरोधात् चमत्कृतिं जनयति । यथा वा–

**प्रतीपभूपैरिव किं ततो भिया विरुद्धधर्मैरपि भेत्तृतोज्झिता ।**
**अमित्रजिन्मित्रजिदोजसा स यद्विचारदृक् चारदृगप्यवर्तत ॥**

नैषधीयचरितस्य प्रथमसर्गे नलवर्णनप्रसङ्गे प्रस्तुतश्लोकः दृश्यते ।

**श्लोकार्थः** – प्रतीपभूपैरिव ( शत्रुभिः इव ) विरुद्धधर्मैरपि ( परस्परविरुद्धगुणैरपि ) नलात् भीतः भूत्वा परस्परविरोधः परित्यक्तः किम् ? यतः निजतेजसा नलराजा मित्रजित् अमित्रजित् चास्ति । तथैव विचारदृक् चारदृगपि वर्तते ।

वस्तुतः यः मित्रजित् स अमित्रजित् कथं स्यात्? तथैव यः चारदृक् (गुप्तचरः एव दृष्टिः यस्य) सः विचारदृक् (विगतचारदृक् ) कथं भवेत् ? एवं विरोधोऽस्ति । वस्तुतः इयं विरोधप्रतीतिः आपाततः एव । कवेः आशयः एवं वर्तते – 'मित्रजित्' इत्यनेन तेजसा सूर्यस्य जेता तथा च 'अमित्रजित् ' इत्यनेन शत्रूणां जेता अयं नलराजा अस्ति । अपि च 'चारदृक्' इत्यनेन गुप्तचराः एव तस्य दृष्टिः तथा च 'विचारदृक्' इत्यनेन विचारे दत्तदृष्टिः आसीत् सः इति ।

एवं विरोधे प्रतीयमानेऽपि विरोधपरिहारात् विरोधाभासः ।

**स्वावलोकनप्रश्नाः**

1. विरोधाभासः कीदृशः अलङ्कारः ?
2. विरोधाभासस्य लक्षणं किम् ?
3. विरोधाभासालङ्कारे दृश्यमानः विरोधः वास्तविकः उत आभासमात्रम् ?
4. 'हारेण वक्षोजौ तव हारिणौ' इति स्पष्टयत ।
5. अलङ्कारेऽस्मिन् चमत्कृतिजननं कस्मात् भवति?

**इदमत्रावधेयम्**

- विरोधाभासः प्रायः श्लेषमूलको भवति । किन्तु श्लेषस्य अनिवार्यता नास्ति ।
- केचन आलङ्कारिकाः (मम्मटादयः) विरोधाभासं 'विरोध' इति सम्बोधयन्ति ।
- विरोधाभासः इत्यतः विरोधपरिहारोऽपि तत्र दृश्यते ।
- विरोधः अस्य मूलमित्यतः विरोधगर्भालङ्कारे समावेशः अस्यालङ्कारस्य ।

### ५.२.२. विभावनालङ्कारः

**विभावना विनापि स्यात् कारणं कार्यजन्म चेत्।**
**अप्यलाक्षारसासिक्तं रक्तं तच्चरणद्वयम् ॥**

कारणं विना अपि प्रसिद्धकारणाभावेऽपि कार्योत्पत्तिवर्णने विभावनालङ्कारः स्यात् । विभाव्यते कारणान्तरं यस्यामिति विभावना । यथा – हे कान्ते तव चरणद्वयम् अलाक्षारसासिक्तमपि लाक्षारसलेपनं विना अपि रक्तं लोहितं जातम् इत्यत्र चरणयोः लौहित्यस्य प्रसिद्धलाक्षारसलेपनरूपकारणाभावेऽपि उत्पत्तिवर्णनात् विभावना । लौहित्यस्य स्वाभाविकत्वद्विरोधपरिहारः ।

इयं विभावना षड्विधा –

1. कारणं विना कार्योत्पत्तिः।
2. कारणविशेषाभावरूपा ( हेतुवैकल्येऽपि कार्योत्पत्तिः)।
3. प्रतिबन्धके कार्योत्पत्तिः (प्रतिबन्धकसत्त्वेऽपि कार्योत्पत्तिः )।
4. अकारणात् कार्योत्पत्तिः।
5. विरुद्धकार्योत्पत्तिः।
6. कार्यात् कारणोत्पत्तिः।

एषां प्रकाराणां विवरणमधुना सोदाहरणं क्रियते ।

**१. कारणं विना कार्योत्पत्तिः –**

यत्र कारणाभावे कार्योत्पत्तिः तत्र विभावनायाः प्रथमप्रकारः । यथा हि –

**अपीतक्षीबकादम्बम् असंमृष्टामलाम्बरम्।**
**अप्रसादितसूक्ष्माम्बु जगदासीन्मनोहरम् ॥**

**श्लोकार्थः** – मद्यपानेन विना मदमत्तहंसयुक्तं , मार्जनेन विना स्वच्छ-आकाशयुक्तं तथा च अप्रसादितसूक्ष्माबु जगत् मनोहरम् आसीत् ।

अत्र पानमार्जनप्रसादनरूपप्रसिद्धकारणाभावेऽपि क्षीबत्वामलत्वसूक्ष्मत्वरूपकार्योत्तपत्तिवर्णनाद् विभावना। विभाव्यमानशरत्समयहेतुकत्वेन विरोधपरिहारः ।

**२. कारणविशेषभावरूपा** ( हेतुवैकल्येऽपि कार्योत्पत्तिः ) –

**हेतूनामसमग्रत्वे कार्योत्पत्तिश्च सा मता ।**

**अस्त्रैरतीक्ष्णकठिनैर्जगज्जयति मन्मथः ॥**

हेतूनाम असमग्रत्वे अपूर्णत्वेऽपि कार्योत्पत्तिवर्णने द्वितीया विभावना । यथा – अतीक्ष्णैः अकठिनैश्चास्त्रैः मन्मथः जगज्जयति । अत्र हि हेतूनाम अस्त्राणां तीक्ष्णत्वदिगुणवैकल्येऽपि जगज्जयरूपकार्योत्पत्तिवर्णनात् विभावना॥ अपरमपि उदाहरणं प्रस्तूयते–

**उद्यानमारुतोद्धूताश्चूतचम्पकरेणवः ।**

**उदस्रयन्ति पान्थानामस्पृशन्तो विलोचने ॥**

उद्यानमारुतात् उद्धूताः चूतचम्पकयोः( आम्रचम्पकयोः ) रेणवः ( परागकणाः) पान्थानां विलोचने अस्पृशन्तः उदस्रयान्ति ( अश्रूणि आनयन्ति ) ।

अत्र स्पर्शनाक्रियावैकल्येऽपि रेणुभिः बाष्पोद्गमनरूपकार्यजननाद् विभावना ।

**३. प्रतिबन्धके कार्योत्पत्तिः –**

**कार्योत्पत्तिस्तृतीया स्यात् सत्यपि प्रतिबन्धके ।**

**नरेन्द्रानेव ते राजन् ! दशत्यसिभुजङ्गमः ॥**

प्रतिबन्धे सत्यपि यदि कार्योत्पत्तिः वर्ण्यते सा तृतीया विभावना । अर्थात् अत्र कारणात् कार्योत्पत्तिः भवितुं कश्चित् प्रतिबन्धकः वा विघ्नः वा उपस्थितः तथापि कार्योत्पत्तिः जायते तत्र विभावना ।

यथा – हे राजन् ! तव असिरेव भूजङ्गमः ( सर्पः) नरेन्द्रानेव विषवैद्यानेव दशति इत्यत्र सर्पदंशप्रतिबन्धकमन्त्रौषधादिसत्त्वेऽपि दशतीति कार्योत्पत्तिवर्णनमस्ति । नरेन्द्राः विषवैद्याः सर्पदंशः ( विषम् ) चेति । नरेन्द्रशब्दस्य श्लेषेण नृपत्यर्थकत्वे विरोधपरिहारः । अन्यदेकम् उदाहरणं पश्यत ।

**चित्रं तपति राजेन्द्र ! प्रतापतपनस्तव ।**

**अनातपत्रमुत्सृज्य सातपत्रं द्विषद्गणम् ॥**

श्लोकार्थः – हे राजेन्द्र ! तव प्रतापरूपसूर्यः छत्रहरितं परित्यज्य छत्रयुक्तं द्विषद्गणं (शत्रुगणं) संतप्तं करोतीति आश्चर्यम् ।

अत्र तापप्रतिबन्धकम् आतपत्रं (छत्रम्) भूत्वा अपि प्रतापतपनः द्विषद्गणं तपतीति कार्योत्पत्तिवर्णनाद् विभावनालङ्कारः ।

**४. अकारणात् कार्योत्पत्तिः**

**अकारणात् कार्यजन्म चतुर्थी स्याद्विभावना।**
**शङ्खाद्वीणानिनादोऽयमुदेति महदद्भुतम्॥**

अकारणात् कारणभिन्नात् कार्यजन्म चतुर्थी विभावना। शङ्खाद्वीणानिनादः उदेति इत्यत्र वीणाध्वनेः कारणं वीणा, तद्भिन्नात् शङ्खाद् निनादोत्पत्तिवर्णनम् इत्यस्मात् विभावना। अत्र ‘शङ्ख’ इति शब्देन कमनीयः कामिनीकण्ठः तन्त्रीनिनादत्वेन तद्गीतं चाध्यवसीयते इत्यकारणात् कार्यजन्म। अपरेण श्लोकेन इतोऽपि स्पष्टीक्रियते।

**तिलपुष्पात्समायाति वायुश्चन्दनसौरभः।**
**इन्दीवरयुगाच्चित्रं निःसरन्ति शिलीमुखाः॥**

श्लोकार्थः – आश्चर्यमस्ति यत् तिलपुष्पात् चन्दनसौरभः वायुः समायाति तथा च द्वयोः नीलकमलयोः (नेत्राभ्याम्) शिलीमुखाः (बाणाः) निःसरन्ति इति। अत्र शिलीमुखाः इत्यस्य द्वितीयार्थः नेत्रकटाक्षाः इति श्लेषः।

अत्र चन्दनशीतलस्य वायोः तिलपुष्पात् कारणभिन्नादुत्पत्तिः इति विभावना। तिलकुसुमनायिकानासिकयोः वातनिश्वासयोः च अभेदाध्यवसानाद् विरोधपरिहारः।

**५. विरुद्धकार्योत्पत्तिः –**

**विरुद्धात् कार्यसम्पत्तिर्दृष्टा काचिद्विभावना।**
**शीतांशुकिरणास्तन्वीं हन्त संतापयन्ति माम्॥**

विरुद्धात् विरुद्धकारणात् कार्यसम्पत्तिः कार्योत्पत्तिः पञ्चमी विभावना। यथा शीतांशोः किरणाः तन्वीं सन्तापयन्तीत्यत्र शीतलत्वात् तापनिर्वतकाः चन्द्रकिरणाः तन्व्याः तापं जनयन्तीति विरुद्धकारणात् कार्योत्पत्तिरूपा विभावना। तन्व्याः विरहिणीत्वाद् विरोधपरिहारः। इतोऽपि उदाहरणमेकं प्रदीयते अत्र।

**उदिते कुमारसूर्ये कुवलयमुल्लसति भाति न क्षत्रम्।**
**मुकुलीभवन्ति चित्रं परराजकुमारपाणिपद्मानि॥**

कस्यचित् राजकुमारस्य प्रशंसा अत्र विधीयते । आश्चर्यमस्ति यत् यदा कुमाररूपसूर्यः उदेति तदा कुमुदिनी (पृथिवीमण्डलं ) विकसति, नक्षत्रं प्रकाशते तथा च शत्रुराजकुमाराणां पणयः मुकुलीभवन्ति इति।

अत्र सूर्ये उदिते सति कुवलयमुल्लसति, नक्षत्रं प्रकाशते, पद्मानि मुकुलीभवन्ति इति विरुद्धात् कारणात् कार्योत्पत्तिः वर्णिता । कुमारः एव सूर्यः, तस्मिन् उदिते भूमण्डलम् उल्लसति, क्षत्रं न भाति, शत्रुराजकुमाराणां पाणयः एव पद्मानि मुकुलीभवन्तीति योजनया विरोधपरिहारः ।

**६. कार्यात् कारणोत्पत्तिः –**

**कार्यात् कारणजन्मापि दृष्टा काचिद्विभावना ।**

**यशः पयोराशिरभूत् करकल्पतरोस्तव॥**

कारणात् कार्योत्पत्तिरिति नियममुल्लङ्घ्य कार्यात् कारणोत्पत्तिवर्णने षष्ठी विभावना। तव कर एव कल्पतरुः तस्माद् यश एव पयोराशिः अभूदित्यत्र क्षीरसमुद्रात् कल्पतरोः उत्पत्तिरिति प्रसिद्धं कार्यकारणभावमुल्लङ्घ्य कल्पतरोः पयोराशेः उत्पत्तिवर्णनाद् विभावना। राज्ञो वितरणशीलस्य करात् यशसः उत्पत्तिरिति विरोधपरिहारः। अन्यदेकम् उदाहरणं दीक्षिताचार्यः उल्लिखति। यथा वा –

**जाता लता हि शैले जातु लतायां न जायत् शैलः।**
**सम्प्रति तद्विपरीतं कनकलतायां गिरिद्वयं जातम्॥**

श्लोकार्थः – लता सदा पर्वते जायते, पर्वतः कदापि लतायाः नैव उत्पद्यते । किन्तु सम्प्रति तद्विपरीतम् अवलोकितं यत् कनकलतायां(कामिनीदेहे) गिरिद्वयं (कुचद्वयम्) जातम्।

अत्र कनकलतायां गिरिद्वयं जातमिति कार्यात् कारणोत्पत्तिः वर्णिता । कनकलताशब्देन कामिनीशरीरस्य, गिरिद्वयशब्देन स्तनद्वयमिति विवक्षा तस्मात् विरोधपरिहारः ।

एवं विभावनालङ्कारे बीजरूपेण विरोधः तिष्ठति । किञ्च तस्य विरोधस्य परिहारः विभावनायाः घटनं करोति । वस्तुतः लोके कारणाभावे कार्योत्पत्तिः नैव सिध्यति अतः आपाततः विरोधदर्शनस्य परिहारः करणीयः एव।

**स्वावलोकनप्रशनाः**

1. विभावना कतिविधा?
2. कारणं विना कार्योत्पत्तिः कस्मिन् अलङ्कारे सम्भवति?
3. 'चित्रं तपति राजेन्द्र !-----------------'इति उदाहरणं कस्य?
4. अकारणात् कार्योत्पत्तेः उदाहरणं लिखत।
5. 'विरुद्धकार्योत्पत्तिः' इति कस्य अलङ्कारस्य प्रकारः ?

**इदमत्रावधेयम्**

- विभावनालङ्कारे कारणाभावे कार्योत्पत्तिः कविप्रतिभोत्थापिता वर्तते।
- अलङ्कारोऽयं कार्यकारणभावेन सम्बद्धः विरोधगर्भालङ्कारोऽस्ति।
- विभावनायां कार्योत्पत्तिः अधोलिखितहेतुभिः प्रायशः सम्भवति । तदवलम्ब्य एव विभावनाभेदाः।

विभावनायां कार्योत्पत्तिः —
1. कारणं विना
2. हेतुवैकल्ये
3. प्रतिबन्धकसत्त्वे
4. अकारणात्
5. विरुद्धकारणात्
6. कार्यात् कारणजन्मा

**५.२.३. विशेषोक्तिः**

विशेषोक्त्यलङ्कारस्य लक्षणमेवं कथ्यते –

**कार्याजनिर्विशेषोक्तिः सति पुष्कलकारणे।**
**हृदि स्नेहक्षयो नाभूत् स्मरदीपे ज्वलत्यपि ॥**

पुष्कलकारणे प्रचुरकारणे सति कार्याजानिः कार्यानुत्पात्तिः विशेषोक्तिः नाम अलङ्कारः। स्मरदिपे ज्वलति सत्यपि हृदि स्नेहक्षयः (प्रेमक्षयश्च) नाभूत् इत्यत्र दीपज्वलने तैलक्षयकारणे सत्यपि तदक्षयवर्णनाद् विशेषोक्तिः। स्मरे दीप्यमाने प्रेमक्षयो नाभूदिति विवक्षयाविरोधपरिहारः। कारणाभावे

कार्योत्पत्तिर्विभावनाः कारणसत्वे कार्यानुत्पत्तिः विशेषोक्तिरिति अनयोः भेदः । अर्थात् विशेषोक्तिः विभावनायाः विपरीता वर्तते । कारणे सति कार्यस्य अनुपपत्तौ कविः प्रतिबन्धकनिमित्तं प्रदर्शयति । यदा निमित्तोल्लेखः तदा उक्तनिमित्ता विशेषोक्तिः स्यात् । निमित्तोल्लेखाभावे तु अनुक्तनिमित्ता विशेषोक्तिः भवेत् । विशेषोक्तेः अपरमुदाहरणं प्रदर्श्यते अत्र । तद्यथा –

**अनुरागवती संध्या दिवसस्तत्पुरःसरः ।**

**अहो दैवगतिश्चित्रा तथापि न समागमः ॥**

इयं संध्या (नायिका) अनुरागवती (अनुरक्ता) अस्ति । तथैव अयं दिवसः (नायकः) अपि तस्याः पुरःसरः (पुरोवर्ती आज्ञाकारी वा) वर्तते । तथापि तयोः न समागमः इति 'अहो देवगतिः विचित्रा' एव ।

अत्र समागमकारणसत्वेऽपि तदनुत्पत्तिवर्णनाद् विशेषोक्तिः । तत्र च निमित्तमुक्तम् 'अहोदैवगतिश्चित्रा' इति। अतः उक्तनिमित्ता विशेषोक्तिः अभवत् ।

**स्वावलोकनप्रश्नाः**

1. विशेषोक्त्यलङ्कारस्य लक्षणं किम् ?
2. विभावनाविशेषोक्त्योः भेदं निदर्शयत ।
3. विशेषोक्तेः उदाहरणं लिखत ।
4. 'हृदि स्नेहक्षयो नाभूत्' इत्यत्र विशेषोक्तेः लक्षणसमन्वयं साधयत ।
5. 'अनुरागवती संध्या -------------' इति उदाहरणे कविना किं निमित्तमुक्तम् ?

### ५.२.४. विषमालङ्कारः

**विषमं वर्ण्यते यत्र घटनाऽननुरूपयोः ।**

**क्वेयं शिरीषमृद्वङ्गी, क्व तावन्मदनज्वरः ॥**

अनुनुरूपयोः विसदृशयोः अर्थयोः यत्र घटना सम्बन्धो वर्ण्यते तत्र विषमालङ्कारः । इयं शिरीषमृद्वङ्गी क्व, तादृक् तथाविधः मकरध्वजः क्व इत्यत्र अतिमृदुलत्वेन अतिदुस्सहत्वेन च असदृशयोः अङ्गनामकरध्वजयोः घटनाद् विषमालङ्कारः । अयं च विषमालङ्कारः त्रिविधः –

१. विरूपघटनारूपः

२. विरूपकार्योत्पत्तिरूपः

३. इष्टार्थोद्यमाद् अनिष्टावप्तिरूपश्चेति।

४. क्रमशः सोदाहरणं तेषां विवरणं क्रियते।

**१. विरूपघटनारूपः विषमः -** यत्र विसदृशयोः अर्थयोः सम्बन्धः प्रदर्शितः स्यात् तत्र विरूपघटनारूपः विषमालङ्कारः। यथा हि -

**अभिलषसि यदीन्दो ! वक्त्रलक्ष्मीं मृगाक्ष्याः**
**पुनरपि सकृदब्धौ मज्ज सङ्क्षालयाङ्कम्।**
**सुविमलमथ बिम्बं परिजातप्रसूनैः**
**सुरभय, वद नो चेत्तवं क्व तस्या मुखं क्व॥**

**श्लोकार्थः -** हे इन्दो ! यदि त्वं मृगाक्ष्याः मुखकान्तिम् अभिलषसि तर्हि पुनरपि एकवारं समुद्रे निमज्ज्य निजकलङ्कं प्रक्षालय। ततश्च सुविमलं (स्वच्छं) बिम्बं पारिजातकुसुमैः सुगन्धमयं कुरु। नो चेत् वद, क्व त्वं क्व च तस्याः मुखम्?

अस्मिन् श्लोके चन्द्रमाः तथा च नायिकायाः मुखकान्तिः इत्यनयोः अननुरूपता तर्किता। अतः चन्द्र-वदनलक्ष्म्योः कवितर्किता घटनाद्विषमालङ्कारः।

**२. विरूपकार्योत्पत्तिरूपः विषमः –**

**विरूपकार्यस्योत्पत्तिरपरं विषमं मतम्।**
**कीर्तिं प्रसूते धवलां श्यामा तवकृपाणिका॥**

कारणगुणात् विरूद्धकार्यगुणोत्पत्तिवर्णने द्वितीयविषमालङ्कारः। यथा – श्यामवर्णायाः कृपाणिकायाः तद्विरुद्धधवलकीर्तेः उत्पत्तिवर्णनात् लक्षणसमन्वयः। कार्यस्य विलक्षणगुणशालित्वे विषमालङ्कारः। कारणस्य विरुद्धकार्यनिर्वर्तकत्वे पढ्चमी विभावना इत्यनयोः भेदः।

**३. इष्टार्थसमुद्यमात् अनिष्टावाप्तिरूपः विषमः**

**अनिष्टस्याप्यवाप्तिश्च तदिष्टार्थसमुद्यमात्।**
**भक्ष्याशयाऽहिमञ्जूषां दृष्ट्वाखुस्तेन भक्षितः॥**

इष्टार्थमुद्दिश्य किञ्चित् कर्मारब्धवतो न केवलम् इष्टस्य अप्राप्तिः अपि तु ततोऽनिष्टस्यापि प्रतिलम्भः (अवाप्तिः) चेदपि तृतीयविषमालङ्कारः। यथा – आखुः (मूषकः) भक्ष्यप्रेप्सया (भक्ष्यद्रव्यलाभतृष्णया) अहिमञ्जूषां सर्पपेटिकां दृष्ट्वा तत्र प्रविष्टः। किन्तु सर्पेण सः भक्षितः। अत्र आहारार्थं प्रवृत्तस्य मूषकस्य न केवलं भक्ष्यानवाप्तिः अपि तु मरणरूपा अनिष्टावाप्तिरपीति। अधोलिखितेन उदाहरणेन इतोऽपि स्पष्टं भवेत्।

**गोपाल इति कृष्ण! त्वं प्रचुरक्षीरवाञ्छया।**
**श्रितो मातृस्तनक्षीरमप्यलभ्यं त्वया कृतम्॥**

श्लोकार्थः – कश्चित् भक्तः कृष्णं वक्ति– हे कृष्ण ! त्वं गोपालः इति धिया प्रचुरक्षीरवाञ्छया अस्माभिः आराधितः। किन्तु त्वया मातृस्तनक्षीरमपि अलभ्यं कृतम् । अर्थात् मोक्षं प्रदाय मातृस्तनदुग्धलाभोऽपि अपहृतः ।

अत्र इष्टस्य प्रचुरक्षीरस्य अलाभः मातृस्तनक्षीरस्य अनवाप्तिरूपा अनिष्टावाप्तिश्चेति तृतीयविषमालङ्कारः।

एवम् इष्टार्थप्राप्त्यर्थं कृतेन प्रयासेन इष्टस्य अप्राप्तिः एव न अपि तु अनिष्टप्राप्तिरपि जायते ।

**स्वावलोकनप्रश्नाः**

1. घटनाऽननुरूपयोः वर्णने कोऽलङ्कारः?
2. विषमालङ्कारस्य कति प्रकाराः प्रोक्ताः?
3. 'कीर्तिं प्रसूते धवलां श्यामा तव कृपाणिका' इत्यत्र विषमालङ्कारलक्षणं समन्वयत।
4. इष्टार्थसमुद्यमात् अनिष्टावाप्तिः कस्मिन् अलङ्कारे वर्णिता?
5. विरूपघटनारूपविषमालङ्कारस्य उदाहरणं लिखत।

**अवधेयांशाः**

- विषमालङ्कारः त्रिविधोऽस्ति।
- यत्र परस्परानुरूपयोः अर्थयोः घटना ( सम्बन्धः ) तत्र प्रायः 'क्व-क्व' इति अव्ययप्रयोगः परिलक्ष्यते।

- कार्यकारणयोः गुणे वा क्रियायां वा परस्परवैषम्यवर्णनं भवति।
- कृते इष्टार्थप्रयासे इष्टानवाप्तिः अनिष्टावाप्तिश्च दृश्यते।

**५.३. उपसंहारः**

अस्मिन् पञ्चमे खण्डे अस्माभिः विरोधगर्भालङ्काराः निरूपिताः । तत्र हि विरोधाभासः, विभावना, विशेषोक्तिः विषमश्चेत्यादयः अलङ्काराः अधिगताः । एतेषां सर्वेषां मूले विरोध एव तिष्ठति । अर्थात् द्वयोः पदार्थयोः इत्युक्ते उपमेयोपमानयोः विरोधसम्बन्धः चमत्कृतिम् उत्पाद्य काव्यशोभायाः पोषकः भवति। यथा सादृश्यगर्भालङ्कारेषु सूक्ष्मभेदाः तथा विरोधमूलकालङ्कारेष्वपि अवलोक्यन्ते । किञ्च अस्माभिः ते अवधेयांशरूपेण विवेच्य दृष्टिपथम् आनीताः । तदनु भवन्तः तेषामलङ्काराणां गूढत्वावगमने क्षमाः भविष्यन्ति । सर्वत्र लक्षणमुदाहरणञ्च प्रदर्श्य बोधनशैलीसौकर्यम् उपपादितमस्ति । इतः परं न्यायमूलकालङ्काराणां विवेचनम् आरभ्यते।

# कुवलयानन्दः

## षष्ठः खण्डः

**संरचना**

६.०. प्रस्तावना

६.१. लक्षिताधिगमविशेषाः

६.२. न्यायमूलकालङ्काराः

६.२.१. तर्कन्यायमूलकालङ्कारः

६.२.१.१. काव्यलिङ्गलङ्कारः

६.२.२ लोकन्यायमूलकालङ्कारः

६.२.२.१. तद्गुणालङ्कारः

६.२.२.२. अतद्गुणालङारः

६.२.२.३ सामान्यालङ्कारः

६.२.२.४. मीलितालङ्कारः

६.२.२.५. उन्मीलितालङ्कारः

६.३. उपसंहारः

### ६.०. प्रस्तावना

इदानीं यावदस्माभिः उपमेयोपमानयोः सादृश्य-विरोध-सम्बन्धेन समुत्पन्नाः अलङ्काराः व्यपदिष्टाः । उपमेयोपमानयोः सम्बन्धमधिकृत्यैवालङ्काराः इति पूर्वविदितमेव खलु । परमयं सम्बन्धः क्वचित् न्यायमूलकोऽपि वर्तते । अर्थात् कश्चित् न्यायः मूलरूपेण उपयुज्य कविः निजाभिप्रायं ज्ञापयितुं प्रयतते । यतः तेनापि काव्ये चमत्कृतिः परिलक्ष्यते । अतः तादृशाः न्यायमूलकालङ्काराः पाठ्यांशेऽस्मिन् समाविष्टाःसन्ति । तेषां बोधः भवत्विति धिया खण्डेऽस्मिन् सविस्तरं विवेच्यन्ते ।

### ६.१. लक्षिताधिगमविशेषाः

- छात्रः काव्येषु प्रयुज्यमानानां कतिचन न्यायमूलकालङ्कारणां परिचयं प्राप्नोति ।
- चारुत्वम् उपपादयितुं न्यायमूलकालङ्काराः कथं प्रभवन्ति? इत्यवगच्छति।

- एतेषामलङ्कारानाम् अवबोधाय शास्त्रे व्यवहारे च अनुभूयमाना न्यायविषयिणी जिज्ञासा वर्धते।
- अत्र निरूपितानां न्यायगर्भालङ्कारणां प्रयोगेन भाषासौन्दर्यवर्धनाय छात्रः समर्थः भवति।
- अन्येषु काव्येषु तादृशालङ्काराणाम् अन्वेषणे छात्रः प्रवर्तते।

### ६.२. न्यायमूलकालङ्कारः

'न्याय' इत्यस्यार्थः मुख्यतः विधिः वा पद्धतिः वा उचितानुचितनिर्णयः वेति। तथैव प्रमाणैः विषयाणां परीक्षणं विधाय दृष्टान्तान्विता उक्तिरिति न्यायः। अर्थात् कश्चिदागते प्रसङ्गे कस्याश्चित् विलक्षणघटनायाः सूचनादायिनी उक्तिः न्यायोक्तिरिति प्रायः कथ्यते। इत्थं शास्त्रे, काव्ये लोके च प्रचलितन्यायमाधारीकृत्य अलङ्कारः न्यायमूलकोऽलङ्कारः इति। अत्र हि प्रायः उपमानोपमेययोः कारणकार्यसम्बन्धेन चमत्कृतेः उपपादनं संलक्ष्यते। यथा नीरक्षीरविवेकन्यायः इत्यत्र यथा नीरक्षीरयोः केवलं क्षीरमेव गृह्णाति हंसः इति लोके अवलोक्य सद्गुणदुर्गुणयोः केवलं गुणग्रहणम् इत्यस्मिन् सन्दर्भे नीरक्षीरविवेकः इत्युक्तिः प्रयुज्यते। ईदृशः न्यायमूलकालङ्कारः त्रिविधः – तर्कन्यायमूलकः, वाक्यन्यायमूलकः लोकन्यायमूलकश्चेति। तेषां विवेचनमधुना क्रियते।

### ६.२.१. तर्कन्यायमूलकालङ्कारः

यत्र कारणप्रमाणादीनि आदाय तर्केण कतिचनविशेषताः प्रतिपादिताः भवन्ति। अर्थात् तर्कशास्त्रपरिभाषिकशब्दान् प्रयुज्य काव्ये वैशिष्ट्यविवेचनं क्रियते तत्र तर्कन्यायमूलकालङ्कारोऽस्ति। अत्र हि अनुमानः काव्यलिङ्गञ्चेति अलङ्कारद्वयं निवेशयन्ति आलङ्कारिकाः। परन्तु तत्र केवलं काव्यलिङ्गालङ्कारः पाठ्यांशे समविष्टः अतः तस्य एव वर्णन क्रियते सम्प्रति।

### ६.२.१.१. काव्यलिङ्गालङ्कारः

**समर्थनीयस्यार्थस्य काव्यालिङ्गं समर्थनम्।**
**जितोऽसि मन्द ! कन्दर्प! मश्चित्तेऽस्तित्रिलोचनः॥**

यत्र समर्थनीयार्थस्य समर्थनं केनचित् पदेन वाक्येन वा क्रियते तत्र काव्यलिङ्गालङ्कारः स्यात्।

यथा हे मन्द ( मूर्खः) कन्दर्प (कामदेव) ! त्वं जितोऽसि, ममचित्ते त्रिलोचनोऽस्ति इति।

अत्र मदनजयस्य दुष्करत्वात् तज्जयोपन्यासः समर्थनसापेक्षः। वस्तुतः कामदेवजयः न सुलभः केवलं शिवः एव तं पराजेतुं समर्थः। अतः 'कामदेव ! जितोऽसि' इति वाक्यसमर्थनावश्यकता प्रतीयते। अस्य वाक्यस्य समर्थनं स्वान्तःकरणे मदनदाहकत्रिलोचनसन्निधानप्रदर्शनं कृतमिति काव्यलिङ्गम्। समर्थको हेतुः वाक्यार्थः पदार्थो वा भवति। 'मच्चित्तेऽस्ति त्रिलोचनः' इत्यत्र वाक्यार्थो हेतुः।

नैयायिकानां परिभाषिकशब्दः 'लिङ्गम्' इति। तस्यार्थः हेतुरिति। नैयायिकानाम् अनुमानसरणौ येन हेतुना (अनुमापकेन) साध्यानुमितिः स्यात् सः हेतुरेव लिङ्गमिति उच्यते। यथा 'पर्वतोऽयं वह्निमान् धूमात्' इत्यत्र 'धूमः' लिङ्गम् (हेतुः) भवति। अत्र लिङ्गस्य साध्येन सह व्याप्तिसम्बन्धः तथा च पक्षे तस्य सत्ता (धर्मता) अपक्ष्यते। यावत् धूमः (लिङ्गम्) तथा च अग्निः (साध्यम्) इत्यनयोः न व्याप्तिसम्बन्धः तावत् धूमात् अग्नेः अनुमितिः न। इत्थं नैयायिकानां 'लिङ्गम्' सदा व्याप्तिः तथा च पक्षधर्मता इत्यनयोः अपेक्षां करोति।

परन्तु आलङ्कारिकाणां हेतुः साध्येन सह व्याप्तिसम्बन्धेन पक्षे सत्तात्वेन भवेदिति नास्ति अनिवार्यम्। भेदमयं प्रदर्शयितुं लिङ्गशब्दात् पूर्वं 'काव्यम्' इति पदं प्रयुज्य 'काव्यलिङ्गम्' इति नामकरणं विहितम् आलङ्कारिकैः। अयमलङ्कारः वाक्यार्थहेतुकः पदार्थहेतुकः चेति द्विधा निर्दिष्टः। उपर्युक्तमुदाहरणं वाक्यार्थहेतुककाव्यलिङ्गस्य अस्ति। पदार्थहेतुककाव्यलिङ्गस्य उदाहरणं सम्प्रति प्रस्तूयते। तद्यथा –

**भस्मोद्धलन !भद्रमस्तु भवते रुद्राक्षमाले !शुभं**
**हा सोपानपरम्परे ! गिरिसुताकान्तालयालङ्कृते।**
**अद्याराधनतोषितेन विभुना युष्मत्सपर्यासुखा-**
**लोकोच्छेदिनि मोक्षनामनि महामोहे निलीयामहे॥**

श्लोकार्थः – कश्चित् शिवभक्तः शिवपूजासामग्रीं सम्बोधयन् वदति- भस्म ! तव कल्याणं भव। हे रुद्राक्षमाले ! त्वं कुशलिनी भव। पार्वतीपतिशिवस्य मन्दिरम् अलङ्कुर्वती सोपानपङ्क्ति ! अद्य आराधनया तोषितेन शिवेन युष्मत्सपर्यासुखात् (भवत्याः पूजायाः सुखात् ) वञ्चितोऽहं सन् लोकोच्छेदिनि मोक्षनामनि महामोहे पातितः। अर्थात् मोक्षदानं कृतमिति।

अत्र मोक्षः 'महामोह' इति पदेन व्याहतः। वस्तुतः दर्शनशास्त्रे मोक्षः परमानन्दरूप इत्यतः तस्य महामोहरूपत्वम् अप्रसिद्धम्। एवं सति तत्समर्थनसापेक्षतायां सुखालोकोच्छेदिनीति पदार्थहेतुः उपन्यस्तः। यतो हि मोक्षे प्राप्ते सपर्यासुखं नैव शक्यम्।

क्वचित् पदार्थवाक्यार्थौ परस्परसापेक्षौ हेतुभावं भजतः । एवं कस्यचित् तथ्यसमर्थनाय विशेषहेतुः उक्तः भवति । तथा च तथ्यवाक्यं हेतुवाक्यं चेत्यनयोः कार्यकारणभावः दृश्यते । किञ्चोऽयं भावः व्यङ्ग्यः स्यात् । काव्यलिङ्गे वाक्यद्वयमपि प्रस्तुतपरकं वर्तते ।

**इदमत्रावधेयम् –**

काव्यलिङ्गम् अर्थान्तरन्यासः इत्यनयोः भेदः ।

| **काव्यलिङ्गम्** | **अर्थान्तरन्यासः** |
| --- | --- |
| 1. तथ्यसमर्थनाय विशेषहेतुप्रयोगः । | 1. अत्र सामान्यस्य विशेषेण विशेषस्य च सामान्येन समर्थनम्। |
| 2. द्वयोः वाक्ययोः कार्यकारणभावसम्बन्धः । | 2. द्वयोः वाक्ययोः सामान्यविशेषभावसम्बन्धः। |
| 3. द्वयोः वाक्ययोः प्रस्तुतपरकत्वम् । | 3.एकं वाक्यं प्रस्तुतपरकम् अपरञ्च अप्रस्तुतपरकम्। |

**स्वावलोकनप्रश्नाः**

1. काव्यलिङ्गालङ्कारस्य लक्षणं किम्?
2. काव्यलिङ्गालङ्कारे ‘लिङ्गम्’ इति पदस्य कोऽर्थः ?
3. काव्यालिङ्गालङ्कारः कतिविधः ?
4. अत्र तथ्यवाक्यं हेतुवाक्यं चेत्यनयोः कः सम्बन्धः?
5. ‘पर्वतोऽयं वह्निमान् धूमात्’ इत्यत्र लिङ्गं किम्?

### ६.२.२. लोकन्यायमूलकालङ्कारः

यल्लोके व्यवहारे च वर्तते दृश्यते वा तदनु काव्ये समुपवर्ण्य चारुत्वसम्पादनं कविभिः क्रियते। अर्थात् जगति विद्यमानम् उपमेयोपमानेन प्रदर्श्य अलङ्कृतिः निर्मीयते तत्र लोकन्यायमूलकालङ्कार इति। लोकविधिः व्यवहाररीतिः वा काव्यालङ्कारे मूलरूपेण कारणं भवति इत्यतः लोकन्यायमूलकालङ्कारः इति व्यपदिश्यते । तत्र हि मीलित-सामान्य-तद्गुण-अतद्गुण-उत्तरादयः अलङ्काराः समाविशन्ति । तेषु कतिचन् पाठयांशेऽस्मिन् योजिताः । तेषां विषये एव सविस्तरम् अधुना कथयिष्यते ।

### ६.२.२.१. तद्गुणालङ्कारः

**तद्गुणः स्वगुणत्यागादन्यदीयगुणग्रहः ।**
**पद्मरागायते नासामौक्तिकं तेऽधरत्विषा ॥**

प्रथमपङ्क्तौ तद्गुणालङ्कारस्य लक्षणं द्वितीयपङ्क्तौ च उदाहरणं प्रदत्तमस्ति ।

स्वगुणत्यागात् अन्यदीयगुणग्रहणं तद्गुणालङ्कारः । यथा –

हे सुन्दरि ! ते नासामौक्तिकम् अधरत्विषा पद्मरागायते । अर्थात् नासिकायां परिधृतं मौक्तिकम् अधरकान्त्या पद्मरागमणिशोभां प्राप्नोति ।

अत्र हि नासामौक्तिकं स्वीयधवलत्वं त्यक्त्वा ओष्ठस्य रक्तत्वं गृह्णाति इत्यतः तद्गुणालङ्कारः।

तद्गुणालङ्करे 'गुण' इति पदं रूप-रस-गन्धादिगुणानां वाचकम् अस्ति। अत्र हि वर्णितौ भिन्नगुणान्वितौ पदार्थौ परस्परं प्रभावितौ कुरुतः । किञ्च एकपदार्थस्य गुणः अन्यपदार्थस्य गुणापेक्षया उत्कृष्टः भवति । उत्कृष्टगुणयुक्तः पदार्थः प्रकृतं वा अप्रकृतं वेति भवितुमर्हति । तथैव उत्कृष्टगुणग्रहणक्रिया अलङ्कारे विद्यते ।

अपरमेकमुदाहरणम् उपस्थाप्यते । यथा -

**वीर ! त्वद्रिपुरमणी परिधातुं पल्लवानि संस्पृश्य।**
**न हरति वनभुवि निजकररुहरुचिखचितानि पाण्डुपत्रधिया ॥**

हे वीर ! तव रिपुरमणी (शत्रुपत्नी) परिधातुं (परिधानं कर्तुम्) पल्लवानि संस्पृशति । किन्तु स्वीयनखकान्त्या श्वेतानि जातानि पर्णानि पक्वानि इति विचिन्त्य भूमौ त्यजति ।

अत्र वृक्षपल्लवानि निजहरितवर्णं त्यक्त्वा शत्रुपत्न्याः नखानां श्वेतकान्तिग्रहणं कुर्वन्ति इति तद्गुणालङ्कारः ।

### ६.२.२.२. अतद्गुणालङ्कारः

**सङ्गतान्यगुणानङ्गीकारमाहुरतद्गुणम् ।**
**चिरं रागिणि मच्चित्ते निहितोऽपि न रञ्जसि ॥**

यत्र कश्चित्पदार्थः सम्बद्धवस्तुनः गुणस्य ग्रहणं न करोति तत्र अतद्गुणालङ्कारः भवतीति लक्षणम्। सङ्गतान्यपि गुणस्य अनङ्गीकारः अत्र ।

यथा मम रागिणि चित्ते (अनुरागयुक्तचित्ते) चिरं निहितोऽपि (दीर्घकालात् स्थित्वा अपि) अनुरक्तः न भवतीति काचित् नायिका नायकम् अनुनयं कुर्वती वक्ति। अनुरक्तचित्ते स्थित्वा अपि अननुरक्तश्चेति अतद्गुणः। अन्यः एकः श्लोकः उदाह्रियते । यथा –

**गण्डाभोगे विहरति मदैः पिच्छिले दिग्गजानां**
**वैरिस्त्रीणां नयनकमलेष्वञ्जनानि प्रमार्ष्टि ।**
**यद्यप्येषा हिमकरकराद्वैतसौवस्तिकी ते**
**कीर्तिर्दिक्षु स्फुरति तदपि श्रीनृसिंहक्षितीन्द्रः ॥**

**श्लोकार्थः - ** हे नृसिंहनरेन्द्र ! यद्यपि भवतः कीर्तिः दिग्गजानां मदैः पिच्छिले (पङ्किले/मलिने) गण्डस्थले विहरति तथा च शत्रुरमणीनां नयनकमलेषु स्थितम् अञ्जनं प्रमार्ष्टि (प्रक्षालयति ) तथापि चन्द्रकिरणानाम् अद्वैतसौवस्तिकी (कुशलतां प्रष्टुकामा) भूत्वा (चन्द्रस्य किरणा इव उज्ज्वलतां प्राप्य) दिक्षु स्फुरति (प्रकाशमाना भवति) ।

यद्यपि राजकीर्तिः दिग्गजानां मदमलिनगण्डस्थलेन तथा च वैरिस्त्रीणां कज्जलेन सम्बद्धा तथापि तयोः गुणग्रहणं नैव करोति ।

अत्र हि उपमेयमुपमानस्य वा उपमानमुपमेयस्य वा गुणग्रहणं नैव करोति। अयमलङ्कारः तद्गुणालङ्कारविरोधी अस्ति । न्यूनगुणयुक्तवस्तु उत्कृष्टगुणवस्तुनः संसर्गे भवतिकिन्तु निजगुणं त्यक्त्वा उत्कृष्टगुणग्रहणं न करोति ।

**इदमत्रावधेयम्** –

तद्गुणे गुणग्रहणम् अतद्गुणे च गुणस्य अग्रहणमिति उभयोः भेदः । लोके प्रायः उत्कृष्टगुणस्य ग्रहणं वा अग्रहणं वा अवलोक्यते । अयमेव न्यायः मूले संस्थाप्य अलङ्कारभेदाः भवन्ति इत्यतः लोकन्यायमूलकालङ्कारेषु समावेशः तस्य ।

**स्वावलोकनप्रश्नाः**

1. तद्गुणालङ्कारः कुत्र भवति ?
2.सङ्गतानि वस्तूनि भूत्वा अपिगुणस्य अनङ्गीकारः कुत्र ?
3. 'हे वीर ! त्वद्रिपुरमणी ------------- इत्यत्र कोऽलङ्कारः ?
4. तद्गुणातद्गुणयोः को भेदः ?
5. तद्गुण-अतद्गुणालङ्कारयोः गुणपदं कस्य वाचकम्?

**६.२.२.३. सामान्यालङ्कारः**

**सामान्यं यदि सादृश्याद्विशेषो नोपलक्ष्यते ।**
**पद्माकरप्रविष्टानां मुखंनालक्षि सुभ्रुवाम् ॥**

यदि सादृश्यात् विशेषः नोपलक्ष्यते तत्र सामान्यालङ्कारः भवति। अर्थात् सादृश्यगुणकारणात् द्वयोः पदार्थयोः विशेषः नावगम्यते। द्वयोः सामान्या प्रतीतिरेव वर्तते तत्र सामान्यालङ्कारः। यथा –

पद्माकरप्रविष्टानां सुभ्रुवां मुखं नालक्षि। अस्यार्थः स्नानाय पद्माकरे (सरोवरे) प्रविष्टानां सुभ्रुवाम्(सुन्दरीणाम्) मुखानि कमलेषु विलीनानि इत्यतः दृष्टिपथं नागतानि।

यद्यपि अत्र द्वयोः पदार्थयोः भिन्नस्वरूपावभासः सादृश्यात् परिलक्ष्यते तथापि व्यावर्तनविशेषः नोपलक्ष्यते। अर्थात् पद्मानां मुखानां च व्यक्त्यन्तरतया मानम् अस्त्येव किन्तु इदं पद्मम् इदं मुखमिति विशेषः परं नैव ज्ञायते प्रत्युत साम्येन स्वरूपप्रतीतिः स्यात् अतः अन्वर्थकं नाम 'सामान्यालङ्कारः' इति।

प्रस्तुतमिदम् उदाहरणं इतोऽपि स्पष्टतां कारयति। तद्यथा–

रत्नस्तम्भेषु संक्रान्तप्रतिबिम्बशतैर्वृतः।
लङ्केश्वरः सभामध्ये न ज्ञातो वालिसूनुना॥

श्लोकार्थः – रत्नस्तम्भेषु संक्रान्तप्रतिबिम्बशतैः वृतः लङ्केश्वरः (रावणः) सभामध्ये वालिपुत्रेण न ज्ञातः।

अत्र रावणदेहस्य तत्प्रतिबिम्बानाञ्च अयं बिम्बः प्रतिबिम्ब इति विशेषः नावगतः वालिपुत्रेण। यतो हि रत्नस्तम्भः इव रत्नालङ्कारैः परिधृतोऽऽसीत् रावणः। रत्नानां गुणसाम्यात् स्वरूपप्रतीतौ अपि भेदतिरोधानेऽपि साम्येन व्यावर्तकावभासे सामान्यम्।

### ६.२.२.४. मिलितालङ्कारः –

**मीलितं यदि सादृश्याद्भेद एव न लक्ष्यते।**
**रसो नालक्षि लाक्षायाश्चरणेसहजारुणे ॥**

मीलितालङ्कारस्य लक्षणं पूर्वार्धे उत्तरार्धे च उदाहरणं दृश्यते। यदि सादृश्यात् भेद एव न लक्ष्यते तर्हि मीलितालङ्कारः। अर्थात् द्वयोः पदार्थयोः सादृश्यात् परस्परसंश्लिष्टता भेदं नैव लक्षयति तत्र मीलितालङ्कारः। यथा –

नायिकायाः सहजारुणे चरणे लाक्षायाः रसः नालक्षि। अत्र हि लाक्षारसः तथा च चरणयोः अरुणिमा इत्यनयोः सादृश्यकारणात् (गुणसाम्यात् ) परस्परसंश्लिष्टता तादृशी वर्तते यत् द्वयोः भेद एव न लक्ष्यते।

मीलितालङ्कारे एकेन अपरस्य भिन्नस्वरूप-अनवभासरूपं मीलंन क्रियते । सामान्यालङ्कारविरोधी अयं मीलितालङ्कारोऽस्ति । वस्तुद्वयस्य लक्षणसाम्यात् तयोः केनचिद् बलीयसा तदन्यस्य स्वरूपतिरोधाने (भेदगोपने) मीलितम् ।अत्र हि प्रधानगौणयोः पदार्थयोः वर्णनं भवति। अन्यदेकम् उदाहरणं पठन्तु भवन्तः।

यथा – **माल्लिकामाल्यभारिण्यः सर्वाङ्गीणार्द्रचन्दनाः।**
**क्षौमवत्यो न लक्ष्यन्ते ज्योत्स्नायामाभिसारिकाः॥**

**श्लोकार्थः** -माल्लिकामालानाम् आभरणानि धृत्वा, सर्वाङ्गे चन्दनं लेपयित्वा तथा च क्षौमवस्त्रं (श्वेतरेशमवस्त्रम्) परिधार्य गम्यमानाः अभिसारिकाः ज्योत्स्नायां न लक्ष्यन्ते।

चन्द्रिका-अभिसारिकाणां धवलिमगुणसाम्यात् भेदानध्यवसायः(भेदलोपः)।

**इदमत्रावधेयम्**

- सामान्यमीलितयोः गुणसाम्यात् अभेदः भूत्वा अपि सूक्ष्मभेदः वर्तते। सः च यथा–

| **सामान्यम्** | **मीलितम्** |
|---|---|
| 1. भिन्नस्वरूपावभासरूपम्। | 1. भिन्नस्वरूपानवभासरूपम्। |
| 2. भेदातिरोधानात् सामान्यम्। | 2. भेदतिरोधानात् मीलितम्। |
| 3. साम्येन व्यावर्तकानवभासः। | 3. साम्येन व्यावर्तकावभासः। |
| 4. समानधर्मात् द्वयोः पदार्थयोः परस्परविलीनता भवति। | 4. बलवता पदार्थेन निर्बलपदार्थस्य निगूहनं भवति। |

- मीलितालङ्कारे तुल्यधर्मात् गौणपदार्थस्य प्रधानपदार्थद्वारा निगुहनं दृश्यते।

**स्वावलोकनप्रश्नाः**

1. सादृश्यात् विशेषः कुत्र नोपलक्ष्यते ?
2. सादृश्यात् भेदः कुत्र न लक्ष्यते ?
3. 'पद्माकरप्रविष्टानाम् ------------ इति कस्य अलङ्कारस्य उदाहरणम् ?
4. चन्द्रिकाभिसारिकाणां कस्मिन् गुणे साम्यम्?
5. मीलितालङ्कारस्य उदाहरणं किं प्रदत्तम्?

### ६.२.२.५. उन्मीलितालङ्कारः

**भेदवैशिष्ट्योः स्फूर्तावुन्मीलितविशेषकौ।**
**हिमाद्रिं त्वद्यशोमग्नं सुराः शीतेन जानते॥**

यत्र मीलितालङ्कारस्य लक्षणे दृष्टे अपि केनापि विशेषकारणेन भेदप्रतीतिः तत्र उन्मीलितालङ्कारः। यथा –

हे राजन् ! हिमालयः त्वद्यशोमग्नः (तव यशासि लीनः) किन्तु सुराः (देवताः) शीतगुणकारणात् तं जानन्ति।

अत्र हिमालयः राजा इत्यनयोः यशसि अभेदः परन्तु शीतगुणहेतोः सुराः द्वयोः भेदं जानन्ति। मीलितप्रतिद्वन्द्वयुन्मीलितम् अस्ति।

मीलितन्यायेन भेदानध्यवसाये प्राप्ते कुतोऽपि हेतोः भेदस्फूर्तौ उन्मीलितालङ्कारः।

**स्वावलोकनप्रश्नाः**

1. उन्मीलितालङ्कारस्य वैशिष्ट्यम् किम्?
2. 'हिमाद्रिं त्वद्यशोमग्नं -------------' इत्यत्र लक्षणसमन्वयं कुरुत।
3. मीलितोन्मीलितयोः भेदं प्रदर्शयत।

### ६.३. उपसंहारः

कुवलयानन्दस्य षष्ठे खण्डे भवद्भिः न्यायमूलकालङ्काराः अधिगताः । न्यायमूलके अन्तर्भूताः तर्कन्यायलोकन्यायालङ्काराः कीदृशाः भवन्ति ? तेषां योजनया काव्यसौन्दर्यं कथं वृद्धीङ्गच्छति इति अवलोकितम् । तेषु समाविष्टाः कतिचन अलङ्काराः सोदाहरणं सलक्षणञ्च प्रतिपादिताः । भवतां सौकर्याय तत्र-तत्र विशेषबोधोऽपि कारितः । काव्यलिङ्ग-तद्गुण-अतद्गुण-मीलित-उन्मीलित-सामान्यादयः खण्डेऽस्मिन् विवक्षिताः। तेषां वैशिष्ट्यमपि प्रस्तुतमत्र। सप्तमे खण्डे मिश्रालङ्काराणां वर्णनं क्रियते अस्माभिः।

# कुवलयानन्दः

## सप्तमः खण्डः

**संरचना**

७.०. प्रस्तावना
७.१. लक्षिताधिगमविशेषाः
७.२. मिश्रालङ्काराः
    ७.२.१. संसृष्टिः
    ७.२.२. सङ्करः
        ७.२.२.१ – अङ्गाङ्गिभावसङ्करः
        ७.२.२.२ – समप्राधान्यसङ्करः
        ७.२.२.३ – संदेहसङ्करालङ्करः
        ७.२.२.४ – एकवाचकानुप्रवेशसङ्करः
        ७.२.२.५ – सङ्करसङ्करालङ्कारः
७.३. गूढार्थप्रतीतिमूलकालङ्कारः
    ७.३.१. स्वभावोक्तिः
७.४. उपसंहारः

**७.०. प्रस्तावना**

पूर्वतनीये खण्डे अस्माभिः उपमानोपमेययोः न्यायमूलकसम्बन्धम् आधारीकृत्य सम्भूताः अलङ्काराः विवृताः । अधुना खण्डेऽस्मिन् मिश्रालङ्कार-गूढार्थप्रतीतिमूलकालङ्कारयोः निरूपणं क्रियते । काव्यकृतिषु चमत्कृतिसम्पादनाय कवयः तेषाम् अलङ्काराणां योजनां कुर्वन्ति । न केवलं संस्कृतसाहित्ये अपि तु अन्यत्रापि एतेषां सर्वेषाम् अलङ्काराणां प्रयोगः दृश्यते । तेन हि पाठ्यांशेऽस्मिन् तेषां समावेशः कृतोऽस्ति । तेषां विवरणमधुना अत्र विधीयते ।

**७.१. लक्षिताधिगमविशेषाः**

- छात्रः मिश्रालङ्कारविषये ज्ञानं प्राप्नोति ।
- तेन सह गूढार्थप्रतीतिमूलकालङ्कारविषयोऽपि अवगम्यते ।
- सर्वेषाम् अलङ्काराणां वैशिष्ट्यानि ज्ञातुं प्रभवति ।

- अलङ्काराः काव्ये कथं प्रयोक्तव्याः ? इति उदाहरणेन अवगच्छति।
- लघुकाव्यं वा महाकाव्यं वा पठित्वा लक्षणसमन्वयाय प्रयतते।

### ७.२. मिश्रालङ्काराः

एकस्मिन् पद्ये श्लोके वा क्वचिदलङ्कारद्वयम् अथवा ततोऽपि अधिकान् अलङ्कारान् कविः प्रयुङ्क्ते। एवम् अलङ्काराणां मेलनं'मिश्रालङ्कारः' इति कथ्यते। इदं सम्मिश्रणं काव्येषु विशिष्टां चमत्कृतिं साधयति। सहृदयहृदयाह्लादकारकोऽयं चमत्कारः कविभ्यः अतीव रोचते। यथा मनुष्यः तथा च सिंहः इत्यनयोः मिश्रणं नरसिंहः भवति। अयं नरसिंह निजवैशिष्ट्ये सर्वेभ्यः मनुष्येभ्यः पृथगाभाति। तथैव द्वित्राणामलङ्काराणां सम्मिश्रणं पृथगेव चारुत्वं सम्पादयति इत्यतः मिश्रालङ्कारः इति भिन्नः एव विभागः आलङ्कारिकैः दर्शितः। तत्र संसृष्टिः सङ्करश्चेति द्वौ अलङ्कारौ निवेशितौ। तयोः विवेचनमधुना क्रियते।

### ७.२.१. संसृष्टिः

मिश्रालङ्कारेषु संसृष्टिः इति एकतमोऽस्ति। यत्र तिलतण्डुलन्यायेन स्फुटावगम्यभेदालङ्कारमेलनं तत्र 'संसृष्टिः' नामकः अलङ्कारः स्यात्। यथा एकस्मिन् पात्रे तिल-तण्डुलं सम्मिश्र्य स्थापयामश्चेत् द्वयोः स्पष्टतया ज्ञानं भवति। अथवा द्वयोः पदार्थयोः सुस्पष्टम् अवगमनं शक्यते। तथैव एकस्मिन्नैव श्लोके शब्दालङ्कारार्थालङ्कारयोः मेलनं स्पष्टं ज्ञायते। अर्थात् कस्य अलङ्कारस्य अधिकं मिश्रणमस्ति अथवा केषामलङ्काराणां सम्मिश्रणं वर्तते इति सहृयाः स्फुटम् अवगच्छन्ति तत्र संसृष्टिः इति अलङ्कारः स्यात्। अत्रेदं ज्ञातव्यं यत् तत्र सम्मिश्रिताः अलङ्काराः परस्परनिरपेक्षाः वा स्वतन्त्राः वा भवन्तीति। किञ्च साम्मिश्रणमिदं कदाचित् केवलं शब्दालङ्काराणां, क्वचित्तु अर्थालङ्काराणां कुत्रचित् उभयोः नाम शब्दार्थालङ्कारयोः सन्दृश्यते। अतः संसृष्टिः त्रिविधा अस्ति।

**संसृष्टिः**

शब्दालङ्कारसंसृष्टिः    अर्थालङ्कारसंसृष्टिः    शब्दार्थालङ्कारसंसृष्टि

सम्प्रति तेषां सर्वेषाम् उदाहरणानि पश्यामः।

**१. शब्दालङ्कारसंसृष्टिः–**

**कुसुमसौरभलोभपरिभ्रमद्भ्रमरसम्भ्रमसम्भृतशोभया।**
**चलितया विदधे कलमेखलाकलकलोऽलकलोलदृशान्यया॥**

शिशुपालवधमहाकाव्यस्य षष्ठे सर्गे प्रस्तुतश्लोकः उद्धृतोऽस्ति ।

सुगन्धयुक्तपुष्पस्य भ्रमात् भ्रमराः परितः भ्रमित्वा कस्याश्चित् नाग्निकायाः शोभाम् अवर्धयन् । तस्याः केशाः नेत्रचञ्चलतां कारयन्ति स्म। तादृशी सा चलित्वा मेखलाकलकलं (मेखलाध्वनिम्) उत्पादितवती।

अत्र 'भ्रमद्भ्रमरसंभ्रमसंभृतशोभया' तथा च 'कलमेखलाकलकलोऽलकलोलः' इत्यत्र अनुप्रासालङ्कारोऽस्ति। तथैव 'लकलोऽलकलो' 'कलोऽलकलोल' चेत्यत्र यमकालङ्कारः दृश्यते। एवम् एकस्मिन् श्लोके स्वतन्त्रतया द्वयोः शब्दालङ्कारयोः अनुप्रासयमकयोः अवस्थानम् इति संसृष्टिः।

**२. अर्थालङ्कारसंसृष्टिः**

**लिम्पतीव तमोङ्गनि वर्षतीवाञ्जनं नभः।**
**असत्पुरुषसेवेव दृष्टिर्निष्फलतां गता॥**

महाकविभासस्य 'दरिद्रचारुदत्ते' तथा च 'मृच्छकटिके' श्लोकोऽयं दृश्यते। तमः ( अन्धकारः) अङ्गानि लिम्पतीव, नभः अञ्जनं वर्षतीव, असत्पुरुषस्य सेवा इव दृष्टिः निष्फलतां गता।

श्लोकेऽस्मिन् प्रथमार्धे उत्प्रेक्षालङ्कारद्वयम् (लिम्पतीव, वर्षतीव) अस्ति। द्वितीयार्धे उपमा अलङ्कारः वर्तते। एवं त्रयाणामलङ्काराणां पृथक्पृथक्दर्शनम् अर्थालङ्कारसंसृष्टिः।

**३. शब्दार्थालङ्कारः –**

**आनन्दमन्थरपुरन्दरमुक्तमाल्यं**
**मौलौहठेन निहितं महिषासुरस्य।**
**पादाम्बुजं भवतु नो विजयाय मञ्जु–**
**मञ्जीरसिञ्जितमनोहरमम्बिकायाः॥**

भगवत्याः अम्बिकायाः स्तुतिः श्लोकेऽस्मिन् वर्तते । अम्बिकायाः पादाम्बुजं नूपुरैः शब्दायमानं वर्तते । इन्द्रः आनन्देन मुक्तमालां तत्र समर्पितवान् अस्ति । अपि च हठेन निहितं महिषासुरस्य मस्तकं तस्मिन् पादाम्बुजे वर्तते। तदैव अस्माकं विजयाय साधकं स्यात्।

अत्र हि 'आनन्दमन्थरपुरन्दरमुक्तमाल्यं' 'मौलौ महिषासुरस्य' 'मञ्जुमञ्जीरसिञ्जितमनोहरमम्बिकायाः' इत्यत्र अनुप्रासशब्दालङ्कारोऽस्ति । 'पादाम्बुजं' (पादः अम्बुजमिव) इत्यत्र उपमा नामकः अर्थालङ्कारः दृश्यते। एवं शब्दार्थालङ्कारयोः अनुप्रासोपमयोः संसृष्टिः वर्तते।

**स्वावलोकनप्रश्नाः**

1. मिश्रालङ्कारे कयोः द्वयोः अलङ्कारयोः समावेशः?
2. संसृष्टिः नामकः अलङ्कारः कुत्र भवति?
3. संसृष्टिः कतिविधा?
4. 'लिम्पतीव' इत्यत्र कोऽलङ्कारः?
5. 'भ्रमद्भ्रमरसंभ्रमसंभृतशोभया' इति पदे कः अलङ्कारः?

### ७.२.२. सङ्करः

**नीरक्षीरन्यायेन अस्फुटभेदालङ्कारमेलने सङ्करः ।**

यत्र अनेकानाम् अलङ्काराणां मिश्रणं भूत्वा अपि तेषां पृथकत्वं नैव प्रतीयते तत्र सङ्करालङ्कारः भवति । यथा नीरक्षीरयोः मेलनं पुनः नीरं (जलम्) क्षीरं (दुग्धम्) इत्यनयोः पृथकत्वसम्पादने क्लेशजनकं तथैव अलङ्काराणां मेलनं सम्मिश्रणं वा एतादृशं भवति यत् अलङ्कारभेदप्रतीतिः दुष्करा अस्फुटा चेति ।

अस्मिन् सङ्करालङ्कारे प्रयुक्ताः अलङ्काराः परस्परसापेक्षाः भवन्ति । तेन हि चारुत्वातिशयोद्भूति सञ्जायते । स च अलङ्कारः अङ्गाङ्गिभावेन समप्राधान्येन सन्देहेन एकवाचकानुप्रवेशेन च चतुर्विधः । ते क्रमशः विविच्यन्ते ।

#### ७.२.२.१ अङ्गाङ्गिभावसङ्करः

यत्र एकोऽलङ्कारः अन्यालङ्कारस्य अङ्गत्वेन उपस्कारकः स्यात् तत्र अङ्गाङ्गिभावसङ्करः वर्तते । यथा –

**तलेष्ववेपन्त महीरुहाणां छायास्तदा मारुतकम्पितानाम् ।**
**शशाङ्कसिंहेन तमोगजानां लूनाकृतीनामिव गात्रखण्डाः ॥**

श्लोकार्थः – तदा मारुतकम्पितानां (पवनकम्पितानाम्) महीरुहाणां (वृक्षाणाम्) छाया तलेषु एवं कम्पते स्म यत् चन्द्ररूपसिंहेन अन्धकाररूपगजानां विच्छिन्नाः गात्रखण्डाः (अवयवखण्डाः) कम्पमानाः सन्तीति ।

अत्र 'शशाङ्कसिंहेन' इति 'तमोगजानाम्' इति च रूपकम् । यतो हि चन्द्रे सिंहारोपः अन्धकारे गजारोपश्च दृश्यते । छायाकम्पने गजगात्रखण्डानां सम्भावना इत्यतः उत्प्रेक्षा । तथैव 'तमोगजानाम्' इति पदस्य 'लूनाकृतीनाम्' इति विशेषणमस्ति । इदं विशेषणं गजपक्षे तु सार्थकं

संयुक्तञ्च परन्तु अन्धकारपक्षे मुख्यवृत्त्या अनुचितं वर्तते। सन्दर्भदृष्ट्या अत्र 'स्वरूपनाशः' इत्यर्थः स्वीकरणीयः इत्यस्मात् निगरणमूला अतिशयोक्तिः जायते।

एवम् अतिशयोक्तिः, रूपकम्, उत्प्रेक्षा चेत्यादयः परस्परमिलिताः अलङ्कारास्सन्ति। किञ्च उत्प्रेक्षा अङ्गित्वेन भूत्वा रूपकम् अतिशयोक्तिश्च अङ्गरूपेण उपस्कारकौ स्तः । अतः अङ्गाङ्गिभावसङ्करोऽलङ्कारः अभवत्।

**७.२.२.२ समप्राधान्यसङ्कारः**

यस्मिन् काव्ये बहवः अलङ्काराः समानरूपेण प्रधानाः न तु अङ्गाङ्गिभावेन स्थिता तत्र समप्राधान्यसङ्करालङ्कारः यथा –

**अवतु नः सवितुस्तुरगावली समतिलङ्घिततुङ्गपयोधरा।**

**स्फुरितमध्यगतारुणनायका मरकतैकलतेव नभःश्रियः ॥**

श्लोकार्थः – सवितुस्तुरगावली ( सूर्यस्य अश्वपङ्क्तिः) अस्मान् अवतु ( रक्षतु ) । या च नभःश्रियः (आकाश-लक्ष्म्याः) मरकतैकलतेव ( मरकतमणिमयी एकावली ( हारः) अस्ति। तथा च यया तुङ्गपयोधराः (मेघाः, स्तनाः) समतिलङ्घिताः ( सम्यक् अतिलङ्घिताः) । अपि च या स्फुरितमध्यगतारुणनायका अर्थात् दीप्तिमतः मध्यस्थारुणात् नियन्त्रिता अस्ति । ( अत्यधिकप्रकाशमयेन मध्यस्थरक्ताभनायकमणिना युक्ता वर्तते )

अत्र 'पयोधर' इति शब्दश्लेषेण एकावलीगतपयोधरेण (स्तनेन) तुरगपङ्क्तिगतपयोधरः ( मेघः) इत्यस्य निगरणं (गिलनं) प्रतीयते । अतः शब्दश्लेषमूला अतिशयोक्तिरिति । अयमेव अतिशयोक्तिः अलङ्कारः अङ्गत्वेन सूर्याश्वपङ्क्तौ ( सवितृतुरगावली इत्यत्र) गगनलक्ष्मीमरकतैकावल्याः तादात्म्यं सम्भावयति इत्यतः उतप्रेक्षा-अलङ्कारप्रतीतिः । तथैव नभोलक्ष्म्यां नायिकाव्यवहारसमारोपरूपा समासोक्तिगर्भा यतो हि एकावलीधारणधर्मः चेतननायिकायाः न तु अचेतनायाः आकाशलक्ष्म्याः भवति । एवं पयोधरशब्दश्लेषस्य उभयोपकारकत्वात्, ततः उत्प्रेक्षासमासोक्त्योः एककालत्वं वर्तते । अत्र परस्परापेक्षया चारुत्वसमुन्मेषः च उभयोस्तुल्यः इति विनिगमनाविरहात् समप्राधान्यमस्ति।

अन्यदेकम् उदाहरणं प्रस्तूयते–

**पिनष्टीव तरङ्गाग्रैः समुद्रः फेनचन्दनम्।**

**तदादाय करैरिन्दुलिम्पतीव दिगङ्गनाः ॥**

**श्लोकार्थः** – समुद्रोऽयं तरङ्गाग्रैः पिनष्टीव फेनचन्दनम् । तदादाय इन्दुः (चन्द्रः) करैः (चन्द्रकिरणैः) दिगङ्गनाः लिम्पतीव अर्थात् दिग्रूपरमणीनां चन्दनलेपनं करोति इव भाति।

श्लोकेऽस्मिन् 'पिनष्टीव' तथा च 'लिम्पतीव' इत्यत्र उत्प्रेक्षयोः कालभेदेऽपि समप्राधान्यम्। अत्र हि आदौ पेषणं ततश्च लेपनं वर्तते । अन्यच्च अन्योन्यनिरपेक्षवाक्यद्वयमपि दृश्यते। लौकिकसिद्धपेषणलेपनपौर्वापर्यच्छायायाः अनुकारिणोत्प्रेक्षाद्वयम् पौर्वापर्येण चारुतातिशयत्वं समुन्मेषयति । एकफलसाधनतया समप्रधानमिदम् उत्प्रेक्षाद्वयम् । एवं समप्रधानसङ्करोऽत्र अवलोक्यते।

### ७.२.२.३ संदेहसङ्करालङ्करः

यत्र अनेके अलङ्काराः प्रयुक्ताः सन्तः तेषाम् अलङ्कारच्छाया ( अलङ्कारसौन्दर्यम्) सहृदयस्य चित्तवृत्तौ सन्देहं समुत्पादयति तत्र सन्देहसङ्करालङ्कारः जायते। यथा

**शशिनमुपगतेयं कौमुदी मेघमुक्तं**
**जलनिधिमनुरूपं जह्नुकन्यावतीर्णा।**
**इति समगुणयोगप्रीतयस्तत्र पौराः**
**श्रवणकटु नृपाणामेकवाक्यं विवव्रुः ।।**

रघुवंशमहाकाव्ये इन्दुमतीस्वयंवरप्रसङ्गे प्रस्तुतश्लोकः उद्धृतोऽस्ति। 'इयं कौमुदी (चन्द्रिका) मेघमुक्तं शशिनम् उपागता (मेघमुक्तचन्दम् उपागता), जह्नुकन्येयं (गङ्गा) अनुरूपं जलनिधिम् अवतीर्णा' इति समगुणयोगेन (इन्दुमती-अजयोः परस्परयोगात् ) प्रमुदिताः पौराः (नागरिकाः) स्वयंवरे आगतानां नृपाणां कृते श्रवणकटुवाक्यम् अवोचन्(उक्तवन्तः)।

अत्र 'इयम्' इति सर्वनाम्ना यद्यजं वृतवती इन्दुमती विशिष्टरूपेण निर्दिश्यते। तदा बिम्बप्रतिबिम्बभावापन्नयोः धर्मविशिष्टयोः सदृशयोः (इन्दुमती-चन्द्रिका, इन्दुमती-गङ्गा इत्यनयोः पदयोः) ऐक्यारोपरूपा निदर्शना व्यज्यते । यदि तेन सा स्वरूपेणैव निर्दिश्यते, बिम्बभूतो धर्मस्तु पूर्वप्रस्तावात् 'समगुणयोगप्रीतयः' इति पौरविशेषणात् अवगम्यते, तदा प्रस्तुते धर्मिणि तद्वृ-तान्तप्रतिबिम्बभूतः अप्रस्तुतवृत्तान्तारोपरूपः ललितालङ्कारः भवति। अतः सहृदयः निर्णयं कर्तुं नैव शक्नोति यदत्र निदर्शना वा ललितालङ्कारः वेति। तस्मादेव सन्देहसङ्करः वर्तते। अपरोऽपि श्लोकः उदाहरणरूपेण प्रस्तूयते।

**मुखेन गरलं मुञ्चन्मूले वसतिचेत्फणी।**
**फलसन्दोहगुरुणा तरुणा किं प्रयोजनम्?**

फलसमूहेन अवनतवृक्षस्य को लाभः ? यस्य मूले गरलं (विषम्) मुञ्चन् फणी (नागः/सर्पः) निवसति।

अस्मिन् पद्ये महोरगवृत्तान्ते (सर्पवृत्तान्ते) वर्ण्यमाने राजद्वाररूढखलवृत्तान्तोऽपि प्रतीयते। तत्र किं वस्तुतः तथाभूतसर्पवृत्तान्तः एव प्रस्तुतेऽप्रस्तुतः खलवृत्तान्तः ततः अभिव्यक्तः भवतीति समासोक्तिः। यद्वा प्रस्तुतखलवृत्तान्तप्रत्यायनाय अप्रस्तुतसर्पवृत्तान्तकथनम् अप्रस्तुतप्रशंसा अस्ति। अथवा वर्ण्यमानसर्पवृत्तान्तसंकीर्तनेन समीपस्थितखलमर्मोद्घाटनं क्रियते इति उभयस्यापि प्रस्तुतत्वात् प्रस्तुताङ्कुरः इति संदेहसङ्करालङ्कारः।

### ७.२.२.४ एकवाचकानुप्रवेशसङ्करः

यत्र एकेन वाचकेन एव द्वयोः अलङ्कारयोः प्रतीतिः तत्र एकवाचकानुप्रवेशसङ्करः स्यात्। काव्यप्रकाशकारः मम्मटाचार्यस्तु शब्दार्थालङ्कारयोः एव एकवाचकानुप्रवेशः इति लक्षयति। यथा -

**स्पष्टोच्छवसत्किरणकेसरसूर्यबिम्ब –**
**विस्तीर्णकर्णिकमथो दिवसारविन्दम्।**
**श्लिष्टाष्टदिग्दलकलापमुखावतार-**
**बद्धान्धकारमधुपावलि संचुकोच॥**

श्लोकेऽस्मिन् कविः सायङ्कालवर्णनं करोति। अथ स्पष्टप्रकाशकिरणरूपकेसरेण युक्तं सूर्यबिम्बरूपं विस्तुतकर्णिकाभिः उपेतं दिनरूपकमलं यस्य च दिग्दलकलापः (दिग्समूहरूपपर्णानि) परस्परं श्लिष्टः सन् मुखावतारे (रात्रिकालस्य आरम्भे) अन्धकाररूपमधुपावलिबद्धं तत्कमलं सङ्कुचितम् अभवत्।

पद्येऽस्मिन् 'किरणकेसरः' ,' सूर्यबिम्बविस्तीर्णकर्णिकः' तथा च 'दिग्दलकलापः' इत्यत्र रूपकम् अनुप्रासः चेति अलङ्कारद्वयं एकपदानुप्रविष्टम्। अतः एकवचनानुप्रवेशसङ्करः अभवत्।

इदमत्र ज्ञातव्यं यत् यत्रैकस्मिन् श्लोके पदभेदेन शब्दार्थालङ्कारयोः स्थितिः तत्र तयोः संसृष्टिः एव। किन्तु यत्र एकास्मिन् पदे शब्दार्थालङ्कारस्थितिःतत्र सङ्करः एव इति।

### ७.२.२.५ सङ्करसङ्करालङ्कारः

क्वचित् सङ्कराणामपि सङ्करो दृश्यते तत्र सङ्करसङ्करालङ्कारः स्यात्। तथा–

**मुक्ताः केलिविसूत्रहारगलिताः संमार्जनीभिर्हृता**
**प्रातः प्राङ्गणसीम्नि मन्थरचलद्बालाङ्घ्रिलाक्षारुणाः।**
**दूराद्दाडिमबीजशङ्किताधियः कर्षन्ति केलीशुका**
**यद्विद्वद्भवनेषु भोजनृपतेस्तत्त्यागलीलायितम्॥**

**श्लोकार्थः** भोजनृपतेः त्यागलीला इयं यत् विद्वद्भवनेषु सुरक्रीडासमये विच्छिन्नहारेभ्यः गलिताः मुक्ताः (मौक्तिकानि) संमार्जनीभिः आहृताः। ( ते एव मुक्ताः ) प्रातः काले प्राङ्गणे मन्दं-मन्दं चलद्बालानां चरणलाक्षारसेन रक्ताः जाताः। दूरात् (तान् मौक्तिकान् ) दाडिमबीजशङ्कितधियः केलिशुकाः कर्षन्ति इति।

अत्र तावद्विदुषां संपत्समृद्धिवर्णनात् उदात्तालङ्कारोऽस्ति। तन्मूलकः 'बालङ्घ्रिलाक्षारुणा' इत्यत्र तद्गुणालङ्कारः वर्तते। तत्रैव वक्ष्यमाणभ्रान्त्युपपादकः पदार्थहेतुककाव्यलिङ्गालङ्कारः चेति तयोरेकवाचकनुप्रवेशसङ्करः अभवत्। तन्मूलः 'शङ्कितधियः' इत्यत्र भान्तिमदलङ्कारः ताभ्यां चोदात्तालङ्कारः चारुतां नीत इति तयोश्च तस्य च अङ्गाङ्गिभावेन संकरः। एवं विद्वद्गेहवैभवस्य हेतुमतो राज्ञः वितरणविलासस्य हेतोः च भेदकथनं हेत्वलङ्कारः।

एवं बहुविधालङ्काराः अत्र दृश्यन्ते इत्यतः सङ्करसङ्करालङ्कारः वर्तते।

**स्वावलोकनप्रश्नाः**

1. अस्फुटभेदालङ्कारमेलने कोऽलङ्कारः ?
2. सङ्करालङ्कारः कतिविधः ?
3. अङ्गाङ्गिभावसङ्करस्य उदाहरणं लिखत।
4. एकवाचकानुप्रवेशसङ्करः कुत्र भवति?
5. 'बालाङ्घ्रिलाक्षारुणाः' इत्यत्र कः अलङ्कारः ?

## ७.३. गूढार्थप्रतीतिमूलकालङ्कारः

यत्र व्यङ्ग्यं गोपयितुं यत्नः क्रियते कविभिः तत्र गूढार्थप्रतीतिमूलकोऽलङ्कारः भवति। कदाचित् विपरीतं कथनेन व्यङ्ग्यं गोपितं दृश्यते। इदमेव व्यङ्ग्यं सहृदयमनसि चमत्कारं जनयति। श्लिष्टपदप्रयोगेन सामान्यविषयं कविः निजविचारं प्रतिपादयति। तेन हि व्यञ्जना सद्यः नैव अवगम्यते तत्र। स्वभावोक्तिः अलङ्कारः तत्रैव अर्न्तभवति। सः सम्प्रति वर्ण्यते।

### ७.३.१. स्वभावोक्तिः

**स्वभावोक्तिः स्वभावस्य जात्यदिस्थस्य वर्णनम्।**
**कुरङ्गैरुत्तरङ्गाक्षैः स्तब्धकर्णैरुदीक्ष्यते॥**

जात्यादिस्थस्य स्वभावस्य वर्णनं स्वभावोक्तिः इति। अत्र जात्यदिस्थस्वभावः इत्युक्ते पदार्थस्य जातिः, गुण, क्रिया चेत्यादीन् अनुसृत्य वर्णितः स्वभावः एव स्वभावोक्त्यलङ्कारः भवति।

अत्र हि कस्यचित् पदार्थस्य, मानवस्य पशोः चेत्यादीनां क्रियायाः अथवा प्रकृतेः रमणीयतायाः यथार्थं वर्णनं दृश्यते। अस्मिन् वर्णने विविधाङ्गानां सूक्ष्मचित्रणं भवति। कवेः

प्रतिभायाः समुचितं प्रदर्शनम् अलङ्कारेऽस्मिन् आवश्यकम्। तस्मात् कृतं वर्णनमपि चमत्कारयुक्तं स्यात्। यथा –

उत्तरङ्गाक्षैः (चञ्चलनेत्रैः) स्तब्धकर्णैः च कुरङ्गैः वीक्ष्यते इति । कुरङ्गस्वभाववर्णनं इत्यस्मात् स्वभावोक्तिः अलङ्कारः। अन्यदेकमुदाहरणं पश्यत –

**तौ संमुखप्रचलितौ सविधे गुरूणां**
**मार्गप्रदानरभसस्खलितावधानौ।**
**पार्श्वोपसर्पणमुभावपि भिन्नदिक्कं**
**कृत्वा मुहुर्मुहुरुपासरतां सलज्जम्॥**

**श्लोकार्थः -** कदाचित् नायिकानायकौ गुरूणां सविधे प्रचलितौ। तदा परस्परसंमुखम् आगतौ। अतः मार्गप्रदानाय रभसा (त्वरया) स्खलितावधानौ जातौ। तेन हि पार्श्वोपसर्पणम् उभावपि मुर्हुमुहु भिन्नदिक्कं घट्टनम् अभवत्। ततः सलज्जं द्वावपि पलायितौ।

एवमत्र सल्लजाक्रिया वर्णिता अतः स्वभावोक्तिः।

**स्वावलोकनप्रश्नाः -**

1. स्वभावोक्तेः लक्षणं लिखत।
2. स्वभावोक्तौ कस्य वर्णनं भवति?
3. स्वभावोक्तिः अलङ्कारः कुत्र अन्तर्भवति?

**७.४. उपसंहारः**

अस्मिन् खण्डे अस्माभिः मिश्रालङ्काराणां प्रकाराः उपवर्णिताः। तत्र हि संसृष्टिः तथा च सङ्करः इत्यनयोः विस्तृतं विश्लेषणं विहितम्। सङ्करालङ्कारेषु सूक्ष्मरूपेण भेदाः वर्तन्ते तेऽपि सोदाहरणं निरूपिताः। ततश्च गूढार्थप्रतीतिमूलकालङ्कारे समाविष्टः स्वाभावोक्तिः अलङ्कारः वर्णितः।

एवं सप्तखण्डेषु 'कुवलयानन्दः' इति ग्रन्थस्य संक्षेपेण परिचयः कारितः। अनेन छात्राणां ज्ञानवर्धनं भवेत् इति निश्चप्रचम्।

*इति शम्*